Digitization by eGangotri-South Center

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला - ३१४
शास्त्रपरिचयग्रन्थमाला - २

संस्कृतसाहित्यशास्त्रप्रवेशिनी

(प्रथमभागः)

प्रधानसम्पादकः
आचार्यः वि.मुरलीधरशर्मा
कुलपतिः

सम्पादकः
आचार्यः जी.एस्.आर्.कृष्णमूर्तिः

रचयिता
डा.सीहेच्.नागराजु
सहाचार्यः, अनुसन्धानप्रकाशनविभागः

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
प्रथमवर्गीयमानितविश्वविद्यालयत्वेन विश्वविद्यालयानुदानायोगेन अनुमोदितः
तिरुपतिः - ५१७ ५०७ (आन्ध्रप्रदेशः)
२०१८

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ग्रन्थपरिचयः

सर्वेषु शास्त्रेषु विद्यमानानां सारभूत-विषयाणां सङ्ग्रहात्मकमेव भवति साहित्यं नाम। एतत् साहित्यशास्त्रम् अनेके कवयः आचार्याः स्वीयैः मूल्यवत्तरैः ग्रन्थरत्नैः नित्यं परिपोषयन्तः सन्ति। अस्य शास्त्रस्य समग्रपरिचयार्थं प्रणीतेषु नैकेषु इतिहासग्रन्थेषु बहुविधवादविवादाः संशयस्थानानि च सन्तीति कारणात् छात्राणाम् अध्ययने महान् क्लेशः सञ्जायते। तमेव क्लेशम् अपाकर्तुं सरलया भाषया निर्विवादेन संवादेन च ऐदम्प्राथम्येन **संस्कृतसाहित्यशास्त्रप्रवेशिनी** इति नाम्ना अयं ग्रन्थः भवतां सम्मुखीनो वर्तते।

अस्मिन् ग्रन्थे साहित्यशास्त्रपरिचयः, इतिहासपुराणानि, पञ्चमहाकाव्यानि, गद्यकाव्य-द्वयम्, चम्पूकाव्यद्वयम्, पञ्चमहानाटकानि, अलङ्कारशास्त्रस्य आचार्याः, काव्यप्रमेयविषयाः इति शीर्षकाङ्किताः अष्टौ खण्डाः परिकल्पिताः। एतेषु अष्टसु खण्डेषु त्रयस्त्रिंशत् पाठाः संरचिताः।

प्रतिपाठम् आदौ पाठाध्ययन-प्रयोजनानि निगदितानि। ततः पाठः उपयुक्तैः मञ्जूषादिभिः संयुक्तः सन् अतीव सरल-मनोहरभाषया उपन्यस्तः। पाठान्ते अवधेयांशाः, ततः बहुविधाः अभ्यासाः छात्राणां विषय-धारणार्थं सन्निवेशिताः। प्रतिखण्डम् अन्ते अस्य शास्त्रस्य समग्रज्ञानविकासाय नितान्तम् अपेक्षिताः परियोजनाः अपि प्रदत्ताः। अनेन क्रमेण छात्राणाम् अनायासेन अचिरादेव शास्त्रे अस्मिन् महान् अधिकारः सम्पद्येत इति आशास्महे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला - ३१४
शास्त्रपरिचयग्रन्थमाला - २

संस्कृतसाहित्यशास्त्रप्रवेशिनी

(प्रथमभागः)

प्रधानसम्पादकः
आचार्यः वि.मुरलीधरशर्मा
कुलपतिः

सम्पादकः
आचार्यः जी.एस्.आर्.कृष्णमूर्तिः

रचयिता
डा.सीहेच्.नागराजु
सहाचार्यः, अनुसन्धानप्रकाशनविभागः

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
प्रथमवर्गीयमानितविश्वविद्यालयत्वेन विश्वविद्यालयानुदानायोगेन अनुमोदितः
तिरुपतिः - ५१७ ५०७ (आन्ध्रप्रदेशः)
२०१८

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संस्कृतसाहित्यशास्त्रप्रवेशिनी (प्रथमभागः)

रचयिता : डा.सीहेचू.नागराजु
सहाचार्यः, अनुसन्धानप्रकाशनविभागः

प्रकाशनवर्षम् : २०१८

मुद्रितप्रतिकृतयः : १०००

ISBN : 978-81-937648-3-1

© राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आन्ध्रप्रदेशः

प्रकाशकः : कुलसचिवः
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

मूल्यम् : रू. २००/-

मुद्रकः : प्रजाशक्ति प्रिन्टर्स & पब्लिषर्स प्रैवेट लिमिटेड,
तिरुपतिः

टङ्कणं सज्जीकरणञ्च : रागि वेङ्कटाचारी, अतिथ्यध्यापकः, अनुसन्धान-
प्रकाशनविभागः, रा.सं.विद्यापीठम्, तिरुपतिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

Rashtriya Sanskrit Vidyapeetha Publication Series - 314
Sastra Parichaya Publication Series - 2

SAṂSKṚTA-SĀHITYA-ŚĀSTRA-PRAVEŚINĪ

(PART - I)

General Editor
Prof. V. Muralidhara Sharma
Vice-Chancellor

Editor
Prof. G. S. R. Krishnamurthy

Author
Dr. Ch. Nagaraju
Asst. Professor, Dept. of Research and Publications

RASHTRIYA SANSKRIT VIDYAPEETHA, TIRUPATI
Graded by UGC as Category - I Deemed to be University
Tirupati - 517507, Andhra Pradesh
2018

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

SAṂSKṚTA-SĀHITYA-ŚĀSTRA-PRAVEŚINĪ

(PART - I)

Author : Dr.Ch.Nagaraju, Asst. Professor,
Dept. of Research and Publications,
R.S.Vidyapeetha, Tirupati

Year of Publication : 2018

Printed Copies : 1000

ISBN : 978-81-937648-3-1

© Rashtriya Sanskrit Vidyapeetha, Tirupati, Andhra Pradesh

Publisher : REGISTRAR
Rashtriya Sanskrit Vidyapeetha, Tirupati

Price : Rs. 200/-

Printed at : Prajasakti Printers and Publishers Pvt. Ltd.
Tirupati

Typeset & Design : Ragi Venkata Chary, Guest Lecturer,
Dept. of Research and Publications,
R.S.V.P. Tirupati

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संस्कृतसाहित्यशास्त्रप्रवेशिनी

(प्रथमभागः)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आचार्य.वि.मुरलीधरशर्मा (कुलपतिः)
राष्ट्रियसंस्कृतविद्यापीठम् (मानितविश्वविद्यालयः)
तिरुपतिः, आन्ध्रप्रदेशः - ५१७५०७

प्रवेशिनीमुद्दिश्य किञ्चित् . . .

बहोः कालतः विद्याध्ययनप्रारम्भदशायां संस्कृतशिक्षणसरणिरासीत् मौखिक्येव। प्रारम्भे शब्दधातुकोशानां कण्ठस्थीकरणं, ततः पञ्चकाव्यपाठनं, ततश्च शास्त्राणां प्रारम्भिकग्रन्थानां लघुसिद्धान्तकौमुदी-तर्कसङ्ग्रहादीनाम् अध्यापनमिति क्रमः प्रायः समग्रदेशे प्रवर्तते स्म। प्रारम्भस्तर एव संस्कृतभाषायाः मूलभूतांशानाम् अध्यापनेन शास्त्रप्रवेशः सम्भवति सुकर इति संस्कृतशालासु शास्त्राध्यापनसरणिरियं प्रावर्तत पुरा।

परमधुना संस्कृतशिक्षणसरणिरन्यादृश्येव। शालासु छात्राः षष्ठकक्ष्यातः दशम-कक्ष्यापर्यन्तं संस्कृतं भाषात्वेन पाठ्यपुस्तकमाध्यमेन अधीत्य शास्त्राध्ययनार्थं प्राच्यकलाशाला-संस्कृतविद्यापीठादिषु प्रविशन्ति।

शालासु तैरधिगतं संस्कृतज्ञानम् अत्यल्पमेव। विद्यापीठादिषु तत्तादृशान् अल्पसंस्कृतज्ञान् छात्रान् विनैव शास्त्रपरिचयं शास्त्रमध्याप्यते। तादृशच्छात्राः शालास्वधिगतेन अल्पसंस्कृतज्ञानबलेन न जात्वपि शास्त्रमधिगन्तुं पारयन्तीति स्थितिः तत्तच्छास्त्राध्यापकानाम् अनुभवैकवेद्या।

शास्त्राध्यापने सर्वत्र परिदृश्यमाना विलक्षणस्थितिरेवम् उपमीयेत। तरणकौशलमधिगन्तुकामं प्रारम्भे तरणविषयकसिद्धान्तम् अध्याप्य तरणाभ्यासार्थं समुद्रे पातयामश्चेत् भवति यादृशी स्थितिस्तस्य तादृश्येव स्थितिरस्य सामान्य-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संस्कृतज्ञानवतः छात्रस्य शास्त्राध्ययनस्य। तरणविषयकसिद्धान्ता-ध्यापनात्परं तरणाभ्यासः तरणतडागे (Swimming Pool) करणीयः, न जात्वपि समुद्रे। तरणतडागे तरणाभ्यासः जलनिमज्ञनजनितप्राणभयोत्पादकत्वाभावात् तरणा-नन्दजनकत्वाच्च सुकरः तरणप्रेरकश्च। तथैव अल्पसंस्कृतज्ञानवतश्छात्रस्य शास्त्राध्यापनात्पूर्वं सरलरीत्या शास्त्रपरिचयः कार्यः, न तु शास्त्रं साक्षादध्यापनीयम्। अल्पविद्यापरिग्रहाणां सङ्क्षेपरुचीनाञ्च संस्कृतच्छात्राणां शास्त्राध्यापने अवश्यं फलदेति हेतोः सरणिरियमेव शरणीकरणीया। नान्या गतिर्विद्यते अयनाय।

अतः पूर्वोक्तां देशव्यापिनीं संस्कृतशास्त्राध्ययनपरिस्थितिं सम्यगाकलय्य **संस्कृतशास्त्रप्रवेशिनीग्रन्थमालायाः** प्रकाशनं विद्यापीठेन प्रारब्धम्। तन्मालायामयं **साहित्यशास्त्रप्रवेशिनीग्रन्थः** अन्यतमं पुष्पम्।

एतन्मालायां ग्रथितास्समेऽपि शास्त्रप्रवेशिनीग्रन्थाः "यया रीत्या अस्मन्मनः सौकर्येण विषयान् गृह्णाति, चिरं स्मरति च तया विशिष्टरीत्या सन्ति प्रणीताः।" ग्रन्थस्यास्य वैशिष्ट्यानि इत्थं सन्ति।

(१) प्रयोजननिर्देशः - प्रत्येकमपि पाठस्य प्रारम्भे पाठाध्ययनसमाप्तेः परं छात्रः यद्यज्ज्ञास्यति तत्सर्वं पूर्वमेव प्रयोजननाम्ना निर्दिश्यते। अनेन सः आत्मना अधिगमिष्यमाणं विषयमुद्दिश्य पूर्वमेव ज्ञास्यति। अनेन तन्मनः तत्पाठ्यविषयमेव केन्द्रीकृत्य प्रवर्तिष्यते।

(२) सारणीचित्रादिमाध्यमेन पाठ्यांशप्रस्तुतिः - पाठाश्च सारणी-चित्रादिमाध्यमेन प्रस्तुताः, यद्दर्शनेन सारणीचित्रगताः पाठ्यांशाः चित्ररूपेण मनःपटले मुद्रितास्सन्तः चिरं स्मर्यन्ते। विभज्य अवगमनं संयोज्य च अवगमनमिति रीतिरत्र समाश्रिता। अनया पाठ्यांशावगमनं भवति सुकरम्।

(३) विषयविभाजनम् - सम्पूर्णविषयस्य अपेक्षया खण्डशः विषयस्य अवगमनं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्मरणञ्च सुकरं भवतीति हेतोः विषयस्सर्वोऽपि खण्डशः विभक्तः क्रमशश्च प्रस्तुतः। नत्वत्र विषयस्सर्वोऽपि सामग्र्येण सातत्येन च निर्दिष्टः।

(४) **पाठसारः** - प्रत्येकं पाठस्य अन्ते प्रस्तुतः तत्सारः छात्रं न केवलं पाठ्यांशं पुनः स्मारयति अपि तु विस्तृतांशं सङ्क्षिप्य मनसि धर्तुञ्च अभ्यासयति।

(५) **अभ्यासाः** - प्रत्येकस्मिन् पाठे प्रस्तुताः विविधाभ्यासाः छात्राणां विषयावबोधन-स्मरण-विश्लेषणादिबौद्धिकशक्तीः मूल्याङ्कयन्ति।

(६) **परियोजना** - परियोजना तु अधीतविषयस्य विस्तृताध्ययनार्थम् अन्वेषणार्थं स्थलान्तरेषु नूतनस्थलेषु वा तत्प्रयोगपरीक्षणार्थं च छात्रान् प्रेरयति।

(७) **वर्णरञ्जनम्** - पाठेषु प्रधानाः अंशाः सर्वेऽपि पेटिकासु वर्णरञ्जिताः विहिताः सन्ति। उदाहरणार्थम् - महत्त्वात् भारवत्त्वाच्च महाभारतमुच्यते। एवंविधानेन ते विषयाः छात्रमनःपटले चित्ररूपेण अङ्किताः भूत्वा चिरं स्मर्यन्ते।

(८) **भाषा** - प्रायः सन्धिसमासरहितत्वात् भाषा सरला सुखबोध्या च। वाक्यरचनारीतिश्च मातृभाषावाक्यसरणिमनुसरति। सरणिरियं शीघ्रविषयावगमने सारल्यं वितनोति।

इत्थमत्र पूर्वोक्तविधया समग्रविषयनिरूपणं शिक्षामनोविज्ञानसिद्धान्तान् आश्रित्य प्रवर्तत इति हेतोः **साहित्यशास्त्रप्रवेशिनी**यं नितरां वैज्ञानिकी, मनोवैज्ञानिकी च। अत एवेयं छात्रसमाकर्षिणी शास्त्राध्ययनप्रेरिणी च भविष्यतीति मे द्रढीयान् विश्वासः।

ग्रन्थरचयिता डा.सीहेच्.नागराजु मत्सूचनामनु प्रत्येकमप्यंशं मदुक्तं सावधानम् अनुपालयन् ग्रन्थमेनं सुष्ठु प्राणैषीत्। नन्वयं नाम्ना वयसा च युवा परं वैदुष्येण, अध्ययनाध्यापननिष्ठया नितरां प्रौढो विदुषां वशंवदश्च। प्रारम्भिकच्छात्राणां सुखबोधाय शास्त्रपरिचायकग्रन्थाः समारच्याः येन ते तत्तच्छास्त्रे सलीलं प्रवेशं प्रेरणां च

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लभेरन्निति मत्सङ्कल्पममुं रचयितायं सफलयतीति हेम्नः परमामोदः। एतद्ग्रन्थ-रत्नप्रणयनेन रचयितुरस्य उद्देशस्सकलोऽपि परिपूर्णो भवत्वित्याशासे।

सम्पादकीयं समालिखन् नैकशास्त्रनदीष्णाः, साहित्यशास्त्रमर्मज्ञाः, उत्तमकाव्यप्रणयिनः, वाग्मिनां प्राग्रहराः, परिशोधकपरिवृढाः दिगन्तव्याप्तयशसां नैकशास्त्रनदीष्णानां श्रीमतां कोम्पेल्ल रामसूर्यनारायणमहाभागानां शिष्योत्तमाः, आचार्य. गुळ्ळपल्लि श्रीरामकृष्णमूर्ति महोदयाः। तत्सम्पादकीयं ग्रन्थपरिचयं सुष्ठु प्रास्तौत्। तेभ्यो मदीयं कार्तज्ञ्यमाविष्क्रियते।

साहित्यशास्त्रप्रवेशिनीयम् आभारतं प्रतिष्ठितासु संस्कृतशिक्षणसंस्थासु आदर्शसाहित्यशास्त्रपाठ्यपुस्तकरूपेण सुप्रथिता भविष्यतीत्यत्र न मे कोऽपि शङ्कालेशः।

भगवान् सप्ताचलाधीशः पद्मावतीजानिः एतच्छास्त्रप्रवेशिनीपरम्परां प्रकामं प्रथितयशस्कां विदधात्विति तच्चरणपङ्कजयोः प्रणमन् विरमामि।

साहित्यशास्त्रतत्त्वार्थसुखबोधनसिद्धये ।
प्रवेशिनीयं प्राणायि च्छात्राणां हर्षवर्षिणी ।।

विदुषां वशंवदः

मुरलीधरः

(वि.मुरलीधरशर्मा)
कुलपतिः

स्वस्तिश्रीविलम्बि-कार्त्तिक-पूर्णिमा
२३.११.२०१८

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सम्पादकीयम्

विदितमेव सर्वेषां साहित्यं सर्वशास्त्राणां समन्वयात्मकम् इति। सर्वप्रथमं वेदाङ्गशिक्षाया अनुप्रयोगः काव्यपठने दृश्यते। प्रयोगशरणं व्याकरणमपि अस्य शास्त्रस्य प्रयोगेषु संदृश्यते। छन्दोविधानं साहित्यग्रन्थेषु परिदृश्यते। पद-पदार्थोभयात्मके काव्ये निरुक्तं लक्ष्यते। खगोलादिवर्णने ज्यौतिषं संलक्ष्यते। संस्कृतिसन्देशादिषु कल्पशास्त्रं परिलक्ष्यते।

साहित्यसृष्टौ पाण्डित्यम्, अनुभवः, चिन्तनं च समानभूमिकामावहन्ति। सम्यग्विचिन्तनं कृत्वा स्वानुभवविषयान् पाण्डित्येन संयोज्य कविः काव्यानि रचयति। तत्र पूर्वमीमांसा, उत्तरामीमांसा, न्यायः, वैशेषिकम्, सांख्यम्, योगः इत्येतेषां धारा काव्येषु द्रष्टुं शक्यते।

स्वानुभवेन वार्तादण्डनीतिशास्त्रे कविना संयोज्येते। एवं सकलविद्यानां समन्वयात्मकं भवति साहित्यम्। अनादिकालात् दिने दिने परिवर्धमानमिदं साहित्यं द्विधा भवति। वैदिकं लौकिकमिति। वैदिकं वेदप्रवेशिनीनामके ग्रन्थे द्रष्टव्यम्।

लौकिकं साहित्यं काव्यं काव्यशास्त्रमिति द्विधा विभक्तम्। काव्यसाहित्यमपि प्राचीनार्वाचीनभेदेन द्विविधम्। प्राचीनसाहित्ये इतिहासपुराणानि परिगणितानि। अत्र आदिकाव्यं रामायणं, महाभारतम् इतिहासः, अष्टादशपुराणानि, उपपुराणानि, उपोपपुराणानि च।

अर्वाचीनसाहित्ये पञ्चकाव्यानि, गद्यकाव्यानि, चम्पूकाव्यानि, नाटकानि च परिगणितानि।

एवं बहुधा प्रवृद्धं तत्रत्यप्रमेयतत्त्वविमर्शनपुरस्सरम् अनेके आचार्याः काव्य-शास्त्रचिन्तनमकुर्वन्। काव्यतत्त्वपरिशीलनपरमिदं काव्यशास्त्रं साहित्यशास्त्रम्,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अलङ्कारशास्त्रमिति नाम्नापि प्रसिद्धम्। केचन शास्त्रमिदं क्रियाकल्प इति सौन्दर्यशास्त्रमिति, सहृदयशास्त्रम् इत्यपि व्यवहरन्ति।

साहित्यशास्त्रप्रवेशिनीति साहित्यं प्रविष्टानां प्रवेशमिच्छतां च आलोकं दर्शयितुं करदीपिकेव निर्मेया इति सङ्कल्पेन संग्रथिता।

अत्र अष्टौ खण्डाः सन्ति। प्रथमखण्डे **'साहित्यशास्त्रं नाम किम्'** इति शीर्षकेण तदीयः सङ्क्षिप्तः परिचयः प्रदत्तः।

इतिहासपुराणानि इति द्वितीयखण्डे नामानुसारं रामायणमहाभारते इतिहासौ पुराणानि च विशदीकृतानि।

शास्त्रप्रवेशाय प्रथमतया काव्यज्ञानमपेक्षितम्। काव्येषु पञ्चमहाकाव्यानि क्रमशः पठनीयानि। तत्र शब्दधातुरूपपरिज्ञानेन सह अलङ्कारगुणरीतिभावरसानां विषये दार्ढ्यं भवति। तदर्थं तृतीयखण्डः कल्पितः।

पद्यसाहित्येन सह गद्यसाहित्यमपि आवश्यकम्। **'गद्यं कवीनां निकषं वदन्ति'** इति आभाणकेन गद्यस्य महत्त्वं ज्ञायते। तदर्थं गद्यकाव्यपरिचयो ज्ञेयः। तदर्थं चतुर्थखण्डः परिकल्पितः।

मनोवैज्ञानिकदृष्ट्या अनुप्रयोगदृष्ट्या च गद्यपद्योभयात्मकचम्पूकाव्य-परिचयाय पञ्चमखण्डः सङ्कल्पितः।

तेनैव क्रमेण गद्यपद्यात्मकचम्पूकाव्यसरणेः अनुसारं श्रव्यकाव्यनिरूपणानन्तरं दृश्यकाव्यपरिचयाय संस्कृतसाहित्ये प्रसिद्धानां महानाटकानां पञ्चानां परिचयार्थं षष्ठखण्डः अनुकल्पितः।

एवं लक्ष्येषु (उदाहरणेषु) श्रव्यदृश्यकाव्यपरिचयानन्तरं तेषां विषये काव्य-शास्त्रतत्त्वचिन्तकानाम् अलङ्कारशास्त्रस्य आचार्याणां परिचयार्थं सप्तमखण्डः विकल्पितः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत्तदाचार्याणां मतानुसारेण काव्यशास्त्रस्य सारभूततत्त्वानां प्रपञ्चनाय काव्यप्रमेयविषयाः इति अष्टमखण्डः उपकल्पितः।

तथा अष्टखण्डात्मके साहित्यशास्त्रप्रवेशिनीनामके अस्मिन् ग्रन्थे त्रयस्त्रिंशत्पाठाः समायोजिताः। अस्य ग्रन्थस्य अनुप्रयोगविषये छात्राध्यापकचर्या-सम्बन्धिसूचनाः प्रदत्ताः। तत्सूचनानुसारं प्रतिपाठम् अवधेयांशाः, अभ्यासाः, परियोजना अपि सूचिताः।

तदनुसारम् अध्यापकाः बोधयेयुः, छात्राः अनुसरेयुः। अस्याः पाठ्यपुस्तिकायाः सम्पादने संरचने च कृताः प्रयत्नाः नवनवायमाना विहिता भवन्ति।

ग्रन्थोऽयं प्रथमस्तरीयपाठ्यपुस्तकरूपेण निर्णेतव्य इति अधिकारिभ्यः प्राध्यापकेभ्यश्च निवेदनम्।

सन्दर्भे अस्मिन् साहित्ये प्रथमस्तरीयाणां छात्राणां प्रेरणाय एतस्य ग्रन्थस्य लेखनविषये शिवसङ्कल्पं कृत्वा अस्मान् निर्दिष्टवद्भ्यः राष्ट्रिय-संस्कृत-विद्यापीठस्य कुलपतिभ्यः आचार्य **विरिवेण्टि मुरलीधरशर्म**महाभागेभ्यः धन्यवादाः वितीर्यन्ते।

विभिन्नचर्चासु समागतान् अंशान् बिन्दुशः अनुप्रयुज्य अष्टखण्डात्मिकां त्रयस्त्रिंशत्पाठात्मिकां साहित्यशास्त्रप्रवेशिनीं संरच्य बहुधा मां सन्दर्श्य संशोध्य च निरतप्रयासरताय मम शिष्यवराय शोधविभागसहायकाचार्याय आयुष्मते **नागराज**वर्याय साधुवादाः।

राष्ट्रियसंस्कृतविद्यापीठशोधविभागाध्यक्षेभ्यः आचार्येभ्यः **कोराड.-सूर्यनारायण**महोदयेभ्यः प्रकाशनसमितेः अध्यक्षसदस्येभ्यः, वित्ताधिकारिभ्यः, अनुमोदितवद्भ्यः महामन्येभ्यः कुलपतिभ्यश्च भूयो भूयो धन्यवादान् वितीर्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इतोऽधिकं प्रोत्साहनं कार्यकौशलञ्च प्रदातुं भगवन्तं शेषाचलाधिनाथं वेङ्कटनाथं मनसा वचसा कायेन च सम्प्रार्थ्य वचो विरिरंसुः विरमामि न कार्यादिति प्रतिज्ञायते।

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

आचार्य.जी.एस्.आर्.कृष्णमूर्तिः
सम्पादकः

स्वस्तिश्रीविलम्बिकार्त्तिकपूर्णिमा
२३.११.२०१८

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुरोवाक्

'संस्कृतं नाम दैवीवाक् अन्वाख्याता महर्षिभिः'

अनेन वचनेन संस्कृतस्य भाषापरम्परायाः अत्यन्तं महोन्नतं चरित्रमस्तीति ज्ञायते। यतो हि संस्कृतभाषा ज्ञानेन विज्ञानेन च समृद्धा, ऋषिभिः महापुरुषैः च नित्यजीवने अनुप्रयुक्ता, अतीव दिव्या मङ्गलमयी च वर्तते। मनुष्यजीवनस्य सर्वोत्कृष्टं लक्ष्यं संस्कृतस्य अध्ययनेन एव साधयितुं शक्यते। या विश्वबन्धुभावना पवित्रज्ञानपरम्परा च संस्कृतस्य वर्तते, तादृशी परम्परा अस्मिन् जगति अन्यस्याः भाषायाः नास्तीति कथने कापि अतिशयोक्तिः नास्ति। संस्कृतज्ञानस्य मूलाधारभूतानि शास्त्राणि एव सन्ति। संस्कृते व्याकरणशास्त्रं, न्यायशास्त्रं, ज्योतिश्शास्त्रम् इत्यादीनि बहूनि शास्त्राणि सन्ति। सर्वादौ एतस्य शास्त्रस्य किं वा स्वरूपमिति ज्ञातुम् अनेन श्लोकेन प्रयत्नं कुर्मः।

शास्त्रस्य स्वरूपम् -

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुंसां येनोपदिश्येत तत् शास्त्रमभिधीयते ।।

मनुष्यस्य सार्वकालिकं हितं साधयितुं शाश्वतानाम् उपायानां, कदाचित् पाक्षिकाणाम् उपायानां वा बोधकमेव शास्त्रं भवति। अतः शास्त्रं सर्वकालेषु सर्वावस्थासु च मनुष्यस्य मुख्यं शाश्वतहितसाधकम् अस्तीति वयं एतावता ज्ञातवन्तः। एकैकम् अपि शास्त्रं न केवलं मनुष्यस्य अपि तु सर्वेषां प्राणिनां हितसाधनार्थं नूतन-नूतनविचारान् समुपस्थापयति। अन्ततः गत्वा सर्वाणि अपि शास्त्राणि लोककल्याण-कारकाणि इत्येव सत्यम्। अस्यां परम्परायां साहित्यशास्त्रमपि स्वीयेन सुललित-मधुरोपदेशेन सर्वानपि प्राणिनः भृशम् उपकरोति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रस्तुतपुस्तकस्य आवश्यकता

साहित्यशास्त्रस्य एतावत्कालपर्यन्तं विद्यमानेषु ग्रन्थेषु कवीनां परिचये आचार्याणां परिचये वा एवमन्येषु बहुष्वपि विषयेषु अत्यन्तं सुदीर्घाः विचाराः सन्ति। अस्मिन् शास्त्रे प्रथमतया प्रविविक्षूणां छात्राणाम् एते दीर्घविचाराः क्लेशं जनयन्ति। अतः तेषां सुखेन अवगमनार्थं यथाशक्ति अस्मिन् ग्रन्थे सर्वेषामपि विषयाणां वादविवादं विना अतीव सरलेन संक्षिप्तेन च संवादेन उपस्थापनं कृतम्।

अयं ग्रन्थः साहित्यशास्त्रे प्राथमिकान् छात्रान् अध्येतॄन् च प्रधानतया दृष्टौ निधाय विरचितः इति कारणात् अस्मिन् ग्रन्थे विषयाणां सरलप्रतिपादनेन सह तेषां धारणार्थमपि अत्यन्तम् उपयुक्ताः नैकविधाः अभ्यासाः परिकल्पिताः सन्ति। एतेषाम् अभ्यासानां माध्यमेन अधीतविषयस्य सुदृढं स्मरणं निश्चयेन भवति। मनोविज्ञानदृष्ट्या विषयस्य झटिति बुद्धौ धारणार्थम् अस्मिन् ग्रन्थे केचन उपायाः समुपाश्रिताः सन्ति। ते यथा - प्रत्येकं पाठस्य प्रारम्भे एव तत्तत्पाठस्य अध्ययनेन, तत्र चर्चितस्य विषयस्य ज्ञानेन वा अस्माकम् अवश्यम् अपेक्षितानि प्रयोजनानि उक्तानि।

अनन्तरं पाठः अत्यन्तं सरलेन सुखजनकेन संवादेन अनेकैः उपयुक्तैः रेखाचित्रैः मञ्जूषाभिः च सह उपस्थापितः।

पाठसमापनानन्तरं तस्मिन् पाठे अवश्यम् अवधेयानाम् अंशानां क्रमेण उपस्थापनं कृतम्।

तदनन्तरं विषयस्य धारणार्थम् उपयुक्ताः नैकविधाः अभ्यासाः संरचिताः सन्ति। अभ्यासानाम् अनन्तरं तत्तत्पाठसम्बन्धि इतोऽधिकं ज्ञानं समुपार्जयितुं उपयुक्ताः परियोजनाः अपि सूचिताः सन्ति। तासां परियोजनानां माध्यमेन छात्रः अस्य शास्त्रस्य विस्तृतज्ञानवान् भवत्येव।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कृतज्ञतासमर्पणम्

कौलपत्यविभूत्या यः समवर्ती समानयम् ।
एधयंस्तोषयंस्तैस्तैर्हेतुभिः सुखमेधते ।।

सर्वतोमुखकल्याणभावभासुरमानसः ।
कुलसाचिव्यलक्ष्मीकः शोभते कालिदासवत् ।

भद्रया मुद्रणाकृत्या निजवैदग्ध्यरोचिषा ।
भ्राजिष्णुरेधतां नित्यमाचारी वेङ्कटोत्तरः ।।

दोषोत्सर्गपुरस्कारिवर्णविन्यासचातुरीम् ।
आवहन् विन्दताद्रामः शश्वत्सारस्वतं महः ।।

अनुल्लिखितनामानो येऽन्ये मे हितमीप्सवः ।
सुहृदः समधर्माणो स्मर्यन्तेऽजस्रमात्मनि ।।

अध्यापकानां कृते निवेदनम्

- तत्तत्पाठस्य अध्यापनकाले शिक्षकः अतीव रोचकेन उपोद्घातेन पाठस्य विषयपरिचयं कारयतु।
- पाठेषु विद्यमानानां कठिनपदानां सम्यक् विवरणं कृत्वा तस्य पदस्य प्रयोगेण कतिचित् स्वीयवाक्यानि अपि वाचयतु।
- पाठानाम् अन्ते प्रदत्तानाम् अभ्यासानाम् विषये छात्रैः सह अध्यापकः संवादं करोतु।
- अपेक्षितस्थलेषु नूतनान् अभ्यासान् अपि परिकल्प्य छात्राणां जिज्ञासां वर्धयतु।
- परियोजनानां विषये छात्रेभ्यः सम्यक् परिचयं दत्त्वा, तत्र सूचितविषयाणां संग्रहार्थम् अपेक्षितसामग्रीविषयेऽपि समाचारं ददातु।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

छात्राणां कृते सूचनाः

- अध्यापकस्य मार्गदर्शने छात्राः पाठस्य सर्वानपि विषयान् सम्यक् ज्ञातुं प्रयत्नं कुर्युः।
- यत्र कुत्रापि ये केचित् संशयाः उत्पन्नाश्चेत् तेषां संशयानां निवारणार्थं विषयविशेषज्ञानां साहाय्यं स्वीकुर्युः।
- पाठान्ते प्रस्तुतानाम् अभ्यासान्तर्गतप्रश्नानां समाधानं सम्यक् विचिन्त्य श्रद्धया दद्युः।
- अस्मिन् शास्त्रे समधिकज्ञानं प्राप्तुं सर्वैः छात्रैः सर्वाः अपि परियोजनाः श्रद्धया करणीयाः।

विबुधाश्रवः

नागराजः

डा.सीहेचू.नागराजु

स्वस्तिश्रीविलम्बि-कार्त्तिक-पूर्णिमा

२३.११.२०१८

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विषयानुक्रमणिका

प्रवेशिनीमुद्दिश्य किञ्चित् ...		vi
सम्पादकीयम्		x
पुरोवाक्		xiv
विषयानुक्रमणिका		xviii

पाठक्रमः	विषयः	पुटसंख्या
	प्रथमखण्डः (साहित्यशास्त्रपरिचयः)	
प्रथमः पाठः	साहित्यशास्त्रं नाम किम्?	2
	द्वितीयखण्डः (इतिहासपुराणानि)	
द्वितीयः पाठः	आदिकाव्यं रामायणम्	11
तृतीयः पाठः	महाभारतम्	18
चतुर्थः पाठः	पुराणानि	26
	तृतीयखण्डः (पञ्चमहाकाव्यानि)	
पञ्चमः पाठः	रघुवंशम्	34
षष्ठः पाठः	कुमारसम्भवम्	41

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाठक्रमः	विषयः	पुटसंख्या
सप्तमः पाठः	किरातार्जुनीयम्	47
अष्टमः पाठः	शिशुपालवधम्	52
नवमः पाठः	नैषधीयचरितम्	58
	चतुर्थखण्डः (गद्यकाव्यानि)	
दशमः पाठः	दशकुमारचरितम्	65
एकादशः पाठः	कादम्बरी	71
	पञ्चमखण्डः (चम्पूकाव्यानि)	
द्वादशः पाठः	नलचम्पूः	78
त्रयोदशः पाठः	विश्वगुणादर्शचम्पूः	83
	षष्ठखण्डः (पञ्चमहानाटकानि)	
चतुर्दशः पाठः	स्वप्नवासवदत्तम्	89
पञ्चदशः पाठः	अभिज्ञानशाकुन्तलम्	94
षोडशः पाठः	उत्तररामचरितम्	99
सप्तदशः पाठः	वेणीसंहारम्	104
अष्टादशः पाठः	मुद्राराक्षसम्	108

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाठक्रमः	विषयः	पुटसंख्या
	सप्तमखण्डः	
	(अलङ्कारशास्त्रस्य आचार्याः)	
एकोनविंशः पाठः	भरतमहर्षिः	113
विंशः पाठः	व्यासमहर्षिः	117
एकविंशः पाठः	भामहाचार्यः	120
द्वाविंशः पाठः	आचार्यः दण्डी	123
त्रयोविंशः पाठः	उद्भटाचार्यः	127
चतुर्विंशः पाठः	वामनाचार्यः	130
पञ्चविंशः पाठः	रुद्रटाचार्यः	133
	अष्टमखण्डः	
	(काव्यप्रमेयविषयाः)	
षड्विंशः पाठः	काव्यप्रयोजनानि	136
सप्तविंशः पाठः	काव्यकारणानि	141
अष्टाविंशः पाठः	काव्यलक्षणम्	145
एकोनत्रिंशः पाठः	काव्यभेदाः	149
त्रिंशः पाठः	रसाः	153
एकत्रिंशः पाठः	अलङ्काराः	157
द्वात्रिंशः पाठः	रीतयः	160
त्रयस्त्रिंशः पाठः	वृत्तयः	164

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथमखण्डः

साहित्यशास्त्रपरिचयः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथमः पाठः

साहित्यशास्त्रं नाम किम्?

प्रयोजनानि -

⇨ साहित्यशास्त्रस्य स्वरूपं किमिति स्पष्टतया अस्मिन् पाठे प्रस्तुतं वर्तते।

⇨ साहित्यशास्त्रे केषां विषयाणां विचारः भवति इति अनेन पाठेन जानीमः।

⇨ अस्मिन् शास्त्रे के सम्प्रदायाः काव्यतत्त्वपरामर्शने आचार्यैः प्रस्तुताः इत्यपि जानीमः।

पाठारम्भः -

साहित्यशास्त्रं नाम किम्?

अयि च्छात्राः! प्रस्तुतपुस्तके अनेकेषां कवीनां काव्यानाम् आचार्याणां च सम्यक् परिचयं समनन्तरं वयं प्राप्स्यामः। एते सर्वेऽपि कवयः आचार्याश्च साहित्यशास्त्रस्य एव प्रवर्तकाः परिपोषकाश्च सन्ति। अतः आदौ साहित्यशास्त्रं नाम किम्? इति अस्माकं प्रश्नः जायते। तस्यैव समाधानं वयमत्र जानीमः।

"समष्टिः सर्वशास्त्राणां साहित्यमिति कथ्यते।"

संस्कृतस्य सर्वेषु अपि शास्त्रेषु ये ये सारभूताः विषयाः सन्ति, तेषां सारभूतविषायाणां संग्रहरूपमेव साहित्यं भवति इति एतस्य वाक्यस्य अभिप्रायः।

मानवस्य अत्यन्तम् उपकारकाणि जीवनमूल्यानि साहित्यम् अतीव सरलेन सुन्दरेण प्रकारेण बोधयतीति कारणादेव एतत् साहित्यशास्त्रमिति पण्डितानां निश्चयः। अतः **'रामादिवत् वर्तितव्यं न तु रावणादिवत्'** (रामः यथा धर्माचरणं कृतवान् तथैव करणीयम्, रावणस्य इव अधर्माचरणं कदापि न करणीयम्।) इति एतदेव लक्ष्यम् आधारीकृत्य सर्वाणि अपि काव्यानि नाटकानि च रचितानि सन्ति। एवमेतादृशकाव्यानां नाटकानाञ्च अध्ययनं श्रेयस्कामिना सर्वेण अपि छात्रेण अवश्यं करणीयम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

साहित्यशास्त्रस्य पर्यायवाचकाः शब्दाः -

अस्य शास्त्रस्य पूर्वकालादारभ्य अधुनातनकालपर्यन्तं सामान्यव्यवहारे अनेके पर्यायवाचकाः शब्दाः दृश्यन्ते श्रूयन्ते च। ते यथा -

१. काव्यशास्त्रम्, २. साहित्यशास्त्रम्, ३. सौन्दर्यशास्त्रम्,
४. अलङ्कारशास्त्रम्, ५. क्रियाकल्पः, ६. सहृदयशास्त्रम्।

एतेषां पर्यायवाचकानां शब्दानां विषये किञ्चित् चिन्तनमपि कुर्मः।

१. काव्यशास्त्रम् -

काव्यस्य स्वरूपं ज्ञापयितुम् उद्दिष्टं शास्त्रमिति कारणात् एतत् काव्यशास्त्रमिति पण्डितानाम् आशयः।

२. साहित्यशास्त्रम् -

'शब्दार्थौ सहितौ काव्यम्' इति अनेन निर्वचनेन शब्दार्थयोः सहभावः एव साहित्यम् इति निश्चितं पण्डितैः। सहितयोः शब्दार्थयोः भावः एव साहित्यम् इति पर्यवसितम्।

३. सौन्दर्यशास्त्रम् -

काव्ये अतीव मनोहराणि सुन्दराणि च वर्णनानि भवन्ति। अतः तादृशसुन्दराणां वर्णनानां परिशीलनपरकं शास्त्रमिति कारणात् एतत् सौन्दर्यशास्त्रमिति निर्धारितम्।

४. अलङ्कारशास्त्रम् -

काव्ये मुख्यतया सौन्दर्यजनकाः अलङ्काराः एवेति कारणात् तादृशानां सौन्दर्यबोधकानाम् अलङ्काराणां निरूपणपरकं शास्त्रमिति कारणाच्च एतत् अलङ्कारशास्त्रं भवितुमर्हति।

५. क्रियाकल्पः -

रामायणकाव्ये ललितविस्तरग्रन्थे च क्रियाकल्पः इति पदं साहित्यशास्त्रस्य पर्यायवाचकत्वेन प्रयुक्तमस्तीति केचन आचार्याः अभिप्रयन्ति। परन्तु अयं विचारः एतावता सर्वेषां सम्मतः नास्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६. सहृदयशास्त्रम् -

कविहृदयेन सह समानहृदयाः ये भवन्ति ते एव सहृदयाः इति उच्यन्ते। तादृशानां सहृदयानाम् एव अत्यन्तम् आस्वादनयोग्यं शास्त्रमिति कारणात् एतत् सहृदयशास्त्रं भवितुमर्हति।

साहित्यशास्त्रे चर्चिताः विषयाः

काव्यस्य शोभाजनकानां सर्वेषामपि तत्त्वानाम् अतीव सूक्ष्मदृष्ट्या गम्भीरेण तर्केण च अस्मिन् शास्त्रे विचारः कृतः वर्तते। तानि च शोभाजनकानि तत्त्वानि एवं सन्ति। यथा -

अलङ्कारः, गुणः, रीतिः, वृत्तिः, शय्या, पाकः, ध्वनिः, रसः, वक्रोक्तिः, औचित्यं च

इत्यादीनि काव्यस्य अनेकानि तत्त्वानि सन्ति। एतेषां सर्वेषामपि विषये अग्रे वयं सम्यक् ज्ञानं प्राप्स्यामः।

षट् सम्प्रदायाः -

काव्यस्य शोभाजनकेषु अलङ्कारादित्त्वेषु केचन आचार्याः केवलम् अलङ्कारः एव काव्यस्य शोभां जनयति इति, अन्यानि सर्वाणि तत्त्वानि अलङ्कारस्य परिपोषकाणि इति मन्यन्ते। एवमेव अन्ये रीतिम्, अपरे रसं काव्यस्य प्रधानतया शोभाजनकत्वेन अङ्गीकृत्य इतराणि सर्वाणि अपि तत्त्वानि तस्य परिपोषकत्वेन मन्यमानाः स्वीयान् नवीनान् सिद्धान्तान् समुपस्थापितवन्तः। अनेन क्रमेण साहित्यशास्त्रे षट् सम्प्रदायाः प्रसिद्धतया प्रवर्तिताः श्रूयन्ते। ते यथा -

षट् सम्प्रदायाः
१. रससम्प्रदायः
२. अलङ्कारसम्प्रदायः
३. रीतिसम्प्रदायः
४. ध्वनिसम्प्रदायः
५. वक्रोक्तिसम्प्रदायः
६. औचित्यसम्प्रदायः

एतेषां सम्प्रदायाणां विषये किञ्चित् जानीमः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रससम्प्रदायः - काव्यशास्त्रे रससम्प्रदायस्य प्रवर्तकः **भरतमुनिः** वर्तते। सः स्वीय**नाट्यशास्त्र**-ग्रन्थस्य षष्ठाध्याये रसपरकं विपुलं विचारं प्रस्तुतवान्। अस्य मते नाट्यस्य अथवा काव्यस्य परिपूर्णशोभायाः हेतुः रसः एकः एव भवितुम् अर्हति। अन्यानि अलङ्कारादितत्त्वानि सर्वाणि अपि तस्यैव रसस्य केवलं परिपोषकाणि भवन्ति इति निश्चयः।

अलङ्कारसम्प्रदायः - अस्य सम्प्रदायस्य प्रवर्तकः आचार्यः **भामहः** वर्तते। सः स्वीय-**काव्यालङ्कार**नामके ग्रन्थे अलङ्कारान् सम्यक् निरूप्य, ते एव काव्यस्य शोभाकारकाः इति, अन्यानि सर्वाणि अपि तस्यैव अलङ्कारस्य उपोद्बलकानि इति स्वीयमतम् आविष्करोति। एतेन अलङ्कारः काव्यस्य सौन्दर्यजनकः इति निश्चयः जायते।

रीतिसम्प्रदायः - अस्य सम्प्रदायस्य प्रवर्तकः **वामनाचार्यः** वर्तते। अयं स्वीय**काव्यालङ्कारसूत्र**-नामके ग्रन्थे **'रीतिरात्मा काव्यस्य'** इत्यनेन सूत्रेण काव्यस्य आत्मा रीतिः एव भवितुमर्हति इति निश्चयं कृतवान्। गुणाः अलङ्काराः इत्यादयः सर्वे अपि तस्याः एव रीतेः सहायकाः भूत्वा काव्यस्य शोभां वर्धयन्ति इति उक्तवान्।

ध्वनिसम्प्रदायः - काव्यशास्त्रे विद्यमानेषु सम्प्रदायेषु ध्वनिसम्प्रदायः अतीव सुप्रसिद्धः सन् सर्वमान्यः वर्तते। अस्य सम्प्रदायस्य प्रवर्तकः महामनीषी **आचार्यः आनन्दवर्धनः** अस्ति। सः **ध्वन्यालोक**नामके स्वीयसिद्धान्तग्रन्थे स्वमतम् एवम् उपस्थापयति। यथा - यस्मिन् काव्ये ध्वनिः प्रधानः भवति तत् उत्तमं काव्यम् इति, यत्र ध्वनिः अप्रधानः अस्ति तत् मध्यमं काव्यम् इति, यत्र ध्वनिः एव नास्ति तत् अधमं काव्यम् इति। एवंविधेन सूक्ष्मविचारेण आचार्यः ध्वनिसिद्धान्तस्य उपस्थापनम् कृतवान्।

वक्रोक्तिसम्प्रदायः - अस्य सम्प्रदायस्य प्रवर्तकः आचार्यः **कुन्तकः** वर्तते। अयं स्वीय **वक्रोक्तिजीवित**नामके ग्रन्थे काव्यस्य सारभूतः तत्त्वविशेषः वक्रोक्तिः एव अस्ति इति, तया एव वक्रोक्त्या काव्यस्य प्राणप्रतिष्ठा जायते इति सूक्ष्मं चिन्तनं कृतवान्।

औचित्यसम्प्रदायः - अस्य सम्प्रदायस्य प्रवर्तकः **आचार्यः क्षेमेन्द्रः** वर्तते। अयं स्वीये **औचित्यविचारचर्चा**नामके ग्रन्थे, यद्यपि रसादयः काव्यस्य शोभाजनकाः भवन्ति, तथापि औचित्यं विना रसादीनाम् अपि आह्लादकत्वं नास्ति इति उक्त्वा **'औचित्यं रससिद्धस्य काव्यस्य स्थिरं जीवितम्'** इति स्वीयमतं प्रकटितवान्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एतेषां साहित्यशास्त्रे प्रसिद्धानां षण्णां सम्प्रदायानां विषये अधः मञ्जूषामाध्यमेन सम्यक् ज्ञातुं शक्नुमः।

सम्प्रदायाः	प्रवर्तकाः	ग्रन्थाः
रससम्पदायः	भरतमुनिः	नाट्यशास्त्रम्
अलङ्कारसम्प्रदायः	भामहः	काव्यालङ्कारः
रीतिसम्प्रदायः	वामनः	काव्यलङ्कारसूत्रम्
ध्वनिसम्प्रदायः	आनन्दवर्धनः	ध्वन्यालोकः
वक्रोक्तिसम्प्रदायः	कुन्तकः	वक्रोक्तिजीवितम्
औचित्यसम्प्रदायः	क्षेमेन्द्रः	औचित्यविचारचर्चा

एवं साहित्यशास्त्रस्य अध्ययनेन अस्माकं पूर्वजानां संस्कृतिसम्प्रदायादिविषये अभिज्ञानेन सह अनेकेषां वैज्ञानिकविषयाणां चिन्तनार्थम् अपि कश्चन अवसरः अवश्यं प्राप्यते।

अवधेयांशाः -

- संस्कृतशास्त्रेषु सारभूतानां सर्वेषामपि विषयाणां साहित्यं सङ्ग्रहात्मकं भवति।
- सहितयोः शब्दार्थयोः भावः एव साहित्यम्।
- काव्यशास्त्रं, साहित्यशास्त्रं, सौन्दर्यशास्त्रम् इत्यादयः षट् पर्यायवाचकशब्दाः अस्य शास्त्रस्य सन्ति।
- काव्यतत्त्वेषु किं तत्त्वं काव्यस्य शोभाजनने प्रधानं भवेत् इति विचारे षट् सम्प्रदायाः सन्ति।
- अस्मिन् शास्त्रे विद्यामानेषु सम्प्रदायेषु ध्वनिसम्प्रदायः अतीव प्रसिद्धः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. 'रामादिवत् वर्तितव्यं न तु रावणादिवत्' इत्यस्य वाक्यस्य अभिप्रायः कः?

२. साहित्यशास्त्रस्य पर्यायवाचकाः शब्दाः के?

३. साहित्यशास्त्रं नाम किम्?

४. क्रियाकल्पः नाम कः?

५. साहित्यशास्त्रे के के सम्प्रदायाः सन्ति?

(II) रिक्तस्थानानि पूरयत।

१. समष्टिः सर्वशास्त्राणां _____ इति कथ्यते।

२. काव्यस्य स्वरूपं ज्ञापयितुम् उद्दिष्टं _____ शास्त्रं वर्तते।

३. काव्यस्य मुख्यतया _____ सौन्दर्यजनकाः सन्ति।

४. शब्दार्थौ _____ काव्यम्।

५. रससम्प्रदायस्य प्रवर्तकः _____ ।

(III) समीचीनमुत्तरं चिनुत।

१. कविहृदयेन समानहृदयाः एते भवन्ति। ( )

(क) सुहृदयाः (ख) सहृदयाः

(ग) संहृदयाः (घ) विहृदयाः

२. साहित्यशास्त्रे चर्चितेषु विषयेषु अयं नास्ति। ( )

(क) वृत्तिः (ख) रसः

(ग) ध्वनिः (घ) अध्यासः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. षट्सु सम्प्रदायेषु प्रसिद्धः सम्प्रदायः कः? ( )

(क) ध्वनिसम्प्रदायः (ख) रससम्प्रदायः

(ग) रीतिसम्प्रदायः (घ) वक्रोक्तिसम्प्रदायः

४. अलङ्कारसम्प्रदायस्य प्रवर्तकः कः? ( )

(क) भरतः (ख) वामनः

(ग) भामहः (घ) कुन्तकः

५. कुन्तकाचार्यस्य काव्यशास्त्रग्रन्थः कः? ( )

(क) रसजीवितम् (ख) वक्रोक्तिजीवितम्

(ग) गुणजीवितम् (घ) ध्वनिजीवितम्

(IV) परस्परं योग्यं योजयत।

१. समष्टिः सर्वशास्त्राणां	आनन्दवर्धनः	( )
२. रामादिवत् वर्तितव्यं	औचित्यसम्प्रदायप्रवर्तकः	( )
३. ध्वनिसम्प्रदायः	साहित्यमिति कथ्यते	( )
४. क्षेमेन्द्रः	काव्यशास्त्रस्य पर्यायवाचकः शब्दः	( )
५. क्रियाकल्पः	न तु रावणादिवत्	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. प्रवृत्तिः -

२. शास्त्रम् -

३. समष्टिः -

४. गुणः -

५. औचित्यम् -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(VI) लघुनिबन्धं रचयत।

१. साहित्यशास्त्रं नाम किम्?

२. साहित्यशास्त्रस्य पर्यायवाचकशब्दानां विवरणं कुरुत।

३. साहित्यशास्त्रे चर्चिताः विषयाः के?

(VII) विस्तरेण निबन्धं रचयत।

१. साहित्यशास्त्रस्य समग्रं परिचयं कुरुत।

२. साहित्यशास्त्रे प्रसिद्धानां षण्णां सम्प्रदायानां परिशीलनं कुरुत।

परियोजना

१. काव्यशास्त्रं प्राचीनम् इत्यत्र प्रमाणानि सङ्कलयत।

२. काव्यानाम् उद्भवं विकासं च अधिकृत्य निबन्धं रचयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयखण्डः

इतिहासपुराणानि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयः पाठः

आदिकाव्यं रामायणम्

प्रयोजनानि -

⇨ एतस्य पाठस्य अध्ययनेन लौकिकसंस्कृतवाङ्मये अतीव प्रसिद्धस्य रामायणग्रन्थस्य सम्यक् परिचयं प्राप्नुमः।

⇨ अस्माकं देशस्य संस्कृतौ सभ्यतायाम् आचारविचारेषु च रामायणस्य कीदृशः दृढः प्रभावः वर्तते इत्यपि जानीमः।

⇨ मनुष्यजीवने सदाचारस्य प्राधान्यं श्रीरामचन्द्रस्य व्यवहारेण वयं ज्ञातुं प्रभवामः।

पाठारम्भः -

अयि छात्राः! लौकिकसंस्कृतवाङ्मये उपलभ्यमानेषु काव्येषु सर्वादिमं महाकाव्यं रामायणमिति कारणात् एतद् **आदिकाव्यम्** इति सुप्रसिद्धम्। एतस्य रचयिता वाल्मीकिमहर्षिः अपि **आदिकविः** इति लोके ख्यातिं प्राप्तवान्।

एतस्य रामायणकाव्यस्य आविर्भावसम्बद्धं वृत्तान्तमधुना जानीमः।

एकदा वाल्मीकिमहर्षिः शिष्येण भरद्वाजेन सह तमसानदीतीरं गतवान्। तत्र परितः विद्यमानं सुन्दरं वनप्रदेशं पश्यन् विहरति स्म। तस्मिन्नेव समये कस्यांश्चित् वृक्षशाखायां क्रौञ्चपक्षिमिथुनम् (स्त्रीक्रौञ्चीं पुरुषक्रौञ्चं च) अतीव प्रेमानुरागेण वर्तमानं दृष्टवान्। तदन्तरे कश्चन क्रूरः निषादः तयोः पक्षिणोः मध्ये पुरुषपक्षिणं बाणेन मारितवान्। मृतं क्रौञ्चं दृष्ट्वा क्रौञ्ची अतीव शोकपरितप्ता जाता। तदा क्रौञ्च्याः वेदनां पश्यतः महर्षेः मनसि महान् शोकः उत्पन्नः। तदा एव तस्य मुखात् अप्रयत्नेन कश्चन श्लोकोऽपि निर्गतः। यथा-

मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अयमेव लोके संस्कृतवाङ्मयस्य प्रवर्तकः **आदिमश्लोकः** सञ्जातः।

चतुर्भिः पादैः सुन्दरेण पदविन्यासेन युक्तम् एतं श्लोकं श्रुत्वा वाल्मीकिना सह शिष्याः अपि अतीव विस्मिताः जाताः। एतदन्तरे ब्रह्मदेवः आगत्य महता सन्तोषेण श्रीरामस्य चरित्रवर्णनं करोतु इति महर्षिम् आदिष्टवान्। तमेव आदेशं पालयन् वाल्मीकिः रामायणकाव्यं रचितवान्।

महातपस्सम्पन्नस्य दीर्घदर्शिनः जगतः हितकाङ्क्षिणः वाल्मीकिमहर्षेः स्तुतिपरकानि श्लोकरत्नानि बहूनि सन्ति। तेषु एतमेकं श्लोकं वयं जानीमः।

योगीन्द्रश्छन्दसां स्रष्टा रामायणमहाकविः।
वल्मीकजन्मा जयति प्राच्यः प्राचेतसो मुनिः।।

योगिषु श्रेष्ठः, लोके समाक्षराणां श्लोकवृत्तानां प्रथमविज्ञाता, रामायणमहाकाव्यस्य निर्माता, वल्मीकाद् जातः, प्रचेतोमहर्षेः पुत्रः, पुरातनः अयं वाल्मीकिमहर्षिः सदा विजयताम् इति अस्य श्लोकस्य भावः।

एवं सुललितसुन्दरश्लोकविराजिते अस्मिन् रामायणमहाकाव्ये सप्तकाण्डानि सन्ति। तानि -

सप्तकाण्डानि

१. बालकाण्डम्
२. अयोध्याकाण्डम्
३. अरण्यकाण्डम्
४. किष्किन्धाकाण्डम्
५. सुन्दरकाण्डम्
६. युद्धकाण्डम्
७. उत्तरकाण्डम्

एकैकस्मिन् काण्डे केचन सर्गाः सन्ति। सम्पूर्णरामायणे पञ्चचत्वारिंशदधिकषट्शतं (६४५) सर्गाः सन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गायत्रीमन्त्रे चतुर्विंशतिवर्णाः भवन्ति। तेषु एकैकमपि वर्णं स्वीकृत्य प्रतिसहस्रश्लोकं प्रथमश्लोकस्यादौ कविः प्रयुक्तवान् इत्यतः रामायणे चतुर्विंशतिसहस्रं श्लोकाः (२४,०००) सन्ति। अत एव रामायणस्य **"चतुर्विंशतिसाहस्री संहिता"** इति अपरं नाम जातम्।

श्रीरामचन्द्रः त्रेताद्वापरयुगयोः सन्धिकाले आसीत् इति रामायणपरिशीलनेन ज्ञायते। अतः विक्रमशकस्य प्रायः ५२०० वर्षेभ्यः पूर्वमेव रामायणस्य रचना तस्य प्रसिद्धिः अपि जाता इति विमर्शकाः वदन्ति।

यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।
तावद्रामायणकथा लोकेषु प्रचरिष्यति।।

अस्मिन् भूमण्डले पर्वताः नद्यः यावत्पर्यन्तं स्थिरतया भविष्यन्ति, तावत्पर्यन्तं रामायणकथा इयं लोके सुप्रतिष्ठिता भविष्यति।

रामायणं सदाचारस्य सद्गुणानां भारतीयसंस्कृतिसभ्यतानां च आदर्शभूतः ग्रन्थविशेषः वर्तते। अत्र दशरथे रामस्य पितृभक्तिः, रामादिषु (लक्ष्मणभरतशत्रुघ्नेषु) दशरथस्य पुत्रवात्सल्यम्, आञ्जनेयस्य रामं प्रति स्वामिभक्तिः, रामस्य प्रजासु अनुरञ्जनम्, लक्ष्मणभरतशत्रुघ्नेषु रामस्य अव्याजः भ्रातृस्नेहः इत्यादीनि नैकविधानि मानवजीवनोपकारकाणि मूल्यानि अभिवर्णितानि सन्ति। **"रामो विग्रहवान् धर्मः", "रामः सत्यपराक्रमः"** इत्यादिवचनैः धर्मस्य सत्यस्य च मूर्तिमान् साक्षाद् "रामः" इति निश्चयः जायते। "अधर्मस्य उपरि धर्मस्य विजयः" इत्येव रामायणस्य मुख्यं तत्त्वमस्ति।

सुखसमृद्धिभिः ऐश्वर्येण च विलसितं धर्मप्रधानं 'रामराज्यमि'ति अस्माभिः ज्ञातमेव। श्रीरामचन्द्रे प्रजानां, प्रजासु श्रीरामचन्द्रस्य परस्परप्रीतिं ज्ञापयन्तं श्लोकमेतं पश्यामः।

यश्च रामं न पश्येत्तु यं च रामो न पश्यति।
निन्दितस्स जनो लोके स्वात्माप्येनं विगर्हते।।

रामराज्ये यः कोऽपि रामं न पश्यति चेत् सः स्वयमात्मनि दुःखितः भवति। एवं रामोऽपि यं कमपि जनं न पश्यति चेत् दुःखमनुभवति।

अस्मिन् काव्ये सूर्यवंशचक्रवर्तिनां दिलीप-रघु-दशरथादीनां चरित्रेण सह मुख्यतया श्रीरामस्य पुण्यचरितम् अभिवर्णितम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एवम् आदर्शधार्मिकजीवनमूल्यैः विभूषितं रामायणम् आधारीकृत्य किञ्चित् कथापरिवर्तनेन रचिताः रामायणग्रन्थाः अन्येऽपि केचन दृश्यन्ते। तेषु योगवाशिष्ठम्, अध्यात्मरामायणम्, अद्भुतरामायणम्, आनन्दरामायणमिति प्रसिद्धाः सन्ति। रामायणकथाम् आश्रित्य बहूनि काव्यानि, नाटकानि च वाङ्मयप्रपञ्चे सन्ति। तानि वयमग्रे ज्ञास्यामः।

अवधेयांशाः -

- संस्कृतवाङ्मये आदिकविः वाल्मीकिः, आदिकाव्यं रामायणम्।
- अस्मिन् काव्ये सूर्यवंशीयचक्रवर्तिनां दिलीपरघुदशरथादीनां चरित्रेण सह श्रीरामस्य चरित्रं मुख्यतया सम्यग् वर्णितमस्ति।
- वाल्मीकिः ब्रह्मदेवस्य आदेशेन रामायणं रचितवान्।
- रामायणे सप्त काण्डानि सन्ति। प्रायः ६४५ सर्गाः सन्ति। तथैव २४००० श्लोकाः सन्ति।
- रामायणे प्रतिसहस्रश्लोकं प्रथमश्लोकस्य आदौ गायत्रीमन्त्रस्य एकैकः वर्णः प्रयुक्तः अस्ति।
- ''चतुर्विंशतिसाहस्री संहिता'' इति रामायणस्य अपरं नाम वर्तते।
- विक्रमशकस्य प्रायः ५२०० वर्षेभ्यः पूर्वमेव रामायणस्य रचना तस्य प्रसिद्धिः अपि जाता।
- योगवाशिष्ठम्, अध्यात्मरामायणम्, अद्भुतरामायणम्, आनन्दरामायणम् इति अन्येपि केचन रामायणग्रन्थाः सन्ति।
- रामायणकथाम् आधारीकृत्य रघुवंशम्, जानकीहरणम् इत्यादीनि महाकाव्यानि, प्रतिमानाटकम्, उत्तररामचरितम् इत्यादीनि नाटकानि अपि प्रसिद्धानि सन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. संस्कृतवाङ्मये आदिकाव्यं किम्?

२. रामायणस्य रचयिता कः?

३. रामायणे कति काण्डानि सन्ति? तेषां नाम किम्?

४. रामायणे कति सर्गाः कति श्लोकाश्च सन्ति?

५. विमर्शकानां मते रामायणमहाकाव्यस्य रचनाकालः कः?

(II) रिक्तस्थानानि पूरयत।

१. वाल्मीकिमहर्षिः _____ नदीतीरं गतवान् ।

२. वाल्मीकिमहर्षेः शिष्यः _____ वर्तते।

३. निषादः _____ पक्षिणं बाणेन मारितवान्।

४. रामायणस्य अपरं नाम _____ वर्तते।

५. रामायणे _____ वंशचक्रवर्तिनां वर्णनम् अस्ति।

(III) समीचीनमुत्तरं चिनुत।

१. रामायणमहाकाव्ये आदिमकाण्डस्य नाम किम्? ( )

(क) युद्धकाण्डम् (ख) सुन्दरकाण्डम्

(ग) बालकाण्डम् (घ) किष्किन्धाकाण्डम्

२. रामायणरचनां कर्तुं वाल्मीकिमर्हर्षिं कः आदिष्टवान्? ( )

(क) ब्रह्मा (ख) विश्वामित्रः

(ग) नारदः (घ) ऋष्यश्रृङ्गः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. वाल्मीकिमहर्षिः केन नाम्ना लोके ख्यातिं प्राप्तवान्? ( )

(क) रामकविः (ख) आदिकविः

(ग) सहजकविः (घ) विश्वकविः

४. विग्रहवान् धर्मः कः भवति? ( )

(क) रामः (ख) रावणः

(ग) विभीषणः (घ) सुग्रीवः

५. सूर्यवंशचक्रवर्तिषु अयं नास्ति? ( )

(क) दशरथः (ख) श्रीरामचन्द्रः

(ग) चन्द्रगुप्तः (घ) दिलीपः

(IV) परस्परं योग्यं योजयत।

१. रामायणम्	रामभक्तः	( )
२. गायत्रीमन्त्रः	प्राचेतसः	( )
३. आञ्जनेयः	चतुर्विंशतिसाहस्त्री संहिता	( )
४. वाल्मीकिः	सत्यपराक्रमः	( )
५. रामः	चतुर्विंशतिवर्णाः	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. निषादः -

२. क्रौञ्चः -

३. निन्दितः -

४. दीर्घदर्शी -

५. तमसानदीतीरम् -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(VI) लघुनिबन्धं रचयत।

१. रामायणकाव्यस्य आविर्भावसम्बद्धः वृत्तान्तः कः?

२. रामायणस्य परिचयं लिखत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठस्य आधारेण वाल्मीकिमहर्षेः रामायणस्य च महत्त्वं प्रकटयत।

परियोजना

१. ग्रन्थालयं गत्वा तत्र किञ्चित्कथापरिवर्तनेन रचितानां रामायणग्रन्थानां सूचीं रचयत।

२. रामायणकथाम् आधारीकृत्य रचितानां काव्यानां नाटकानां च सूचीं निर्मात।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयः पाठः

महाभारतम्

प्रयोजनानि -

- संस्कृतवाङ्मये "महाभारतम्" अत्यन्तं विशालम् इतिहासकाव्यम्। एतस्य कारणादेव संस्कृतवाङ्मयस्य महती ज्ञानसमृद्धिः जाता इति सत्यम् अनेन पाठेन जानीमः।
- महाभारतम् अस्माकं पूर्वजानां चन्द्रवंशराजानां चरित्रमस्ति। एतेन चरित्रेण धर्माचारस्य महत्त्वम् अधर्माचारस्य हानिं स्पष्टतया ज्ञातुं शक्नुमः।
- महाभारतस्य ज्ञानेन भारतीयसंस्कृतिः सर्वोत्कृष्टा विश्वमानवकल्याणकारिणी इति भावः अस्माकं मनसि जायते।

पाठारम्भः -

प्रियच्छात्राः! सुविपुले अस्मिन् संस्कृतविज्ञानप्रपञ्चे महाभारतम् एतत् सूर्यसदृशं भवति। यतो हि अत्यन्तविशाले अस्मिन् महाभारते भारतीयविज्ञानस्य सर्वेऽपि पक्षाः चर्चिताः सन्ति। नीतिशास्त्रम्, दण्डनीतिः, राजनीतिः, तत्त्वशास्त्रं, युद्धविद्या, विविधानि विज्ञानशास्त्राणि, ललितकलाशास्त्रम् इत्यादयः विषयाः अतीव सूक्ष्मेक्षिकया अत्र सन्निवेशिताः सन्ति। अत एव **"यन्न भारते तन्न भारते"** (यत् ज्ञानं महाभारते अस्ति, तदेव ज्ञानं भारतवर्षे अस्ति।) इति लोकोक्तिः महाभारतविषये बहुप्रसिद्धा श्रूयते। महाभारते अपि एवमुक्तम्।

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ!।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।

मनुष्यजीवनस्य अभ्युदयकारकाः धर्मः अर्थः कामः मोक्षः इत्येते चतुर्विधपुरुषार्थाः अपि अत्रैव चर्चिताः। तथैव यत् विज्ञानं महाभारते वर्तते तदेव सर्वत्र लोके दृश्यते इति अस्य श्लोकस्य आशयः।

एकलक्षाधिकश्लोकैः विलसितस्य अस्य महाभारतस्य परिशीलनेन सत्यमेतत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ज्ञातुं शक्यते यद् अयं ग्रन्थः एकस्मिन् काले एकेन लेखकेन कृतः इति वक्तुम् अवकाशः नास्ति। अस्य ग्रन्थस्य विकासे तिस्रः अवस्थाः सन्ति। प्रथमावस्थायां ''जयसंहिता'' इति, द्वितीयावस्थायां ''भारतम्'' इति, तृतीयावस्थायां ''महाभारतम्'' इति क्रमशः अस्य ग्रन्थस्य वृद्धिः जाता।

महाभारतस्य तिस्रः अवस्थाः	
प्रथमावस्थायाम्	जयसंहिता
द्वितीयावस्थायाम्	भारतम्
तृतीयावस्थायाम्	महाभारताम्

प्रथमावस्थायां व्यासमहर्षिः शिष्यस्य वैशम्पायनस्य कृते कौरवपाण्डवानां चरित्रम् आधारीकृत्य ''जय'' नाम्ना किञ्चित्काव्यम् उपदिष्टवान्। तदेव काव्यं **''जयसंहिता''** इति नाम्ना प्रसिद्धम्। अस्यां ''जयसंहितायां'' ८८०० अष्टशतोत्तराष्टसहस्रं श्लोकेषु केवलं धर्माधर्मविचारः प्रधानः वर्तते। जयसंहिता/याः मङ्गलाचरणश्लोकोऽपि एवमस्ति।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्।।

नारायणं श्रीकृष्णम् अर्जुनं व्यासं च नमस्कृत्य जयनामकस्य काव्यस्य पाठः करणीयः। वस्तुतः अस्याः जयसंहितायाः एव कर्ता व्यासमहर्षिः। तत्त्वज्ञाननिधेः महातपस्विनः व्यासस्य स्तुतिपरकेषु श्लोकेषु बहुषु विद्यमानेषु एकं श्लोकं पश्यामः।

अफाललोचनश्शम्भुः द्विबाहुरपरो हरिः।
अचतुर्वदनो ब्रह्मा भगवान् बादरायणः।।

ललाटे लोचनं विना अपि साक्षात् शङ्करः, चतुर्भुजैः विना केवलं भुजद्वयेन विष्णुः, चतुर्वदनानि विना केवलम् एकेन वदनेन ब्रह्मदेवः व्यासमहर्षिः भवति। तपसा ज्ञानेन तेजसा च भगवान् व्यासः त्रिमूर्तिस्वरूपः इति श्लोकस्यास्य तात्पर्यम्।

अनन्तरं **द्वितीयावस्थायां** जनमेजयस्य सर्पयागे वैशम्पायनः व्यासकृतं जयनामकं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

काव्यं जनमेजयाय उपदिष्टवान्। अस्य काव्यस्य श्रवणसमये जनमेजयः वैशम्पायनं बहुविधान् प्रश्नान् पृष्टवान्। तेषाम् उत्तराणि समग्रतया वैशम्पायनोऽपि दत्तवान्। एवम् उभयोः परस्परसंवादेन चतुर्विंशतिसहस्रश्लोकात्मकं (२४०००) **भारतं** निर्मितमासीत्।

तदनन्तरं **तृतीयावस्थायां** शौनकादिमहर्षीणां कृते सौतिमहर्षिः द्वादशवर्षात्मके दीर्घकालिके यज्ञसत्रे भारतकाव्यं श्रावितवान्। अनेकैः उपाख्यानैः कथाभिः तदेव भारतम् अनन्तरम् एकलक्षाधिक-श्लोकसंयुक्तं **"महाभारतम्"** इति इतिहासकाव्यं जातम्।

महत्त्वात् भारवत्त्वाच्च महाभारतमुच्यते।

ज्ञानस्य विज्ञानस्य च बहुविधपक्षेषु महान् विचारः काव्ये अस्मिन् कृतः इति कारणादेव **"महाभारतम्"** इति अस्य सार्थकं नामधेयं लोके सुविश्रुतम्।

एतावद्विशालस्य अस्य ग्रन्थस्य **"शतसाहस्रीसंहिता"** इति अपरं नामापि वर्तते। सर्वविधज्ञानस्य यथा वेदः आधारः, तथैव महतः विज्ञानस्य महाभारतग्रन्थः मूलनिधिः इति हेतोरेव अस्य चतुर्वेदानाम् अनन्तरं **"पञ्चमवेदः"** इति नामापि वर्तते।

सुविशाले अस्मिन् महाभारते अष्टादशपर्वाणि सन्ति। तेषां नामानि क्रमशः एवं सन्ति।

महाभारतस्य अष्टादश पर्वाणि

१. आदिपर्व	७. द्रोणपर्व	१३.अनुशासनिकपर्व
२. सभापर्व	८. कर्णपर्व	१४ अश्वमेधपर्व
३. वनपर्व	९. शल्यपर्व	१५.आश्रमवासपर्व
४. विराटपर्व	१०.सौप्तिकपर्व	१६. मौसलपर्व
५. उद्योगपर्व	११. स्त्रीपर्व	१७. महाप्रस्थानकपर्व
६. भीष्मपर्व	१२. शान्तिपर्व	१८. स्वर्गारोहणपर्व

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एतैः अष्टादशभिः पर्वभिः सह परिशिष्टरूपेण हरिवंशपुराणं वर्तते। अस्मिन् हरिवंशे भगवतः श्रीकृष्णस्य जीवनचरित्रं वर्णितम्। एतेन हरिवंशपुराणेन सहैव महाभारतस्य लक्षश्लोकाः पूर्णाः भवन्ति।

अष्टादशसु पर्वसु आकारदृष्ट्या चतुर्दशसहस्रेण श्लोकैः (२४०००) अतीव बृहत्तमं शान्तिपर्व इति, पञ्चदशोत्तरशतश्लोकैः (२१५) अतीव लघुतमं महाप्रस्थानकपर्व वर्तते।

बृहत्तमं पर्व ⇨	शान्तिपर्व ⇨ २४००० श्लोकाः
लघुतमं पर्व ⇨	महाप्रस्थानकपर्व ⇨ २१५ श्लोकाः

अखण्डज्ञानविज्ञानमये महाभारते प्रधानतया अधर्मपक्षपातिनां कौरवाणाम् उपरि धर्मपक्षपातिनां पाण्डवानां विजयवृत्तान्तः वर्णितः। राजनीतिनिपुणः, परमधार्मिकः, भगवान् श्रीकृष्णः पाण्डवानां सहायकः हितचिन्तकश्च आसीत्। अयमेव अस्य महाभारतस्य प्रधानकथानायकोऽपि।

नीतिशास्त्रप्रधाने अस्मिन् ग्रन्थे एकं नीतिश्लोकम् उदारहणार्थं पश्यामः।

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।।

जीवने मनुष्यस्य व्यक्तित्वम् अवश्यं रक्षणीयम्। धनं तु कदाचिद्भवति क्वचित् न भवति। धनेन कश्चन सम्पन्नः भवति, तस्य अभावे कश्चन दरिद्रो भवति। परन्तु एकवारं समाजे मनुष्यस्य व्यक्तित्वं विनष्टं चेत् पुनः सम्पादयितुं न शक्यते।

अतिविशाले महाभारते कांश्चिद् विशिष्टविषयान् स्वीकृत्य केचन स्वतन्त्रग्रन्थाः वर्तन्ते, ते यथा शकुन्तलोपाख्यानं, नलोपाख्यानं, रामोपाख्यानं, सावित्र्युपाख्यानं, श्रीमद्भगवद्गीता, विष्णुसहस्रनामावलिः, यक्षप्रश्नाः, विदुरनीतिः, हरिवंशपुराणम् इत्यादयः सन्ति।

अस्माकं जीवनस्य पारमार्थिकतत्त्वज्ञानाय व्यवहारकुशलतायै च महाभारतस्य अध्ययनम् अवश्यं करणीयम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अवधेयांशाः -

- महाभारतं भारतीयविज्ञानस्य विश्वकोशः इति वक्तुं शक्यते।
- महाभारतमेतत् एकस्मिन् काले एकेन लेखकेन रचितो ग्रन्थः नास्ति।
- अस्य ग्रन्थस्य जयः इति, भारतम् इति, महाभारतम् इति क्रमेण विकासः जातः।
- जयसंहितायां ८८०० श्लोकाः सन्ति। अस्याः लेखकः व्यासमहर्षिः।
- भारतसंहितायां २४००० श्लोकाः सन्ति। अस्याः प्रबोधकः वैशम्पायनः।
- महाभारते एकलक्षाधिकश्लोकाः सन्ति। अस्य उपदेशकः सौतिमहर्षिः।
- महाभारतस्य विषये 'यन्न भारते तन्न भारते' इति लोकोक्तिः प्रसिद्धा।
- महाभारतस्य शतसाहस्त्री संहिता, पञ्चमवेदः इति प्रशस्तिपरकं नामद्वयं वर्तते।
- महाभारते अष्टादश पर्वाणि सन्ति।
- अस्य परिशिष्टरूपेण हरिवंशपुराणं विद्यते।
- अष्टादशसु पर्वसु बृहत्तमं शान्तिपर्व, लघुतमं महाप्रस्थानकपर्व।
- चन्द्रवंशराजानां कौरवाणां पाण्डवानां च चरित्रमेव महाभारतस्य मुख्यं इतिवृत्तम्।
- राजनीतिनिपुणः परमधार्मिकः भगवान् श्रीकृष्णः महाभारतस्य मुख्यः कथानायकः।
- महाभारते कांश्चिद् विशेषांशान् स्वीकृत्य केचन स्वतन्त्रग्रन्थाः सन्ति। नलोपाख्यानम्, विदुरनीतिः भगवद्गीता इत्यादयः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. महाभारते भारतीयविज्ञानस्य के के विषयाः चर्चिताः सन्ति?

२. महाभारतस्य विकासे कति अवस्थाः सन्तिः? तासां नाम किम्?

३. जयसंहितायां कति श्लोकाः सन्ति?

४. जयसंहितायाः मङ्गलाचरणश्लोकः कः?

५. महाभारतस्य अपरं नाम किम्?

(II) रिक्तस्थानानि पूरयत।

१. मनुष्यजीवनस्य अभ्युदयकारकाः _____ सन्ति।

२. वैशम्पायनः जयकाव्यं _____ उपदिष्टवान्।

३. महत्त्वात् भारवत्त्वात् च _____ उच्यते।

४. महाभारतस्य परिशिष्टरूपेण _____ पुराणं वर्तते।

५. महाभारतस्य प्रधानकथानायकः _____ वर्तते।

(III)समीचीनमुत्तरं चिनुत।

१. व्यासमहर्षिः जयसंहितां कस्मै उपदिष्टवान्? ( )

(क) जनमेजयाय (ख) श्रीकृष्णाय

(ग) वैशम्पायनाय (घ) नारदाय

२. अफाललोचनः शम्भुः कः? ( )

(क) अत्रिमहर्षिः (ख) वशिष्ठमहर्षिः

(ग) कण्वमहर्षिः (घ) व्यासमहर्षिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. अष्टादशपर्वसु चतुर्दशसहस्रेण श्लोकैः बृहत्तमं पर्व किं वर्तते। ( )

(क) शान्तिपर्व (ख) महाप्रस्थानकपर्व

(ग) आदिपर्व (घ) उद्योगपर्व

४. भारतकाव्यं शौनकादिमुनीनां कृते कः श्रावितवान्? ( )

(क) वैशम्पायनः (ख) सौतिमहर्षिः

(ग) व्यासमहर्षिः (घ) जनमेजयः

५. मनुष्यः किं यत्नेन संरक्षेत्? ( )

(क) धनम् (ख) कीर्तिम्

(ग) वृत्तम् (घ) सन्तानम्

(IV) परस्परं योग्यं योजयत।

१. महाभारतम् यन्न भारते तन्न भारते ( )

२. अचतुर्वदनो ब्रह्मा भगवद्गीता ( )

३. लघुतमं पर्व भगवान् बादरायणः ( )

४. महाभारतस्य लोकोक्तिः महाप्रस्थानकपर्व ( )

५. महाभारते प्रसिद्धा गीता पञ्चमवेदः ( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. महाभारतम् -

२. यागः -

३. श्रीकृष्णः -

४. वित्तम् -

५. व्यवहारकुशलः -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(VI) लघुनिबन्धं रचयत।

१. महाभारतस्य विकासे कति अवस्थाः सन्ति? तासां विवरणं कुरुत।

२. महाभारतस्य परिचयं लिखत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठस्य आधारेण व्यासमहर्षेः महाभारतस्य च वैशिष्ट्यं प्रकाशयत।

परियोजना

१. महाभारते विद्यमानानां स्वतन्त्रग्रन्थानां सूचीं लिखत।

२. महाभारतम् आधारीकृत्य रचितानां काव्यानां नाटकानां च सूचीं रचयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्थः पाठः

पुराणानि

प्रयोजनानि -

⇨ भारतीयसाहित्यप्रपञ्चे सम्प्रदायविज्ञानसम्बद्धानाम् अनेकविषयाणां सङ्ग्रहरूपस्य पुराणवाङ्मयस्य परिचयः अनेन पाठेन जायते।

⇨ पुराणानां भारतीयसंस्कृतौ वैशिष्ट्यमपि जानीमः।

⇨ पुराणसाहित्यस्य अध्ययनेन अस्माकं पारम्परिकविज्ञानस्य महान् लाभः स्याद् इत्यपि आशयः अस्माकं मनसि जायते।

पाठारम्भः -

प्राचीनभारतीयसमाजे घटितानां विविधसन्दर्भानां चरित्रं पुराणानां माध्यमेन एव जानीमः। वस्तुतः पुराणशब्दस्य अर्थः अपि प्राचीनम् इत्येव। केचन आचार्याः अस्य शब्दस्य अर्थविवरणम् एवं कुर्वन्ति।

पुराणपदस्य अर्थः - 'पुरा नवं भवति' इति यास्काचार्यः कथयति। पूर्वकाले यत् नवीनं विज्ञानं तदेव पुराणमिति अस्य भावः।

'पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्' इति वायुपुराणे अस्ति।

प्राचीनकालस्य ऋषीणां राज्ञां वंशपरम्परां पुराणं बोधयति इति अस्य वाक्यस्य आशयः।

पुरा अतीतान् अर्थान् अणति कथयति इति पुराणम्।

'जगतः प्रागवस्थाम् अनुक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम्' इति सायणाचार्यः वदति।

प्रपञ्चस्य उत्पत्तिविकासक्रमं पुराणं बोधयतीति अस्य वाक्यस्य भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुराणानां संख्या -

संस्कृतवाङ्मये अष्टादशपुराणानि सन्ति। तानि एतेन श्लोकेन वयं स्पष्टतया जानीमः।

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।
अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते।।

मद्वयम् → १. मत्स्य, २. मार्कण्डेय

भद्वयम् → ३. भविष्य, ४. भागवत

ब्रत्रयम् → ५. ब्रह्म, ६. ब्रह्माण्ड, ७. ब्रह्मवैवर्त

वचतुष्टयम् → ८. वायु, ९. विष्णु, १०. वराह, ११. वामन

अ → १२. अग्नि

ना → १३. नारद

प → १४. पद्म

लिं → १५. लिङ्ग

ग → १६. गरुड

कू → १७. कूर्म

स्क → १८. स्कन्द

एवं क्रमेण अष्टादशपुराणानि सन्ति।

पुराणभेदः - लोके साधारणतया त्रयः गुणाः प्रसिद्धाः सन्ति। सत्त्वगुणः, रजोगुणः, तमोगुणः इति। पुराणेषु वर्णितानां विषयाणां स्वभावपरिशीलनेन एतानि अपि सात्त्विकपुराणानि, राजसपुराणानि, तामसपुराणानि इति भेदेन त्रिविधानि भवितुमर्हन्ति। सत्त्वगुणवान् विष्णुः, रजोगुणवान् ब्रह्मा, तमोगुणवान् शङ्करः इत्यनया कल्पनया सात्त्विकपुराणानि वैष्णवानि, राजसपुराणानि ब्राह्माणि, तामसपुराणानि शैवानि इति एवं विचारोऽपि वर्तते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सात्त्विकपुराणानि	विष्णु-नारद-भागवत-गरुड-पद्म-वराहपुराणानि वैष्णवानि
राजसपुराणानि	ब्रह्माण्ड-ब्रह्मवैवर्त-मार्कण्डेय-ब्रह्म-वामन-भविष्यपुराणानि ब्राह्माणि
तामसपुराणानि	मत्स्य-कूर्म-लिङ्ग-शिव-अग्नि-स्कन्दपुराणानि शैवानि।

एतेषु अष्टादशसु पुराणेषु द्विशतोत्तरैकाशीतिसहस्रेण श्लोकैः (८१,२००) स्कन्दपुराणं बृहत्तमम् अस्ति। तथैव नवसहस्रेण श्लोकैः (९,०००) मार्कण्डेयपुराणं लघुतमम् अस्ति।

बृहत्तमं पुराणम् ⇨	स्कन्दपुराणम्	⇨ ८१,२०० श्लोकाः
लघुतमं पुराणम् ⇨	मार्कण्डेयपुराणम्	⇨ ९,००० श्लोकाः

पुराणलक्षणम् - पुराणवाङ्मयस्य आचार्याः पुराणेषु पञ्चविषयाः वर्णिताः सन्ति इति निश्चितवन्तः। ते एव पञ्चविषयाः पञ्चलक्षणशब्देन गृहीताः सन्ति। एवं पुराणं **पञ्चलक्षणम्** इति **विष्णुपुराणे** उक्तम् अस्ति।

यथा - **सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
वंशानुचरितं चेति पुराणं पञ्चलक्षणम्।।

सर्गः - जगतः सृष्टिप्रक्रियावर्णनम्, प्रतिसर्गः - प्रलयस्य तथैव पुनःसृष्टेः वर्णनम्, वंशः - देवतानां ऋषीणां च वंशावलीनां वर्णनम्, मन्वन्तराणि - विविधमन्वन्तरेषु प्रवृत्तानां सङ्घटनानां वर्णनम्, वंशानुचरितम् - सूर्य-चन्द्र-गुप्त-शुङ्ग इत्यादिवंशेषु उत्पन्नानां भूपतीनां चरित्रवर्णनम्, इत्येते पञ्चविषयाः (पञ्चलक्षणानि) पुराणेषु बहुलतया वर्णिताः दृश्यन्ते।

एतानि पञ्चलक्षणानि विष्णुपुराणे समग्रतया प्राप्यन्ते। परन्तु इतरेषु पुराणेषु एतानि लक्षणानि विहाय अन्येऽपि धार्मिककार्यक्रमाः, तीर्थस्थानानि, भक्तिसन्निवेशाः, शैववैष्णवसम्प्रदायविशेषाः, विविधानि व्रतानि, उत्सवाः, उपासनापद्धतयः च विस्तरेण वर्णिताः सन्ति।

श्रीमद्भागवतपुराणे पुराणं **दशलक्षणम्** इत्यपि उक्तमस्ति। यथा -

सर्गोऽस्याथ विसर्गश्च वृत्ती रक्षान्तराणि च ।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पूर्वोक्तपञ्चलक्षणैः सह अतिरिक्ततया वृत्तिः, रक्षा, संस्था, हेतुः, अपाश्रयः इत्येतानि पञ्चलक्षणानि अस्मिन् श्लोके गृहीतानि।

पुराणानि अपि एकस्मिन् काले एकेन लेखकेन न लिखितानि। कालानुसारं समाजस्य स्थितिगतीनां परिशीलनेन बहुभिः लेखकैः अनेके मूल्यवन्तः विषयाः पुराणेषु योजिताः। प्रायशः वैदिककालादेव पुराणानां रचना प्रारब्धा इति, व्यासमहर्षिः एतेषां पुराणानां क्रमबद्धतया सम्पादनं कृतवानिति च पण्डितानाम् आशयः।

पुराणेषु मनुष्यजीवने धार्मिकमूल्यानाम् अभिवर्धनार्थं महती प्रेरणा प्रतिपदं दृश्यते। अष्टादशपुराणेषु व्यासमहर्षेः इदमेव वचनं बहुप्रामुख्यं वहति।

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्।।

जीवने यथाशक्ति सर्वेषाम् उपकरणेन मनुष्यस्य पुण्यं वर्धते। तथैव यस्य कस्यापि अपकारेण पापमपि वर्धते। अयमेव पुराणानाम् आशयः।

अवधेयांशाः -

- प्राचीनभारतीयसमाजस्य पुराणम् एकः दर्पणः भवति।
- साहित्यजगति पुराणानि अष्टादश सन्ति।
- सात्त्विकपुराणानि, राजसपुराणानि, तामसपुराणानि इति त्रिविधानि पुराणानि सन्ति।
- ८१२०० श्लोकैः स्कन्दपुराणं बृहत्तममस्ति, ९००० श्लोकैः मार्कण्डेयपुराणं लघुतमं भवति।
- पुराणेषु प्रामुख्येन पञ्चविषयाः (लक्षणानि) भवन्ति इति विष्णुपुराणे उक्तम् अस्ति।
- पञ्चलक्षणानि विष्णुपुराणे समग्रतया प्राप्यन्ते।
- पुराणं दशलक्षणम् अपि वर्तते इति श्रीमद्भागवतपुराणे उक्तमस्ति।
- पुराणानां रचना वेदकालादेव आरब्धा।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- अष्टादशपुराणानां व्यासमहर्षिः क्रमबद्धतया सम्पादनं कृतवान् इति केचन पण्डिताः अभिप्रयन्ति।
- जीवने धार्मिकमूल्यानाम् अभिवर्धनार्थं पुराणानि अस्मान् प्रेरयन्ति।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. पुराणपदस्य अर्थः कः?

२. संस्कृतवाङ्मये कति पुराणानि सन्ति?

३. पुराणानां कति भेदाः सन्ति?

४. पुराणस्य पञ्चलक्षणं किम्?

५. अष्टादशपुराणेषु व्यासस्य वचनद्वयं किम्?

(II) रिक्तस्थानानि पूरयत।

१. _____ पुराणं तेन वै स्मृतम् इति वायुपुराणे अस्ति।

२. मद्वयम् इत्यनेन _____ _____ पुराणं स्वीकरणीयम्।

३. पुराणानां _____ भेदाः सन्ति।

४. पुराणं पञ्चलक्षणम् इति _____ उक्तमस्ति।

५. श्रीमद्भागवते पुराणं _____ इति उक्तमस्ति।

(III) समीचीनमुत्तरं चिनुत।

१. 'पुरा नवं भवति' इति पुराणलक्षणं कः उक्तवान्? ( )

(क) गर्गाचार्यः (ख) शाकल्यः

(ग) यास्काचार्यः (घ) पाणिनिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२.'ब्रत्रयम्' इत्यत्र पुराणमेतत् नान्तर्भवति। ( )

(क) ब्रह्मपुराणम् (ख) मत्स्यपुराणम्

(ग) ब्रह्माण्डपुराणम् (घ) ब्रह्मवैवर्तपुराणम्

३. पुराणेषु लघुतमं पुराणं किम्? ( )

(क) वामनपुराणम् (ख) मार्कण्डेयपुराणम्

(ग) अग्निपुराणम् (घ) कूर्मपुराणम्

४. पुराणस्य दशलक्षणं कुत्र उक्तम्? ( )

(क) भागवतपुराणे (ख) लिङ्गपुराणे

(ग) नारदपुराणे (घ) मार्कण्डेयपुराणे

५. पुराणलक्षणेषु सर्गः इत्यस्य अर्थः भवति। ( )

(क) जगतः सृष्टिप्रक्रियावर्णनम् (ख) मनूनां चरित्रवर्णनम्

(ग) कालगतिवर्णनम् (घ) ग्रहनक्षत्राणां वर्णनम्

(IV) परस्परं योग्यं योजयत।

१. जगतः प्रागवस्थाम् अनुक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम्।	पद्मपुराणम्	( )
२. 'प' वर्णेन	षड्विधानि	( )
३. तामसपुराणानि	स्कन्दपुराणम्	( )
४. प्रलयस्य तथैव पुनःसृष्टेः वर्णनम्	सायनाचार्यः	( )
५. बृहत्तमं पुराणम्	प्रतिसर्गः	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. वंशः -

२. पुरा -

३. तीर्थस्थानानि -

४. उत्सवः -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. परोपकारः -

(VI) लघुनिबन्धं रचयत।

१. पुराणपदस्य अर्थं विवृणुत।

२. पुराणानि कति सन्ति? तेषां नामानि कानि?

३. पुराणानां भेदान् प्रदर्शयत।

४. पुराणस्य लक्षणं वर्णयत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठस्य आधारेण पुराणानां समग्रं परिचयं कुरुत।

परियोजना

१. पुराणेषु उक्तानां सुभाषितश्लोकानां सङ्ग्रहं कुरुत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयखण्डः

पञ्चमहाकाव्यानि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चमः पाठः

रघुवंशम्

प्रयोजनानि -

- भारतीयकाव्यसंसारे असमानप्रतिभासम्पन्नेन महाकविना कालिदासेन विरचितस्य रघुवंशमहाकाव्यस्य एतत्पाठाध्ययनेन अस्माकं सम्यक् ज्ञानं भवति।
- संस्कृते विद्यमानानां काव्यानां मध्ये ''रघुवंशमहाकाव्यम्'' अग्रगण्यम् इत्यपि जानीमः।
- अस्य काव्यस्य पठने अस्माकम् अभिरुचिः एतस्य पाठस्य माध्यमेन अवश्यं जायते।

पाठारम्भः -

संस्कृतकाव्यजगति महाकविः कालिदासः अद्वितीयप्रतिभाभूषितः सर्वमान्यः वर्तते। अतः एव सर्वे कवयः पण्डिताश्च कालिदासं **'कविकुलगुरुः'** इत्यनेन बिरुदेन सम्बोधयन्ति। अस्य कविवरस्य काव्यानि अनेकेषां कवीनां काव्यरचनायां प्रोत्साहकानि मार्गदर्शकानि च भवन्ति। अतः एव अस्य विषये अयं श्लोकः प्रसिद्धः श्रूयते। यथा -

कालिदासगिरां सारं कालिदासः सरस्वती।
चतुर्मुखोऽथवा साक्षात् विदुर्नान्ये च मादृशाः।।

महाकवेः अस्य काव्येषु विद्यमानं गम्भीरतत्त्वसारं कालिदासः वा जानीयात्, यदि विद्याधिदेवता सरस्वती वा जानीयात्, सृष्टिकर्ता ब्रह्मा वा कदाचित् ज्ञातुं शक्नुयात्, परन्तु अस्मादृशाः मन्दबुद्धयः कालिदासस्य काव्यतत्त्वं ज्ञातुं न शक्नुयुः इति पण्डितानाम् आशयः।

काव्यसंसारे अस्मिन् वाल्मीकिः, व्यासः, भासः, कालिदासः, भवभूतिः इत्येते द्वित्राः वा पञ्चशः वा महाकवयः भवितुम् अर्हन्तीति आनन्दवर्धनाचार्याणां सुनिश्चितः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभिप्रायः।

पूर्वकवीनाम् आचार्याणां जन्मकालविषये देशविषये निश्चितानि प्रमाणानि न लभ्यन्ते। तथैव कालिदासस्य देशकालविषयेऽपि सुस्थिराणि प्रमाणानि न सन्ति। अतः एव विमर्शकाः विभिन्नविचारान् प्रकटयन्ति।

कालिदासः ई. (१) प्रथमशताब्दीयः, (५) पञ्चमशताब्दीयः, (११) एकादशशताब्दीयः इति विभिन्नप्रमाणैः अनेके वादाः सन्ति। तथैव अयं काश्मीरदेशीयः, वङ्गदेशीयो वा भवेदित्यपि विचाराः सन्ति। परन्तु कालिदासस्य काव्यपरिशीलनेन बहवः पण्डिताः अयम् **उज्जयिनीदेशीयः** भवितुमर्हतीति विश्वसन्ति।

कालिदासस्य नाम्ना लोके बहवः ग्रन्थाः श्रूयन्ते। परन्तु विद्वांसक्षः तस्य केवलं सप्त एव ग्रन्थाः भवितुमर्हन्ति इति निश्चित्य वदन्ति। ते यथा १.रघुवंशम्, २.कुमारसम्भवम् इति महाकाव्यद्वयम्, ३.मेघदूतम्, ४.ऋतुसंहारम् इति खण्डकाव्यद्वयम्, ५.अभिज्ञानशाकुन्तलम्, ६.मालविकाग्निमित्रम्, ७.विक्रमोर्वशीयम् इति त्रीणि नाटकानि सन्ति।

कालिदासस्य कृतयः

महाकाव्यद्वयम्	१. रघुवंशम् २. कुमारसम्भवम्
खण्डकाव्यद्वयम्	१. मेघदूतम् २. ऋतुसंहारम्
नाटकत्रयम्	१. मालविकाग्निमित्रम् २. विक्रमोर्वशीयम् ३. अभिज्ञानशाकुन्तलम्

एतेषु सप्तसु काव्येषु आसेतुशीताचलं सुप्रसिद्धं महाकाव्यं रघुवंशमेव। अद्यापि भारते गुरुकुलेषु संस्कृतविद्याध्ययनम् एतेन काव्येन एव प्रारभन्ते। कालिदासः अस्य काव्यस्य आदौ मङ्गलाचरणश्लोके पार्वतीपरमेश्वरयोः वन्दनं करोति। यथा-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

यथा शब्दः अर्थः च परस्परं सम्मिलितौ एव भवतः, तथैव परस्परं सम्मिलितौ, अस्य प्रपञ्चस्य जननीजनकौ तौ पार्वतीपरमेश्वरौ कालिदासः अस्मिन् श्लोके नमस्करोति।

अस्मिन् काव्ये कालिदासः रघुवंशचक्रवर्तिनां चरित्रवर्णनं कृतवान्। सम्पूर्णकाव्ये नवविंशतिसंख्याकानां (२९) महाराजानां चरित्रवर्णनमस्ति। तेषु सप्तचक्रवर्तिनां चरित्रं विस्तरेण द्वाविंशतेः महाराजानां चरित्रं संक्षेपेण वर्णितवान्।अस्मिन् काव्ये नवदश सर्गाः (१९), नवषष्ट्युत्तरपञ्चदशशतं (१५६९) श्लोकाः सन्ति।

अस्मिन् काव्ये केचन सन्निवेशाः प्रधानतया ज्ञातव्याः सन्ति। तत्र प्रथमसर्गत्रये दिलीपमहाराजस्य महोज्ज्वलं चरित्रं वर्णितम्। द्वितीयसर्गे दिलीपस्य गोसेवावृत्तान्तः नितरां मनोहरः। चतुर्थसर्गे रघुमहाराजस्य दिग्विजययात्रा वर्णिता। अष्टमसर्गे अजमहाराजस्य पत्न्याः इन्दुमत्याः मरणेन विलापसन्दर्भः अतीव दयनीयः। नवमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं सप्तसु सर्गेषु रामायणानुसारं श्रीरामस्य भव्यं मङ्गलप्रदं चरित्रं वर्णितम्। एवमन्ते नवदशसर्गे अग्निवर्णस्य चरितेन काव्यस्यास्य समाप्तिः जायते।

अस्मिन् रघुवंशमहाकाव्ये कालिदासस्य निरुपमं वर्णनसौन्दर्यम्, असामान्यं पदप्रयोगचातुर्यं परिदृश्यते। एतेन वैदुष्येण कालिदासस्य महती कीर्तिः पण्डितलोके वर्तते। षष्ठसर्गे अजमहाराजस्य इन्दुमतीस्वयंवरवृत्तान्तसमये कालिदासः एकम् असामान्यं वर्णनं कृतवान्। तेन तस्य **'दीपशिखाकालिदासः'** इति प्रशस्तिः सर्वत्र प्रसिद्धा अभवत्। तदेव एतद् वर्णनं यथा -

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिं वरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः।।

स्वयंवरसमये इन्दुमत्याः वर्णनपरकः अयं श्लोकः। यथा रात्रौ काचित् गमनशीला दीपज्वाला अग्रे अग्रे गच्छति। तदा तस्याः अभिमुखे आगतं भवनम् अतीव प्रकाशितं भवति। तस्याः अग्रे गमनानन्तरं तदेव भवनम् अन्धकारेण आवृतं भवति, तथैव यदा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इन्दुमती राजकुमाराणाम् अभिमुखे गच्छति, तदा ते राजकुमाराः इन्दुमती मामेव वरिष्यति इति भावेन अत्यन्तसन्तुष्टाः आसन्। परन्तु यदा सा तान् अतिक्रम्य अग्रे गतवती तदा ते नितरां दुःखिताः विषण्णवदनाः जाताः इति श्लोकस्य आशयः।

एवम् अस्मिन् काव्ये आपातमधुराः आद्यान्तरसभरिताः सहृदयानां पाठकानां हृदयामोदकाः वर्णनसन्निवेशाः बहवः सन्ति। एतेभ्यः अतुलनीयम् आनन्दं सम्प्राप्तवतां सहृदयानां मनोभावम् अयं श्लोकः प्रकटयति। यथा -

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ।।

यथा कुसुममञ्जरीणां रसास्वादनेन महान् आनन्दः जायते। तथैव कालिदासकाव्यानां श्रवणेन सहृदयानां मनसि चिरस्थायिकः आनन्दः जायते इति अस्य श्लोकस्य आशयः।

अस्य महाकाव्यस्य मल्लिनाथपण्डितेन **'सञ्जीविनी'**नाम्ना रचिता व्याख्या सर्वत्र सुविख्याता।

अवधेयांशाः -

- संस्कृतवाङ्मये कालिदासः असमानप्रतिभाशाली महाकविः अस्ति।
- अस्य जन्मकालविषये विमर्शकेषु विभिन्नाः अभिप्रायाः सन्ति।
- अयम् उज्जयिनीदेशवासी स्यादिति बहूनां पण्डितानां मतम्।
- कालिदासस्य रघुवंशम्, कुमारसम्भवम् इति महाकाव्यद्वयम्, मेघदूतम्,ऋतु-संहारम् इति खण्डकाव्यद्वयम्, अभिज्ञानशाकुन्तलम् मालविकाग्निमित्रम्, विक्रमोर्वशीयम् इति नाटकत्रयम् आहत्य सप्त ग्रन्थाः अतीव प्रसिद्धाः।
- रघुवंशे २९ सूर्यवंशचक्रवर्तिनां चरित्रवर्णनमस्ति।
- तत्र सप्तानां चक्रवर्तिनां चरित्रं विस्तरेण वर्णितम्।
- रघुवंशे नवदश (१९) सर्गाः सन्ति।
- दीपशिखाकालिदासः इति पण्डितलोके कालिदासस्य महती प्रशस्तिः वर्तते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

➤ मल्लिनाथविरचिता सञ्जीविनीव्याख्या अस्य काव्यस्य सुप्रसिद्धा।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. रघुवंशमहाकाव्यस्य कर्ता कः?

२. कालिदासस्य देशः कः इति पण्डिताः विश्वसन्ति?

३. कालिदासस्य कति ग्रन्थाः सन्ति?

४. रघुवंशस्य मङ्गलाचरणश्लोकः कः?

५. रघुवंशस्य प्रथमसर्गत्रये किं वर्णितमस्ति?

(II) रिक्तस्थानानि पूरयत।

१. पण्डिताः कालिदासं _____ बिरुदेन सम्बोधयन्ति।

२. रघुवंशमहाकाव्ये _____ चक्रवर्तिनां चरित्रवर्णनम् अस्ति।

३. रघुवंशे _____ सर्गाः सन्ति।

४. इन्दुमत्याः वर्णनेन कालिदासस्य _____ प्रशस्तिः प्रसिद्धा।

५. रघुवंशकाव्यस्य _____ नाम्ना मल्लिनाथपण्डितस्य व्याख्या वर्तते।

(III) समीचीनमुत्तरं चिनुत।

१. कालिदासस्य कति महाकाव्यानि सन्ति? ( )

(क) त्रीणि (ख) द्वे

(ग) सप्त (घ) नव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. कालिदासस्य नाटकेषु एतत् नास्ति। ( )

(क) उत्तररामचरितम् (ख) अभिज्ञानशाकुन्तलम्

(ग) मालविकाग्निमित्रम् (घ) विक्रमोर्वशीयम्

३. रघुवंशे कति सूर्यवंशचक्रवर्तिनां वर्णनम् अस्ति। ( )

(क) २८ (ख) २१ (ग) ३० (घ) ३२

४. अजमहाराजस्य पत्नी का? ( )

(क) दमयन्ती (ख) मलयवती

(ग) इन्दुमती (घ) मन्दोदरी

५. रघुवंशस्य मङ्गलश्लोके कयोः नमस्कारः वर्णितः अस्ति? ( )

(क) कृष्णार्जुनयोः (ख) सीतारामयोः

(ग) अरुन्धतीवशिष्ठयोः (घ) पार्वतीपरमेश्वरयोः

(IV) परस्परं योग्यं योजयत।

१. कालिदासः	२८६६१	( )
२. कालिदासस्य सुप्रसिद्धं महाकाव्यम्	अभिज्ञानशाकुन्तलम्	( )
३. कालिदासस्य खण्डकाव्यद्वयम्	रघुवंशम्	( )
४. कालिदासस्य प्रसिद्धं नाटकम्	मेघदूतम्, ऋतुसंहारम्	( )
५. रघुवंशे श्लोकाः	कविकुलगुरुः	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. सरस्वती -

२. आसेतुशीताचलम् -

३. पितरौ -

४. रात्रिः -

५. मञ्जरी -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(VI) लघुनिबन्धं रचयत।

१. कालिदासस्य परिचयं कुरुत।

२. रघुवंशमहाकाव्यस्य वैशिष्ट्यं बोधयत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठस्य आधारेण कालिदासस्य रघुवंशमहाकाव्यस्य च समग्रं परिचयम् आविष्कुरुत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षष्ठः पाठः

कुमारसम्भवम्

प्रयोजनानि -

⇨ अस्य पाठस्य अध्ययनेन पञ्चमहाकाव्येषु प्रसिद्धस्य 'कुमारसम्भवमहाकाव्यस्य' परिचयं प्राप्नुमः।

⇨ रघुवंशादनन्तरं कालिदासस्य प्रतिभापाटवम् अस्मिन् काव्येऽपि द्रष्टुं शक्नुमः।

⇨ अवश्यम् अस्यापि महाकाव्यस्य अध्ययने अयं पाठः अस्मान् प्रेरयति।

पाठारम्भः -

पूर्वकाले पण्डितसमाजे कश्चन विचारः चलति स्म। अस्मासु वस्तुतः कवयः कति वा भवितुमर्हन्ति इति। तत्र हस्तस्य अङ्गुलीभिः एकः, द्वितीयः, तृतीयः इति अनेन क्रमेण गणना यदा आरब्धा, तदा कनिष्ठिकया सर्वप्रथमः सर्वमान्यः कालिदासः महाकविरिति सर्वे पण्डिताः अङ्गीकृतवन्तः। एवं द्वितीयया अङ्गुल्या अनामिकया अन्यः कविः कः भवितुमर्हति इति निर्देशे सति तादृशः कविः कोऽपि नासीत्। अत्र आशयः एवं भवति यथा कालिदासेन सदृशस्य द्वितीयस्य कवेः नाम एव नासीद् इति कारणात् द्वितीयाङ्गुल्याः नाम अनामिका (नामरहिता) इति सार्थकम् आसीत्। एनमेव कालिदासस्य प्रशस्तिपरकं भावम् अयं श्लोकः प्रकटयति। यथा -

पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः ।
अद्यापि तत्तुल्यकवेरभावात् अनामिका सार्थवती बभूव ॥

इत्थं महाकीर्तिशालिनः कालिदासस्य विषये अन्योऽपि कश्चित् वृत्तान्तो वर्तते। महाराजस्य विक्रमादित्यस्य आस्थाने 'नवरत्नानि' इति नाम्ना नवसंख्याकाः पण्डिताः आसन्। तें नानाशास्त्रेषु लोकोत्तरप्रतिभाशालिनः विद्वांसः कवयः आसन्। तेषु कालिदासोऽपि एकः। यथा-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

धन्वन्तरि-क्षपणकामरसिंह-शङ्कु-वेतालभट्ट-घटकर्पर-कालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ॥

पञ्चमहाकाव्येषु कालिदासस्य द्वितीयं महाकाव्यं कुमारसम्भवं वर्तते। अस्मिन् महाकाव्ये शिवपार्वत्योः विवाहः, कार्त्तिकेयजननम्, तारकासुरसंहारः इत्येतेन विषयत्रयेण सम्बद्धा कथा प्रधानतया वर्णिता। इयं कथा शिवपुराणात् कालिदासेन स्वीकृता।

अस्मिन् काव्ये सप्तदशसर्गाः (१७), षण्णवत्यधिकसहस्रं (१०९६) श्लोकाः सन्ति। परन्तु बहवः पण्डिताः अस्य महाकाव्यस्य परिशीलनेन अष्ट एव सर्गाः कालिदासेन रचिताः, अवशिष्टाः नवसर्गाः अन्येन केनापि अज्ञातेन कविना लिखिताः इति सविश्वासं कथयन्ति।

अस्मिन् महाकाव्ये केचन सन्निवेशाः अत्यन्तं मधुराः स्पृहणीयाश्च सन्ति। तत्र प्रथमसर्गे कालिदासः पार्वत्याः जनकस्य हिमालयस्य सुन्दरं वर्णनं करोति। काव्यस्य प्रारम्भे मङ्गलाचरणरूपेण एनं श्लोकं रचयति। यथा -

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ वारिनिधी विगाह्य स्थितः पृथिव्या इव मानदण्डः॥

भारतवर्षस्य उत्तरदिग्भागे देवतास्वरूपः हिमालयः इति कश्चन महान् पर्वतराजः अस्ति। सः पूर्वपश्चिमसमुद्रयोः अन्तः अभिव्याप्य भूमण्डलस्य मानकदण्डः इव विराजते।

कालिदासः उपमालङ्कारप्रयोगेण पण्डितलोके सुप्रसिद्धो वर्तते। अतः एव **'उपमा कालिदासस्य'** इति लोकोक्तिः सर्वथा सार्थक्यं भजते। मङ्गलाचरणश्लोके अपि 'स्थितः पृथिव्या इव मानदण्डः' इत्यत्र हिमालयं भूमण्डलस्य मानदण्डम् इव वर्णयन् कालिदासः तस्य एव अलङ्कारस्य प्रयोगं करोति। एवमेव **'वागर्थाविव सम्पृक्तौ', 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्', 'पुष्पराशाविवाग्निः'** इत्यादयः कालिदासस्य सुप्रशस्ताः उपमाप्रयोगाः।

अस्य महाकाव्यस्य प्रथमसर्गे पार्वत्याः विद्याभ्यासवर्णनं कुर्वन् कालिदासः एकम् उत्तमम् उपदेशं ददाति। यथा -

तां हंसमालाश्शरदीव गङ्गां महौषधीं नक्तमिवात्मभासः।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः॥

यथा शरत्काले सहजतया गङ्गानदीं प्रति हंसाः गच्छन्ति, यथा महौषधेः कान्तयः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रात्रौ सहजतया ताम् एव महौषधीम् आश्रित्य तिष्ठन्ति, तथैव गुरोः उपदेशकाले पूर्वजन्मनि अधीताः विद्याः सर्वाः अपि अत्यन्तश्रद्धाशालिन्यां पार्वत्याम् एव प्रतिष्ठिताः आसन्। अचञ्चलमनसा अध्ययनशीला पार्वती सर्वविद्यासु पारङ्गता जाता इत्यर्थः।

कालिदासः अस्मिन् काव्ये गृहस्थाश्रमे आदर्शदम्पत्योः जीवनविधानं हिमालयस्य मेनायाश्च दाम्पत्यमुखेन अस्मान् बोधितवान्। अस्मात् काव्याद् अस्माभिः प्राप्तव्यानि सुभाषितरत्नानि इतोऽपि बहूनि सन्ति।

रघुवंशम्, कुमारसम्भवम्, मेघदूतम् इति एतत् काव्यत्रयम् उद्दिश्य **'लघुत्रयी'** इति पण्डितलोके विख्यातिः वर्तते।

एतादृशस्य असमानप्रज्ञानिधेः कविकुलतिलकस्य कालिदासस्य स्तुतिं कुर्वन्तः अन्ये कवयः एवं भावयन्ति।

कवयः कालिदासाद्याः कवयो वयमप्यमी ।
पर्वते परमाणौ च पदार्थत्वं व्यवस्थितम् ॥

अस्मिन् लोके कविशब्देन कालिदासमपि व्यवहरन्ति। अस्मान् अपि तेनैव शब्देन व्यवहरन्ति। परन्तु वयं कवयः भवितुम् अनर्हाः। यतो हि पदार्थरूपेण पर्वतोऽपि समानः परमाणुरपि समानः। परन्तु पर्वतः महोन्नतः सुविशालश्च परमाणुः अतीवसूक्ष्मः क्षुद्रश्च। अत्र आशयः अयं यत् कालिदासः काव्यसंसारे महापर्वतसदृशः, वयं तस्य पुरतः परमाणुसदृशाः क्षुद्राः इति।

अस्यापि काव्यस्य मल्लिनाथपण्डितः **'सञ्जीविनी'** इति नाम्ना व्याख्यां रचितवान्।

अवधेयांशाः -

- विक्रमादित्यमहाराजस्य आस्थाने नवरत्ननामके पण्डितमण्डले कालिदासः अपि एकः आसीत्।
- पञ्चमहाकाव्येषु 'कुमारसम्भवं' कालिदासेन रचितं द्वितीयं महाकाव्यम्।
- अस्य महाकाव्यस्य मूलकथा शिवपुराणे वर्तते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- अस्मिन् काव्ये १७ सप्तदश सर्गाः, १०९६ षण्णवत्युत्तरसहस्रं श्लोकाः सन्ति।
- अस्मिन् काव्ये अष्टौ (८) एव सर्गाः कालिदासेन रचिताः। अन्ये नव (९) सर्गाः अन्येन कविना रचिताः इति काव्यस्य परिशीलनेन पण्डिताः कथयन्ति।
- कालिदासः उपमालङ्कारस्य प्रयोगे सिद्धहस्तः वर्तते। अत एव तस्य 'उपमा कालिदासस्य' इति कीर्तिः लोके विख्याता।
- रघुवंशम्, कुमारसम्भवम्, मेघदूतम् इत्येतस्य काव्यत्रयस्य 'लघुत्रयी' इति साहित्यजगति व्यवहारो दृश्यते।
- अस्य काव्यस्य मल्लिनाथपण्डितेन रचिता 'सञ्जीविनी' व्याख्या वर्तते।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. कालिदासस्य प्रशस्तिपरकं श्लोकं लिखत।

२. 'नवरत्नानि' इति नाम्ना विक्रमादित्यस्य आस्थाने नवसंख्याकाः विद्वांसः के?

३. कुमारसम्भवमहाकाव्ये कति सर्गाः? कति च श्लोकाः सन्ति?

४. कुमारसम्भवमहाकाव्ये मङ्गलाचरणश्लोकः कः?

५. 'स्थितः पृथिव्या इव मानदण्डः' इत्यत्र कः अलङ्कारः अस्ति?

(II) रिक्तस्थानानि पूरयत।

१. महाराजस्य विक्रमादित्यस्य आस्थाने _____ नाम्ना पण्डिताः आसन्।

२. पञ्चमहाकाव्येषु _____ द्वितीयं महाकाव्यम् अस्ति।

३. कुमारसम्भवे वर्णिता कथा _____ पुराणात् स्वीकृता।

४. वस्तुतः कुमारसम्भवे _____ एव सर्गाः भवेयुरिति पण्डिताः सविश्वासं कथयन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. मल्लिनाथपण्डितः कुमारसम्भवकाव्यस्य _____ नाम्ना व्याख्यां कृतवान्।

(III) समीचीनमुत्तरं चिनुत।

१. विक्रमादित्यस्य आस्थाने अयं कविः आसीत्? ( )

(क) घटकर्परः (ख) अश्वघोषः

(ग) भूषणभट्टः (घ) मुरारिः

२. लघुत्रय्याम् एतत्काव्यं न अन्तर्भवति। ( )

(क) रघुवंशम् (ख) हंसदूतम्

(ग) मेघदूतम् (घ) कुमारसम्भवम्

३. कुमारसम्भवमहाकाव्यस्य मङ्गलाचरणे कः पर्वतः वर्णितः? ( )

(क) सह्यपर्वतः (ख) विन्ध्यपर्वतः

(ग) रैवतकपर्वतः (घ) हिमालयपर्वतः

४. कालिदासस्य कः अलङ्कारः प्रसिद्धः? ( )

(क) उपमा (ख) रूपकम्

(ग) दीपकम् (घ) उत्प्रेक्षा

५. हिमालयस्य धर्मपत्नी का? ( )

(क) अहल्या (ख) अञ्जना

(ग) मेना (घ) सत्यवती

(IV) परस्परं योग्यं योजयत।

१. विक्रमादित्यः	पदार्थत्वं व्यवस्थितम्	( )
२. कुमारसम्भवे श्लोकाः	स्थितः पृथिव्या इव मानदण्डः	( )
३. मल्लिनाथः	नवरत्नानि	( )
४. हिमालयः	२०१६	( )

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. पर्वते परमाणौ च सञ्जीविनी ( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. अनामिका -

२. रत्नानि -

३. मानदण्डः -

४. उपदेशकाले -

५. पुष्पराशिः -

(VI) लघुनिबन्धं रचयत।

१. 'अनामिका सार्थवती बभूव' इत्यस्य प्रसङ्गस्य वृत्तान्तं वर्णयत।

२. कुमारसम्भवमहाकाव्यस्य परिचयं कुरुत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठस्य आधारेण कालिदासस्य कुमारसम्भवमहाकाव्यस्य च समग्रं परिचयम् उपस्थापयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सप्तमः पाठः

किरातार्जुनीयम्

प्रयोजनानि -

⇨ भारविमहाकविना प्रणीतस्य सुतरां प्रौढस्य किरातार्जुनीयमहाकाव्यस्य सम्यक् परिचयम् अनेन पाठेन वयं लभामहे।

⇨ संस्कृतकाव्येषु विद्यमानं भाषासौष्ठवम् अस्य काव्यस्य परिशीलनेन वयं जानीमः।

⇨ एतादृशस्य वैदुष्यपूर्णस्य महाकाव्यस्य अध्ययने अस्मासु श्रद्धाम् अयं पाठः जनयति।

पाठारम्भः -

संस्कृतकाव्यप्रपञ्चे भारविः अत्यन्तं प्रौढः महाकविः वर्तते। अयं 'किरातार्जुनीयमिति' एकमेव प्रौढं महाकाव्यं रचितवान्। अस्य स्तुतिं बहवः कवयः कृतवन्तः। तत्र एकः श्लोकः यथा -

अर्थदीधितिसन्दीप्ता विज्ञपद्मविकासिनी।
ज्ञानालोकसदादर्शा भा रवेरिव भारवेः।।

अर्थगाम्भीर्येण प्रकाशयुक्ता, पण्डितानाम् आनन्ददायिनी, ज्ञानप्रकाशस्य दर्पणरूपा, भारविमहाकवेः वैदुष्यकान्तिः सूर्यकान्तिरिव विराजते।

अयं कविः ई. (६) षष्ठशताब्द्यां पुलकेशिद्वितीयस्य अनुजस्य विष्णुवर्धनमहाराजस्य सभापण्डितः आसीत्। अयं दक्षिणदेशीयः इत्यपि पण्डितलोके निश्चयो वर्तते।

अनेन कविना रचिते किरातार्जुनीयमहाकाव्ये अष्टादशसर्गाः (१८)
एवमेव प्रायः नवत्रिंशदुत्तरसहस्रं (१०३९) श्लोकाः सन्ति।

महाभारतस्य वनपर्वणि विद्यमानाम् एकां कथाम् आश्रित्य एतत्काव्यं रचितमस्ति। पञ्चपाण्डवेषु अर्जुनः वनवासकाले दिव्यानि अस्त्राणि प्राप्तुं शिवस्य निमित्तं हिमालयेषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तपः कृतवान्। तेन तपसा अतीवप्रसन्नः शङ्करः अर्जुनस्य परीक्षां कर्तुं किरातवेषेण आगतवान्। तदा तयोर्मध्ये कश्चन कलहः जातः। तस्मिन्नेव कलहे किरातवेषधारिणा शङ्करेण सह अर्जुनः युद्धं कृतवान्। किरातवेषस्य शङ्करस्य अर्जुनस्य च विषये रचितं काव्यमिति हेतोरेव अस्य काव्यस्य 'किरातार्जुनीयमिति' नाम सार्थकम् अस्ति।

अस्मिन् महाकाव्ये भारविः अल्पैः एव पदैः बहुविशालम् अर्थं बोधयति। अतः एव अस्य काव्ये अर्थगौरविमिति गुणः महान् वर्तते। तेनैव **'भारवेरर्थगौरवम्'** इति कीर्तिः लोके तस्य सञ्जाता।

समाजे जनानाम् अभिरुचिः विभिन्ना भवति। अनेन एकेन काव्येन भिन्नरुचिमतां जनानाम् आमोदः कथं भवितुं शक्यते? इत्यस्य प्रश्नस्य समाधानं कविः एवं वदति। यथा-

स्तुवन्ति गुर्वीमभिधेयसम्पदं विशुद्धिमुक्तेरपरे विपश्चितः।
इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्वमनोरमा गिरः।।

लोके केचन अर्थगाम्भीर्यं प्रशंसन्ति। केचन शुद्धानां सुकुमारललितपदानां प्रयोगे आनन्दम् अनुभवन्ति। एवं विभिन्नरुचिमतां जनानां सर्वेषामपि आमोदजनकानि वचनानि सुदुर्लभानि एव इति अस्य श्लोकस्य भावः।

अस्य काव्यस्य पञ्चमसर्गे पद्मपरागाणां विषये अलौकिकं मनोहरं वर्णनं कविः कृतवान्। तेन **'आतपत्रभारविः'** इति तस्य महती कीर्तिः लोके सुविख्याता। तत्र श्लोकः यथा -

उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसम्भवः परागः ।
वात्याभिर्वियति विवर्तितः समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम् ।।

विकसितकमलवनात् महावेगेन वायुना आकाशे सर्वत्र प्रसारितः पद्मपरागसमूहः सुवर्णच्छत्रस्य शोभां प्रेक्षकाणां मनसि जनयति। पद्मपरागाः कनकवर्णयुक्ताः एव भवन्ति। ते आकाशे यदि सर्वत्र व्याप्ताः चेद् एवमेव सर्वत्र सुवर्णच्छत्रमिव महतीं शोभां जनयन्ति।

मल्लिनाथपण्डितः अस्य काव्यस्य स्पष्टतया अर्थावगमनार्थं **'घण्टापथम्'** इति नाम्ना काञ्चित् व्याख्यां लिखितवान्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्मिन् महाकाव्ये अस्माकं जीवने शिक्षणीयानि उत्तमानि सुभाषितानि बहूनि सन्ति। तेषु एकं महोत्तमं प्रसिद्धं च सुभाषितं भारवेः अत्र पश्यामः।

सहसा विदधीत न क्रियाम् अविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।

त्वरया अविवेकेन वा सम्यक् अविचार्य यत्किमपि कार्यं न करणीयम्। अविवेकेन कृतं कार्यम् अस्माकं जीवने अत्यन्तम् अनर्थदायकं दुःखकारकं च भवति। विवेकेन सम्यक् विचिन्त्य यः उत्तमं कार्यं करोति, तस्यैव वशे गुणानुरागिण्यः सम्पदः वसन्ति। तात्पर्यमिदम् अस्ति यत् बुद्धिमतः विवेकशीलस्य सर्वाणि अपि कार्याणि शुभदायकानि ऐश्वर्यकारकाणि च भवन्ति।

अवधेयांशाः -

- भारविमहाकविः 'किरातार्जुनीयमिति' नाम्ना एकं प्रौढं काव्यं रचितवान्।
- अयं क्रीस्तुशकस्य षष्ठशताब्दीयः वर्तते।
- अयं पुलकेशिद्वितीयस्य अनुजस्य विष्णुवर्धनमहाराजस्य आस्थानपण्डितः आसीत्।
- किरातार्जुनीयमहाकाव्ये अष्टादश (१८) सर्गाः, नवत्रिंशदुत्तरसहस्रं (१०३९) श्लोकाः सन्ति।
- महाभारतस्य वनपर्वणि विद्यमानाम् एकां कथाम् आश्रित्य काव्यस्य अस्य रचना जाता।
- अस्मिन् महाकाव्ये भारवेः 'अर्थगौरवम्' इति कश्चन विशिष्टः गुणः सर्वत्र दृष्टिगोचरो भवति।
- पद्मपरागाणां सुन्दरं वर्णनं कृतवान् इति कारणात् भारवेः 'आतपत्रभारविः' इति कीर्तिः लोके प्रसिद्धा।
- अस्य काव्यस्य मल्लिनाथपण्डितः 'घण्टापथम्' इति नाम्ना समीचीनम् एकं व्याख्यानं लिखितवान्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. भारविमहाकवेः काव्यं किमस्ति?

२. किरातार्जुनीयमिति काव्यस्य नाम केन हेतुना सार्थकमस्ति?

३. आतपत्रभारविः इति भारविमहाकवेः केन कारणेन इयं कीर्तिः जाता?

४. भारविमहाकवेः स्तुतिपरकः श्लोकः कः?

(II) रिक्तस्थानानि पूरयत।

१. भारविः क्री.श. _____ शताब्द्याम् आसीत्।

२. भारविः _____ महाराजस्य सभापण्डितः आसीत्।

३. किरातार्जुनीयमहाकाव्ये _____ सर्गाः सन्ति।

४. किरातार्जुनीयमहाकाव्यस्य मल्लिनाथपण्डितः _____ नाम्ना व्याख्यां रचितवान्।

(III) समीचीनमुत्तरं चिनुत।

१. किरातार्जुनीयकाव्यस्य कथा महाभारतस्य कस्मिन् पर्वणि वर्तते? ( )

(क) वनपर्वणि (ख) सभापर्वणि

(ग) शान्तिपर्वणि (घ) द्रोणपर्वणि

२. अर्जुनं परीक्षितुं शङ्करः केन वेषेण आगतवान्? ( )

(क) धीवरवेषेण (ख) कैवर्तवेषेण

(ग) निषादवेषेण (घ) किरातवेषेण

३. भारविः अल्पैः एव पदैः विशालमर्थं बोधयति इति हेतोः अस्य लोके इयं कीर्तिरस्ति। ( )

(क) पदगौरवम् (ख) रसगौरवम्

(ग) अर्थगौरवम् (घ) गुणगौरवम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(IV) परस्परं योग्यं योजयत।

१. किरातार्जुनीयम्	२०३१	( )
२. घण्टापथम्	प्रौढं महाकाव्यम्	( )
३. किरातार्जुनीये श्लोकाः	मल्लिनाथव्याख्या	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. पद्मम् -

२. रविः -

३. रुचिः -

४. आतपत्रम् -

५. अविवेकः -

(VI) लघुनिबन्धं रचयत।

१. भारविमहाकवेः परिचयं प्रदत्त।

२. 'सहसा विदधीत न क्रियाम्' इत्यस्य श्लोकस्य विवरणं कुरुत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठस्य माध्यमेन भारविमहाकवेः किरातार्जुनीयमहाकाव्यस्य च समग्रं परिचयं लिखत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अष्टमः पाठः

शिशुपालवधम्

प्रयोजनानि -

⇨ काव्यप्रपञ्चे महाकवेः माघस्य वैदुष्यपूर्णे 'शिशुपालवध'नामके महाकाव्येऽस्मिन् अस्माकं पर्याप्तः परिचयः अनेन पाठेन लभ्यते।

⇨ काव्येषु माघकाव्यस्य यदनुपमं स्थानमस्ति, तदस्मिन् पाठे संक्षेपेण वर्णितमस्ति।

⇨ संस्कृते वैदुष्यं प्राप्तुमिच्छुकैः श्रद्धावद्भिः छात्रैः अवश्यं काव्यमेतत् पठनीयमिति पाठोऽयं प्रेरयति।

पाठारम्भः -

संस्कृतकाव्यविनीलाकाशे महाकविः माघः महातेजश्शालि नक्षत्रं भवति। तस्य महाकवेः एकमेव अनर्घरत्नसदृशं काव्यं 'शिशुपालवधम्' इति नाम्ना पञ्चमहाकाव्येषु प्रसिध्यति। माघकाव्यपठनेन मेघसन्देशकाव्यपठनेन च पण्डितानां समस्तमपि जीवितं व्यतीतम्। अतः एव **'माघे मेघे गतं वयः'** इति इयं प्रशस्तिः प्रसिद्धा। अस्मिन् काव्ये बहवः अमूल्याः शास्त्रीयविषयाः निक्षिप्ताः सन्ति। तेषां ज्ञानेन मननेन चिन्तनेन च कालः महान् गच्छति इत्येतद् वाक्यस्य अभिप्रायः। माघकाव्ये शब्दवैदुष्यं सुमहद् वर्तते। केवलं नवसर्गाणां पठनेन सम्पूर्णशब्दकोशस्य अभिज्ञानं जायते। अतः एव **'नवसर्गगते माघे नवशब्दो न विद्यते'**। एवं महायशस्सम्पन्नस्य माघकाव्यस्य प्रसङ्गे **'काव्येषु माघः'** (महाकाव्येषु माघकाव्यं श्रेष्ठम्) इति कीर्तिः सुप्रशस्ता।

कालिदासस्य उपमापाण्डित्यम्, भारवेः अर्थगौरवम्, दण्डिकवेः ललितपदवैदुष्यम् एते त्रयोऽपि गुणाः माघमहाकवौ सुप्रतिष्ठिताः। अत एव उक्तम् -

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

माघकविः 'श्रीमालनगरे' (भिन्नमालनगरे) सुप्रसिद्धधनिकपरिवारे जन्म लब्धवान्। तस्य पितामहः **सुप्रभदेवः** श्रीवर्मलमहाराजस्य आस्थाने प्रधानमन्त्री आसीत्। तथैव तस्य पिता **'दत्तकः'**महाधार्मिकः, उदारशीलः च। ई. ६७५ तमवर्षस्य समीपकाले अयं कविः आसीदिति विमर्शकनाम् अभिप्रायः।

अनेन महाकविना विरचिते शिशुपालवधमहाकाव्ये विंशतिः (२०) सर्गाः सन्ति। एवं प्रायः १६५० पञ्चाशदुत्तरषोडशशतं श्लोकाः च सन्ति। महाभारतस्य सभापर्वणि, श्रीमद्भागवतस्य दशमस्कन्धे च विद्यमानं कृष्णशिशुपालवृत्तान्तम् आधारीकृत्य काव्यमिदं विरचितम्।

अस्मिन् काव्ये दुरात्मनः, दुराचारपरायणस्य शिशुपालस्य संहारं श्रीकृष्णः कृतवान्। इयमेव काव्येऽस्मिन् मुख्या कथा। अस्मिन् महाकाव्ये न केवलं शब्दप्रयोगे वैदुष्यम्, अपि तु महाकविना पदे पदे नीतिशास्त्रस्य राजनीतेः ज्यौतिष - सांख्य - योग -दर्शनशास्त्रेषु अपेक्षाम् अनुसृत्य अनुपमम् अद्वितीयं प्रतिभावैभवं प्रादर्शयत्।

प्रथमसर्गे स्वीयगृहमागतं नारदमहर्षिम् अतिथिसत्कारैः पूजयन् परमश्रद्धया भक्त्या च अतीवविनम्रः सन् श्रीकृष्णः नारदेन एवं वदति।

हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥

भवतः (नारदस्य) आगमनेन दर्शनेन च अधुना अस्माकं (श्रीकृष्णस्य) पापनाशः भवति। तथा आगामिकाले यत्किमपि मङ्गलं भविष्यति चेत् तस्य भवतः आगमनमेव कारणम्। पूर्वम् अस्माभिः कृतानाम् अनेकेषां पुण्यानां कारणादेव भवान् अस्माकं गृहमागतः। एवं भवतः दर्शनेन वयं पूर्वकाले वर्तमानकाले भविष्यकालेऽपि (कालत्रयेऽपि) योग्याः कृतार्थाः धन्याः भवेम इति अस्य श्लोकस्य भावः।

अस्मिन् श्लोके भारतीयसदाचारस्य भव्यसंस्कृतेः सभ्यतायाश्च अभिवर्णनेन तादृशमहोन्नतसंस्काराः अस्मास्वपि भवेयुरिति प्रेरणा जायते। एवमीदृशस्य अप्रतिमप्रतिभाधनस्य माघकवेः काव्येऽस्मिन् प्रकृतिवर्णनम् अतीवरमणीयं कमनीयं च वर्तते। नदीनदानाम्, पर्वतानाम्, ऋतूणां सूर्यचन्द्रयोः उदयस्य अस्तमयस्य च वर्णनानि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतीवमनोहराणि सहृदयानां हृदयानि रञ्जयन्ति। तादृशमेव एकं श्लोकरत्नम् अत्र आलोकयामः।

उदयति विततोर्ध्वरश्मिरज्ञा-
वहिमरुचौ हिमधाम्नि याति चास्तम् ।
वहति गिरिरयं विलम्बिघण्टा-
द्वयपरिवारितवारणेन्द्रलीलाम् ॥

अत्र रैवतकपर्वते सूर्योदयस्य सुन्दरं वर्णनमेतत्। सूर्योदयस्य चन्द्रास्तमयस्य च अयं सन्धिकालः। प्रातःसन्ध्यासमयः इत्यर्थः। अस्मिन् काले अग्रभागे स्वर्णघण्टया पृष्ठभागे रजतघण्टया च विराजमानस्य गजेन्द्रस्य शोभाम् अयं पर्वतः धारयतीव दृश्यते।

अग्रभागे उदयतः सूर्यबिम्बस्य सुवर्णच्छाया भवतीति हेतोः, अस्तंगच्छतः चन्द्रबिम्बस्य रजतच्छाया भवतीति हेतोः एवंविधेन घण्टाद्वयेन गजेन्द्ररूपः पर्वतः शोभते इत्येवमर्थः अवगन्तव्यः। अनेन वर्णनेन एव माघकवेः **'घण्टामाघः'** इति लोके प्रशस्तिः सञ्जाता।

अस्य महाकाव्यस्य महापण्डितेन मल्लिनाथेन **'सर्वङ्कषा'** इति नाम्ना अतीवभावगम्भीरं वैदुष्यपूर्णं व्याख्यानं लिखितम्।

व्याख्यानस्य प्रारम्भे काव्यस्यास्य प्रशंसां कुर्वन् मल्लिनाथः एवं वदति।

ये शब्दार्थपरीक्षणप्रणयिनो ये वा गुणालङ्क्रिया-
शिक्षाकौतुकिनो विहर्तुमनसो ये च ध्वनेरध्वनि ।
क्षुभ्यद्भावतरङ्गिते रससुधापूरे मिमङ्क्षन्ति ये
तेषामेव कृते करोमि विवृतिं माघस्य सर्वङ्कषाम् ॥

ये शब्दवैदुष्ये प्रीतिमन्तः, अलङ्कारगुणादिविषये कुतूहलिनः, ध्वनिमार्गे विहर्तुम् इच्छुकाः, समधिकमनोहरभावबन्धुरे सुललितरसामृतमये सुन्दरतडागरूपे काव्येऽस्मिन् ये मज्जितुम् इच्छन्ति, तेषाम् आनन्दाय एव अहं (मल्लिनाथः) काव्यस्यास्य 'सर्वङ्कषा' इति नाम्ना व्याख्यां करोमि इति अस्य श्लोकस्य भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अवधेयांशाः -

- शिशुपालवधमहाकाव्यस्य रचयिता महाकविः माघः।
- अस्मिन् महाकाव्ये शब्दपाण्डित्यं सम्यग् वर्तते इत्यतः 'नवसर्गगते माघे नवशब्दो न विद्यते' इति लोकोक्तिः सुप्रसिद्धा।
- महाकविः माघः श्रीमालनगरे जन्म लब्धवान्। तस्य पितामहः सुप्रभदेवः पिता च दत्तकः।
- अयं क्री.श.६७५ समीपकाले आसीत्।
- शिशुपालवधमहाकाव्ये २० सर्गाः, प्रायः १६५० श्लोकाः सन्ति।
- अत्र महाभारतस्य सभापर्वणि विद्यमानः कृष्णशिशुपालवृत्तान्तः इतिवृत्तरूपेण स्वीकृतः।
- घण्टामाघः इति माघकवेः प्रशस्तिः वर्तते।
- अस्य काव्यस्य सर्वङ्कषा इति नाम्ना मल्लिनाथपण्डितेन व्याख्या रचिता।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. शिशुपालवधस्य रचयिता कः?

२. माघे मेघे गतं वयः इत्यस्य वाक्यस्य अभिप्रायः कः?

३. 'नवसर्गगते माघे नवशब्दो न विद्यते' इत्यस्य वाक्यस्य आशयः कः?

४. माघे विद्यमानाः त्रयः गुणाः के?

५. माघः अस्मिन् काव्ये केषु केषु शास्त्रेषु प्रतिभावैभवं प्रादर्शयत्?

(II) रिक्तस्थानानि पूरयत।

१. माघकविः _____ नगरे जन्म लब्धवान्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. माघस्य पितामहः _____।

३. माघकविः _____ काले आसीदिति विमर्शकाः वदन्ति।

४. माघकाव्ये _____ सर्गाः सन्ति।

५. _____ इति प्रशस्तिः माघकवेः प्रसिद्धा।

(III) समीचीनमुत्तरं चिनुत।

१. काव्येषु _____ इति प्रसिद्धा। ( )

(क) माघः (ख) भारविः

(ग) बाणः (घ) मङ्खः

२. माघकवेः पिता आसीत्। ( )

(क) दत्तकः (ख) भावुकः

(ग) मम्मटः (घ) कल्हणः

३. महाभारतस्य सभापर्वणि भागवतस्य दशमस्कन्धे च विद्यमानं कृष्णशिशुपालवृत्तान्तं स्वीकृत्य रचितं काव्यं किम् ? ( )

(क) श्रीकृष्णशिशुपालीयम् (ख) शिशुपालसंहारः

(ग) शिशुपालवधम् (घ) कृष्णचरितम्

४. श्रीकृष्णस्य गृहं कः आगतवान्? ( )

(क) नारदः (ख) तुम्बुरुः

(ग) जाबालिः (घ) शौनकः

५. माघकाव्यस्य केन नाम्ना मल्लिनाथः व्याख्यां रचितवान्? ( )

(क) कूलङ्कषा (ख) चन्द्रिका

(ग) विद्योतिनी (घ) सर्वङ्कषा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(IV) परस्परं योग्यं योजयत।

१. माघे सन्ति	२६५०	( )
२. शिशुपालवधकाव्ये श्लोकाः	व्यनक्ति कालत्रितये पि योग्यताम्	( )
३. शरीरभाजां भवदीयदर्शनं	त्रयो गुणाः	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. मेघः -

२. गुणाः -

३. गिरिः -

४. गजेन्द्रः -

५. शुभम् -

(VI) लघुनिबन्धं रचयत।

१. महाकवेः माघस्य परिचयं लिखत।

२. **'उदयति विततोर्ध्व...'** इत्यस्य श्लोकस्य विवरणं कुरुत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठम् आधारीकृत्य माघकवेः शिशुपालवधमहाकाव्यस्य च समग्रं परिचयं लिखत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नवमः पाठः

नैषधीयचरितम्

प्रयोजनानि -

⇨ पञ्चमहाकाव्येषु अतीव प्रौढस्य सुविपुलस्य नैषधीयचरितमहाकाव्यस्य संक्षेपेण परिचयः अस्य पाठस्य अध्ययनेन जायते।

⇨ संस्कृतभाषायाम् असाधारणवैदुष्यं वर्णनसामर्थ्यं प्राप्तुम् इच्छुकानां छात्राणां कृते काव्यस्यास्य अध्ययनम् अवश्यं कर्तव्यम्।

⇨ अस्य काव्यस्य रचयितुः श्रीहर्षस्य प्रतिभावैभवमपि ज्ञातुं शक्नुमः।

पाठारम्भः -

संस्कृतकाव्यपरम्परायां 'नैषधीयचरितम्' असामान्यवैदुष्येण विचित्रशब्दविन्यासेन नानाशास्त्र-निगूढज्ञानेन वर्णनचातुर्येण च विलसितं विशालकायं महाकाव्यं वर्तते। अस्य काव्यस्य प्रणेता महाकविः श्रीहर्षः।

किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितम् इति एतत् काव्यत्रयं मिलित्वा **'बृहत्त्रयी'** इति नाम्ना लोके सुविख्यातम्

अस्यां बृहत्त्रय्यां पूर्वस्य काव्यद्वयस्य अपेक्षया एतत् काव्यम् आकारदृष्ट्या पाण्डित्यदृष्ट्या अतीवविशालं गम्भीरं च। अतः एव -

'उदिते नैषधे काव्ये क्व माघः क्व च भारविः' इति नैषधकाव्यस्य अपेक्षया भारवेः किरातार्जुनीयं, माघस्य शिशुपालवधम् एतद् द्वयमपि अधिकं न शोभते इति पण्डितानाम् अभिप्रायः। अस्य काव्यस्य अध्ययने पण्डितानाम् अपि वैदुष्यपरीक्षणं भवति। अत एव **'नैषधं विद्वदौषधम्'** (नैषधकाव्यं विदुषामपि औषधमिव किञ्चित् कष्टकरम्।) इति इयं कीर्तिः वर्तते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महाकवेः श्रीहर्षस्य **माता मामल्लदेवी पिता श्रीहीरः** च वर्तते। अयं कान्यकुब्जमहाराजस्य **जयचन्द्रस्य (जयन्तचन्द्रस्य)** आस्थानपण्डितः आसीत्। अस्य कालः क्रीस्तुशकं द्वादशशताब्द्याः (१२) उत्तरार्धः स्यादिति विमर्शकाः अभिप्रयन्ति।

अनेन महाकविना बहवः ग्रन्थाः रचिताः। परन्तु **'नैषधीयचरितम्'** इति महाकाव्यं **'खण्डनखण्डखाद्यम्'** इति विमर्शग्रन्थः एतत् द्वयमेव अस्य लभ्यते। तत्र महाकाव्यजगति सुप्रसिद्धे नैषधीयचरितमहाकाव्ये नलस्य दमयन्त्याश्च परस्परप्रणयवृत्तान्तः वर्णितः। नलदमयन्त्योः इयं कथा महाभारतस्य वनपर्वणः गृहीता। अस्मिन् महाकाव्ये द्वाविंशतिः सर्गाः (२२), प्रायः नवनवत्यधिकषट्षतोत्तरद्विसहस्रं (२६९९) श्लोकाः सन्ति।

महाकविः श्रीहर्षः न केवलं काव्यरचनायां प्रवीणः, अपि तु व्याकरण-न्याय-मीमांसा-वेदान्त-वास्तु-सामुद्रिकाशास्त्रेषु तस्य अप्रतिमा प्रतिभाशक्तिः विद्योतते। अतः एव नलदमयन्त्योः लघ्वीं कथां स्वीकृत्य कविः वैदुष्येण वर्णनविस्तरेण च द्वाविंशतिसर्गात्मकं विशालं काव्यं प्रणीतवान्। अतः एव अस्मिन् काव्ये कथापेक्षया वर्णनमेव बहु विस्तृतम्।

नलस्य पराक्रमेण सह सूर्यः, कीर्त्या सह चन्द्रः बहुधा प्रतिस्पर्धां कुरुतः इति ब्रह्मा विचिन्तयन् तयोः सूर्यचन्द्रयोः गोलाकारवलयेन अवधिं कृतवान्। सूर्यः चन्द्रः उभौ अपि वलयाकारौ स्तः। तेन वलयेन द्वौ अपि अतीव परिमितौ। परन्तु पराक्रमेण कीर्त्या च नलः अपरिमितः, बहुप्रसिद्धः इत्येनं वर्णनप्रधानं भावं प्रकटयन्तं श्लोकम् अत्र पश्यामः।

तदोजसस्तद्यशसः स्थितावुभौ
वृथेति चित्ते कुरुते यदा यदा ।
तनोति भानोः परिवेषकैतवात्
तदा विधिः कुण्डलनां विधोरपि ॥

एकदा नलः वने विहरन् सुन्दरम् एकं हंसं कराभ्यां गृहीतवान्। तदा सः हंसः भयेन व्याकुलः सन् दीनानि वचनानि वदन् मां त्यजतु इति प्रार्थयति। तस्मिन्नेव प्रसङ्गे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अयं श्लोकः यथा -

मदेकपुत्रा जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दयन्
अहो विधे त्वां करुणा रुणद्धि नो ॥

मम माता वृद्धा गृहे वर्तते। तस्याः अहम् एकः एव पुत्रः। मम पत्न्याः सम्प्रति प्रसवकालः समीपे वर्तते। तयोः अहमेकः एव संरक्षकः। तादृशं दीनं मां पीडयन् हे ब्रह्मन् तव मनसि करुणा न जायते? नलस्य पाणिबन्धेन पीडिते मयि (हंसे) हे ब्रह्मदेव तव करुणा किमर्थं न जायते? इति श्लोकस्यास्य भावः।

अस्मिन् महाकाव्ये एतादृशैः वर्णनप्रधानैः श्लोकैः सह सुललितपदैः युक्ताः श्लोकाः अपि बहवः सन्ति। अतः एव **'नैषधे पदलालित्यम्'** इति अस्य काव्यस्य विषये पण्डितानाम् अभिप्रायो वर्तते। एवं ललितपदयुक्तं श्लोकमेतम् अवश्यं पठन्तु।

नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे ।
अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम् ॥

एवं बहुविधैः गुणविशेषैः परिपूरितस्य अस्य काव्यस्य अध्ययनेन व्यवहारज्ञानं, शास्त्रपाण्डित्यं, भाषावैदुष्यमपि वयं प्राप्नुयाम।

एतस्य महाकाव्यस्य मल्लिनाथसूरिणा **'जीवातुः'** इति नाम्ना अत्यन्तं सारगर्भितं व्याख्यानं रचितम्।

एतस्य महाकाव्यस्य मल्लिनाथसूरिणा **'जीवातुः'** इति नाम्ना अत्यन्तं सारगर्भितं व्याख्यानं रचितम्।

अवधेयांशाः -

- नैषधीयचरितमहाकाव्यस्य प्रणेता महाकविः श्रीहर्षः।
- किरातार्जुनीयं, शिशुपालवधं, नैषधीयचरितं च इत्येतत्काव्यत्रयं मिलित्वा बृहत्त्रयी इति नम्ना लोके कीर्तितम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- बृहत्त्रय्यां पाण्डित्येन आकारेण च नैषधीयचरितम् अतीव गभीरं विशालं च काव्यमस्ति।
- श्रीहर्षस्य माता मामल्लदेवी पिता च श्रीहीरः वर्तते।
- अयं द्वादशशताब्द्याः उत्तरार्धे कान्यकुब्जमहाराजस्य जयन्तचन्द्रस्य आस्थानकविः आसीत्।
- नैषधीयचरितमहाकाव्ये विद्यामाना नलदमयन्तीकथा महाभारतस्य वनपर्वणः गृहीता।
- अस्मिन् महाकाव्ये २२ सर्गाः, प्रायः २६९९ श्लोकाः सन्ति।
- जीवातुः इति नाम्ना मल्लिनाथसूरिणा अस्य काव्यस्य व्याख्यानं रचितम्।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. श्रीहर्षस्य ग्रन्थद्वयं किम्?

२. बृहत्त्रयीति केषां त्रयाणां काव्यानां नाम वर्तते?

३. उदिते नैषधे काव्ये क्व माघः क्व च भारविः इति वाक्यस्य कः आशयः?

४. नैषधं विद्वदौषधम् इति वाक्यस्य आशयः कः?

(II) रिक्तस्थानानि पूरयत।

१. श्रीहर्षस्य माता _____।

२. श्रीहर्षः _____ महाराजस्य आस्थानपण्डितः आसीत्।

३. नलदमयन्त्योः कथा महाभारतस्य _____ पर्वणि वर्तते।

४. नलस्य पराक्रमेण _____ स्पर्धां करोति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(III) समीचीनमुत्तरं चिनुत।

१. श्रीहर्षस्य पिता कः? ( )

(क) श्रीहीरः (ख) श्रीमल्लः

(ग) श्रीघरः (घ) श्रीकरः

२. श्रीहर्षेण रचितः विमर्शग्रन्थः कः? ( )

(क) सिद्धान्तलेशसंग्रहः (ख) प्रौढमनोरमा

(ग) खण्डनखण्डखाद्यम् (घ) रसगङ्गाधरः

३. नैषधीयचरिते कति सर्गाः सन्ति? ( )

(क) २७ (ख) २९ (ग) २० (घ) २२

४. नलस्य कीर्त्या सह कः स्पर्धां करोति? ( )

(क) चन्द्रः (ख) जयन्तः

(ग) नलकूबरः (घ) प्रद्युम्नः

(IV) परस्परं योग्यं योजयत।

१. श्रीहर्षस्य कालः जीवातुः ( )

२. नैषधीयचरिते श्लोकाः क्री.श.१२ शताब्द्याः उत्तरार्धः( )

३. नैषधस्य मल्लिनाथेन रचिता व्याख्या २६११ ( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. औषधम् -

२. विधिः -

३. यशः -

४. जननी -

५. करुणा -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(VI) लघुनिबन्धं रचयत।

१. श्रीहर्षमहाकवेः परिचयं लिखत।

२. 'तदोजसस्तद्यशसः....' इत्यस्य श्लोकस्य विवरणं कुरुत।

३. 'मदेकपुत्रा जननी...' इत्यस्य श्लोकस्य विवरणं कुरुत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठस्य माध्यमेन श्रीहर्षमहाकवेः नैषधीयमहाचरितमहाकाव्यस्य च समग्रं वृत्तान्तम् उपस्थापयत।

परियोजना

पञ्चमहाकाव्येषु प्रसिद्धश्लोकानां सङ्ग्रहं कृत्वा तान् सर्वान् अपि श्लोकान् कण्ठस्थीकुरुत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्थखण्डः

गद्यकाव्यद्वयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दशमः पाठः

दशकुमारचरितम्

प्रयोजनानि -

⇨ गद्यकाव्येषु सुप्रसिद्धस्य सुललितपदयुक्तस्य मनोहरस्य 'दशकुमारचरितं' नामकस्य गद्यकाव्यस्य परिचयः पाठे अस्मिन् प्रदत्तः।

⇨ अस्य काव्यस्य लेखकः महाकविः दण्डी। एतस्य कवेः परिचयः अपि अनेन पाठेन ज्ञायते।

⇨ कथासु प्रीतिमतां छात्राणां गद्यकाव्यमेतत् अवश्यम् अध्येतव्यम् इति प्रेरणा अपि इतः प्राप्यते।

पाठारम्भः -

कविवरेण्यः दण्डी सप्तमशताब्दीयः काञ्चीपुरवासी आसीत्। अस्य माता **पौरीदेवी पिता च वीरदत्तः**। अयं 'भारविमहाकवेः पौत्रः' इत्यपि लोके प्रचारः वर्तते। अस्य नाम दण्डी वा उत अन्यत् किमपि वर्तते वा इत्यत्र प्रमाणं नास्ति। दशकुमारचरितगद्यकाव्यस्य मङ्गलाचरणश्लोके दण्डशब्दं बहुवारं प्रयुक्तवान् इति हेतोः अयं कविसमाजे 'दण्डी' इति नाम्ना प्रसिद्धो जातः इति कश्चन वादः। **'पल्लवनृपतेः राजवर्मणः'** आस्थानपण्डितः अयं कविः आसीत्।

अस्य महाकवेः स्तुतिपरकाः श्लोकाः बहवः सन्ति। तेषु अयमेकः श्लोकः -

जाते जगति वाल्मीकौ कविरित्यभिधाभवत् ।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥

लोके सर्वप्रथमतया 'कविः' कः? इति चेत् वाल्मीकिरिति प्रसिद्धः। तदनन्तरं व्यासमहर्षेः आगमनात् वाल्मीकिव्यासौ द्वौ अपि 'कवी' इति प्रसिद्धौ। तथैव तव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(दण्डिनः) जननात् लोके वाल्मीकिव्यासदण्डिनः त्रयः अपि 'कवयः' इति प्रसिद्धाः सम्पन्नाः इति अस्य श्लोकस्य भावः।

वस्तुतः वाल्मीकिव्यासयोः अनन्तरं तादृशैः मृदुमधुरललितवचोभिः काव्यरचनां कर्तुं समर्थः महाकविः 'दण्डी' एव। अतः **'दण्डिनः पदलालित्यम्'** (दण्डिकवेः काव्येषु पदानि अतीव ललितानि भवन्ति) इति कीर्तिः पण्डितलोके सुप्रसिद्धा।

दण्डिकविना त्रयः ग्रन्थाः प्रणीताः। तेषां त्रयाणां ग्रन्थानां विषयेऽपि महती ख्यातिर्वर्तते। यथा-

त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः।।

यथा त्रयः अग्नयः, त्रयः वेदाः, त्रयः देवाः, त्रयः गुणाः सर्वत्र प्रसिद्धाः। तथैव महाकवेः दण्डिनः त्रयः ग्रन्थाः अपि त्रिषु लोकेषु प्रसिद्धाः इति श्लोकतात्पर्यम्। ते च त्रयः ग्रन्थाः एते सन्ति।

दण्डिकवेः कृतयः

१. काव्यादर्शः -	अयम् अलङ्कारशास्त्रस्य लक्षणग्रन्थः।
२. दशकुमारचरितम्	- एतत् सुप्रसिद्धं गद्यकाव्यम्।
३. अवन्तिसुन्दरीकथा	- अयं कथानां सङ्कलनात्मकः कश्चन ग्रन्थः।

'दशकुमारचरितम्' गद्यकाव्येषु सुप्रशस्तं गद्यकाव्यम्। अस्मिन् गद्यकाव्ये त्रयः भागाः सन्ति। प्रथमभागे पूर्वपीठिका वर्तते। अस्यां पूर्वपीठिकायां पञ्च (५) उच्छ्वासाः सन्ति। द्वितीयभागे उत्तरपीठिका वर्तते। अस्याम् उत्तरपीठिकायाम् अष्ट (८) उच्छ्वासाः सन्ति। तृतीयभागे उपसंहारो वर्तते।

प्रथमभागः	(पूर्वपीठिका) ५ उच्छ्वासाः
द्वितीयभागः	(उत्तरपीठिका) ८ उच्छ्वासाः
तृतीयभागः	(उपसंहारः)

मगधवंशीयानां 'दश' राजकुमाराणां चरित्रं वर्णितमस्ति इति कारणादेव अस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

काव्यस्य 'दशकुमारचरितमिति' सार्थकं नाम वर्तते। ते च दशराजकुमाराः एते सन्ति।

दशकुमाराः

१. राजवाहनः	६. अर्थपालः
२. सोमदत्तः	७. प्रमतिः
३. पुष्पोद्भवः	८. मित्रगुप्तः
४. अपहारवर्मा,	९. मन्त्रगुप्तः
५. उपहारवर्मा,	१०. विश्रुतः

अस्मिन् महाकाव्ये गद्यम् अतीव सुन्दरं, ललितपदघटितमिति पूर्वमेव ज्ञातम्। तादृशस्य गद्यस्य कश्चिद् भागम् अत्र वयं पश्यामः।

अस्ति समस्तनगरीनिकषायमाणा शश्वदगण्यपण्यविस्तारितमणिगणादि-वस्तुजातव्याख्यातरत्नाकरमाहात्म्या मगधदेशशेखरीभूता 'पुष्पपुरी' नाम नगरी।

तत्र वीरभटपटलोत्तरङ्गतुरङ्गकुञ्जरमकरभीषणसकलरिपुगण-कठकजलनिधिमयनमन्दरायमानसमुद्दण्डभुजदण्डः, पुरन्दरपुराङ्गण-वनविहरणपरायणतरुणगणिकागणजेगीयमानयातिमानया शरदिन्दुवृन्द-घनसारनीहारहारमृणालमरालसुरगजनीरक्षीरगिरिशाट्टहासकैलास-काशनीकाशमूर्त्या रचितदिगन्तरालपूर्त्या कीर्त्याभितः सुरभितः, स्वर्लोकशिखरोरुरुचिररत्नरत्नाकरवेलामेखलायितधरणीरमणीसौभाग्य-भोगभाग्यवान्, अनवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासम्भार-भासुरभूसुरनिकरः, विरचितारातिसन्तापेन प्रतापेन सततुलित-वियन्मध्यहंसः, राजहंसो नाम घनदर्पकन्दर्पसौन्दर्यसोदर्यहृद्यनिरवद्यरूपो भूपो बभूव।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्य गद्यकाव्यस्य अयमेव प्रथमः गद्यभागः। अस्मिन् गद्यभागे मगधसाम्राज्य-चक्रवर्तिनः चन्द्रवंशीयस्य राजहंसमहाराजस्य महाद्भुतं वर्णनं वर्तते।

अवधेयांशाः -

- महाकविः दण्डी दशकुमारचरितनामकस्य गद्यकाव्यस्य रचयिता।
- सप्तमशताब्दीयः अयं कविः काञ्चीपुरवासी आसीत्।
- अस्य कवेः माता पौरीदेवी पिता च वीरदत्तः।
- अयं भारविमहाकवेः पौत्रः इति लोके श्रूयते।
- अयं पल्लववंशमहाराजस्य राजवर्मणः आस्थानकविः आसीत्।
- काव्यादर्शः, दशकुमारचरितम्, अवन्तिसुन्दरीकथा इति अस्य कवेः त्रयः ग्रन्थाः सुप्रसिद्धाः।
- काव्यादर्शे पूर्वपीठिका उत्तरपीठिका उपसंहारः इति त्रयः भागाः सन्ति।
- मगधवंशीयानां दशानां राजकुमाराणां वर्णनम् अत्र कृतम् इत्यतः अस्य ग्रन्थस्य नाम दशकुमारचरितम् इति जातम्।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. दशकुमारचरितगद्यकाव्यस्य रचयिता कः?

२. महाकवेः दण्डिनः कति ग्रन्थाः सन्ति?

३. दशकुमारचरित्रे कति भागाः सन्ति?

४. दण्डिकवेः स्तुतिपरकः श्लोकः कः?

५. अस्य कवेः दण्डी इति नाम कथम् आगतम्?

(II) रिक्तस्थानानि पूरयत।

१. दण्डिमहाकविः _____ शताब्दीयः।

२. दण्डी भारविकवेः _____ स्यादिति लोकप्रचारः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. दण्डिकवेः काव्यादर्शः _____ [illegible]

४. दशकुमारचरित्रे दश _____ [illegible]

(III) समीचीनमुत्तरं चिनुत।

१. दण्डिकविः कस्मिन् पुरे वसति स्म? ( )

(क) मद्रपुरे (ख) काञ्चीपुरे

(ग) स्वर्णपुरे (घ) गर्तपुरे

२. महाकवेः दण्डिनः माता का वर्तते। ( )

(क) पौरीदेवी (ख) भद्रादेवी

(ग) दयादेवी (घ) मायादेवी

३. दण्डिमहाकवेः दशकुमारचरित्रे विद्यमानः प्रधानगुणः कः? ( )

(क) वर्णलालित्यम् (ख) पदलालित्यम्

(ग) अर्थनैयत्यम् (घ) वाक्यवैचित्र्यम्

४. दण्डिनः ग्रन्थेषु कथासंकलनात्मकः ग्रन्थः कः? ( )

(क) भोजप्रबन्धः (ख) हर्षचरितम्

(ग) विद्धसालभञ्जिका (घ) अवन्तिसुन्दरीकथा

(IV) परस्परं योग्यं योजयत।

१. दण्डिकवेः पिता — मगधचक्रवर्तिनः राजहंसस्य राजधानी ( )

२. दशकुमारचरितम् — दशकुमारेषु एकः ( )

३. पुष्पपुरी नाम नगरी — वीरदत्तः ( )

४. उपहारवर्मा — गद्यकाव्यम् ( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. लोकः

२. अग्निः

३. नीरम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. क्षीरम्

५. हंसः

(VI) लघुनिबन्धं रचयत।

१. दण्डिमहाकवेः परिचयं लिखत।

२. 'त्रयोऽग्नयः....' इत्यस्य श्लोकस्य विवरणं कुरुत।

(VII) विस्तरेण निबन्धं लिखत।

१. प्रस्तुतपाठस्य आधारेण दण्डिमहाकवेः दशकुमारचरितगद्यकाव्यस्य च समग्रं विवरणम् उपस्थापयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकादशः पाठः

कादम्बरी

प्रयोजनानि -

⇨ गद्यकाव्येषु सर्वोत्कृष्टस्य महाकविबाणभट्टविरचितस्य कादम्बरीनामकस्य गद्यकाव्यस्य सम्यक् परिचयः पाठेऽस्मिन् प्रस्तुतः।

⇨ गद्यकाव्यानां रचनाशैली नितरां कठिना अपि पाठकानाम् आनन्दकारिणी इत्येतत् तथ्यम् अत्र ज्ञातुं शक्नुमः।

⇨ प्रौढवाक्यप्रयोगे प्रकृतिसौन्दर्यविज्ञाने च रुचिमतां छात्राणां गद्यकाव्यमेतत् अवश्यं पठनीयम्।

पाठारम्भः -

यथा पद्यकाव्येषु कालिदासः महान् कीर्तिमान्, तथैव गद्यकाव्येषु महाकविः बाणभट्टः अपि महान् यशस्वी इति सर्वेऽपि पण्डिताः निर्विवादम् अङ्गीकुर्वन्ति। पद्यरचनायां विशिष्य गद्यरचनायामपि बाणभट्टः स्वीयलोकोत्तरप्रतिभया अतीव निपुणः। अतः एव **'बाणः कवीनामिह चक्रवर्ती'** इति अस्य कवेः स्तुतिः वर्तते। कादम्बरीकाव्ये सम्पूर्णलोकव्यवहारस्य सूक्ष्मतया समग्रतया च वर्णनं विद्यते इति हेतोः एव **'बाणोच्छिष्टं जगत्सर्वम्'** इति आभाणकं तस्य सुप्रसिद्धम्।

बाणभट्टस्य स्तुतिपरकाः श्लोकाः अनेके सन्ति। तेषु अयमेकः। यथा -

रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति ।
सा किं तरुणी? नहि नहि वाणी बाणस्य मधुरशीलस्य ॥

द्वयोः चतुरयोः मित्रयोः संवादः अस्मिन् श्लोके वर्तते। यथा-

प्रथमः - सुमधुरस्वरयुक्तानां पदानां रचनया, विविधरसभावानां समन्वयेन सर्वेषां मनः रञ्जयति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयः - किं भो सा युवतिः वा?

प्रथमः - नैव भोः सा अतीव मधुरशीलस्य महाकवेः बाणभट्टस्य काव्यसरस्वती वर्तते।

महाकविः बाणभट्टः **'प्रीतिकूटग्रामे'** (बीहारराज्यस्य शाहावाद जनपदस्य 'पीरु' इति नाम्ना अधुना सः ग्रामः वर्तते।) क्रीस्तुशकं सप्तमशतमाने (७) जन्म प्राप्तवान्। अस्य माता **'राजदेवी' पिता च चित्रभानुः**। महाराजस्य **हर्षवर्धनस्य** आस्थानपण्डितरूपेण अयं सुप्रख्यातः। **'वात्स्यायनगोत्रीयः'** अयं वंशपरम्परया विद्यार्जने शास्त्रपाण्डित्यविषये च अत्यन्तं बद्धश्रद्धः आसीत्।

अनेन महाकविना त्रयः ग्रन्थाः रचिताः।

बाणभट्टस्य कृतयः

१. हर्षचरितम्	हर्षवर्धनमहाराजस्य चरित्रपरकं गद्यकाव्यमेतत्।
२. कादम्बरी	बृहत्कथायाम् एकं कथांशम् आधारीकृत्य रचितं गद्यकाव्यम्।
३. चण्डीशतकम्	भगवत्याः दुर्गायाः स्तुतिपरकं शतककाव्यमेतत्।

बाणभट्टेन रचितेषु एतेषु त्रिषु ग्रन्थेषु अतीव लोकप्रियं कादम्बरीगद्यकाव्यं वर्तते। अस्मिन् गद्यकाव्ये कथामुखं, पूर्वभागः, उत्तरभागः इति त्रयः विभागाः सन्ति। दौर्भाग्यवशात् अस्य ग्रन्थस्य पूर्वभागपर्यन्तकथामेव बाणभट्टः रचितवान्। अनन्तरम् अस्य ग्रन्थस्य उत्तरभागं तस्यैव पुत्रः **'भूषणभट्टः'** रचितवान्। पुत्रः अपि पितुः बाणभट्टस्य काव्यरचनावैदुष्यं यथातथं प्राप्तवान्।

अस्य काव्यस्य प्रारम्भे महाकविः बाणभट्टः परमात्मनः स्तुतिम् एवं करोति।

रजोजुषे जन्मनि सत्त्ववृत्तये
स्थितौ प्रजानां प्रलये तमःस्पृशे ।
अजाय सर्गस्थितिनाशहेतवे
त्रयीमयाय त्रिगुणात्मने नमः ॥

अस्य समस्तसंसारस्य उत्पत्तिकाले रजोगुणवान् ब्रह्मा, संहारकाले तमोगुणवान्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शङ्करः, स्थितिकाले सत्त्वगुणवान् विष्णुः, जन्मरहितः, सृष्टिस्थितिलयानां कारणभूतः साक्षात् वेदस्वरूपः, गुणत्रयेण त्रिमुर्तिरूपः यः परमेश्वरः तस्मै नमस्कारः इति अस्य श्लोकस्य भावः।

इत्थं परमेश्वरस्य मङ्गलाचरणानन्तरं महाकविः अखण्डगङ्गाप्रवाहवत् गद्यस्य धारां प्रवाहयति। कादम्बरीगद्यकाव्ये गद्यं दीर्घसमासैः युक्तं सत् कदाचित् मृदुमधुरललितपदजालैः कदाचित् कठिनतरपरुषपदविन्यासेन च सहृदयपाठकानां मनांसि भृशं प्रमोदयति। अतः **'कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते'** इति लोकोक्तिः सर्वथा सार्थक्यं भजते।

कादम्बरीगद्यकाव्ये अस्मिन् गद्यस्य स्वरूपपरिचयार्थं शूद्रकमहाराजस्य वर्णनपरकम् एतं गद्यांशं पश्यामः।

आसीदशेषनरपतिशिरःसमभ्यर्चितशासनः, पाकशासन इवापरः, चतुरुदधिमालामेखलाया भुवो भर्ता, प्रतापानुरागावनत-समस्तसामन्तचक्रः, चक्रवर्तिलक्षणोपेतः, चक्रधर इव करकमलोप-लक्ष्यमाणशङ्खचक्रलाञ्छनः, हर इव जितमन्मथः, गुह इवाप्रतिहतशक्तिः, कमलयोनिरिव विमानीकृतराजहंसमण्डलः, जलधिरिव लक्ष्मीप्रसूतिः, गङ्गाप्रवाह इव भगीरथपथप्रवृत्तः, रविरिव प्रतिदिवसोपजायमानोदयः, मेरुरिव सकलोपजीव्यमानपादच्छायः, दिग्गज इवानवरतप्रवृत्तदानार्द्रीकृतकरः, कर्ता महाश्चर्याणाम्, आहर्ता क्रतूनाम्, आदर्शः सर्वशास्त्राणाम्, उत्पत्तिः कलानां, कुलभवनं गुणानाम्, आगमः काव्यामृतरसानाम्, उदयशैलो मित्रमण्डलस्य, उत्पातकेतुरहितजनस्य, प्रवर्तयिता गोष्ठीबन्धानाम्, आश्रयो रसिकानां, प्रत्यादेशो धनुष्मतां, धौरेयः साहसिकानाम्, अग्रणीर्विदग्धानां, वैनतेय इव विनतानन्दजननः, वैन्य इव चापकोटिसमुत्सारितारातिकुलाचलो राजा शूद्रको नाम।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्य गद्यभागस्य सन्दर्शनेन महाकवेः गद्यरचनावैदुष्यं कियदिति वयम् अनुमातुं शक्नुमः। विशिष्य अस्मिन् काव्ये अश्वानाम् अतीव प्राकृतिकं भव्यं वर्णनं कृतवानिति कारणात् **'तुरङ्गबाणः'** इति अस्य कवेः कीर्तिः वर्तते। एतादृशस्य महाप्रज्ञाशालिनः बाणस्य विषये पण्डितानां वचनमिदम् अवश्यं सङ्गतं भवति यत् **'वाणी बाणो बभूवे'**ति (साक्षात् सरस्वती बाणकविरूपेण वर्तते।)

अवधेयांशाः -

- कादम्बरीगद्यकाव्यस्य रचयिता महाकविः बाणभट्टः।
- बाणः कवीनामिह चक्रवर्ती इति बाणभट्टस्य कविप्रपञ्चे प्रसिद्धिः वर्तते।
- अयं कविः सप्तमशतमाने प्रीतिकूटग्रामे जन्म लब्धवान्।
- अस्य माता राजदेवी पिता च चित्रभानुः आसीत्।
- हर्षवर्धनमहाराजस्य अयम् आस्थानकविः आसीत्।
- अस्य महाकवेः हर्षचरितं, चण्डीशतकं, कादम्बरी इति ग्रन्थत्रयं वर्तते।
- कादम्बरीगद्यकाव्ये कथामुखं, पूर्वभागः, उत्तरभागः इति त्रयः विभागाः सन्ति।
- पूर्वभागपर्यन्तमेव महाकविः बाणभट्टः रचितवान्। अनन्तरम् उत्तरभागं तस्य पुत्रः भूषणभट्टः रचितवान्।
- तुरङ्गबाणः इति बाणमहाकवेः प्रशस्तिः वर्तते।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. कादम्बरीगद्यकाव्यस्य रचयिता कः?

२. 'बाणोच्छिष्टं जगत्सर्वम्' इति आभाणकस्य अभिप्रायः कः?

३. बाणभट्टः कस्य महाराजस्य आस्थानपण्डितः आसीत्?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. कादम्बरीगद्यकाव्यस्य मङ्गलाचरणश्लोकः कः?

५. कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते इति लोकोक्तेः अभिप्रायः कः?

(II) रिक्तस्थानानि पूरयत।

१. बाणः कवीनाम् इह _____।

२. बाणभट्टः _____ ग्रामे जन्म लब्धवान्।

३. बाणभट्टस्य माता _____।

४. कादम्बरीगद्यकाव्यस्य उत्तरभागं _____ रचितवान्।

(III) समीचीनमुत्तरं चिनुत।

१. बाणभट्टस्य पिता कः आसीत्? ( )

(क) मित्रभानुः (ख) चित्रभानुः

(ग) क्षत्रभानुः (घ) पुत्रभानुः

२. बाणभट्टः कस्मिन् गोत्रे जन्म लब्धवान्? ( )

(क) वात्स्यायन (ख) राणायन

(ग) मैत्रायण (घ) शाकटायन

३. बाणभट्टस्य हर्षवर्धनचरित्रपरकं गद्यकाव्यं किमस्ति? ( )

(क) हर्षाभ्युदयम् (ख) हर्षभूपालीयम्

(ग) हर्षचरितम् (घ) हर्षचन्द्रोदयम्

४. प्रस्तुतपाठस्य गद्यभागे कस्य महाराजस्य वर्णनं वर्तते? ( )

(क) चन्द्रापीडस्य (ख) हारीतस्य

(ग) पुण्डरीकस्य (घ) शूद्रकस्य

५. कादम्बरीगद्यकाव्ये बाणभट्टः अश्वानां सुन्दरवर्णनं कृतवानिति हेतोः लोके कीदृशी कीर्तिर्वर्तते? ( )

(क) मतङ्गबाणः (ख) तुरङ्गबाणः

(ग) पतङ्गबाणः (घ) प्लवङ्गबाणः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(IV) परस्परं योग्यं योजयत।

१. बाणभट्टस्य कालः	दुर्गादिव्याः स्तुतिपरकं शतककाव्यम्	( )
२. बाणभट्टस्य पुत्रः	क्री. श. ७ शताब्दी	( )
३. चण्डीशतकम्	भूषणभट्टः	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. मनः -

२. प्रजाः -

३. त्रिगुणाः -

४. गङ्गाप्रवाहः -

(VI) लघुनिबन्धं रचयत।

१. महाकवेः बाणभट्टस्य परिचयं कुरुत।

२. 'रजोजुषे जन्मनि...' इत्यस्य श्लोकस्य विवरणं कुरुत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठस्य आधारेण महाकवेः बाणभट्टस्य कादम्बरीगद्यकाव्यस्य च समग्रं विवरणम् उपस्थापयत।

परियोजना

संस्कृतसाहित्यस्य इतिहासे विद्यमानानां गद्यकाव्यानां सूचीं लिखत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चमखण्डः

चम्पूकाव्यद्वयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वादशः पाठः

नलचम्पूकाव्यम्

प्रयोजनानि -

- एकत्र एव पद्यानां गद्यानां च सन्निवेशेन काव्यस्य सौन्दर्योत्कर्षः कथं जायते इति अस्मिन् पाठे वयं जानीमः।
- नलचम्पूकाव्यस्य साहित्यप्रपञ्चे वैशिष्ट्यं किम् इत्यपि जानीमः।
- कथासाहित्ये रुचिमतां छात्राणाम् एतत् काव्यम् अवश्यं पठनीयम् इति प्रेरणामपि प्राप्नुयाम।

पाठारम्भः -

नलचम्पूकाव्यस्य रचयिता महाकविः **'त्रिविक्रमभट्टः'** वर्तते। अनेन काव्येन सह **'मदालसाचम्पूकाव्य'**मिति अन्यदपि चम्पूकाव्यम् अयमेव रचितवान्। अयं दशमशताब्द्याः (१०) पूर्वार्धे 'राष्ट्रकूट'वंशीयस्य **'इन्द्रराज'**नामकस्य महाराजस्य आस्थानपण्डितः आसीत्। **'शाण्डिल्य'**गोत्रोद्भवस्य अस्य कवेः पितामहः **'श्रीधरः'**, पिता **'नेमादित्यः'(देवादित्यः)**। अयं विदर्भनगरे 'पयोष्णी'नदीतीरग्रामेषु निवासं कृतवान् इति काव्यस्यास्य परिशीलनेनैव ज्ञायते। प्रसिद्धः ज्योतिश्शास्त्रपण्डितः **भास्कराचार्यः** कवेः अस्य पूर्वजो वर्तते।

एतावति काले सम्प्राप्तेषु चम्पूकाव्येषु सर्वादिमं चम्पूकाव्यं त्रिविक्रमभट्टस्य 'नलचम्पूकाव्य'मिति पण्डितानाम् आशयः। अस्मिन् चम्पूकाव्ये नलस्य दमयन्त्याश्च प्रणयवृत्तान्तः वर्णितः। महाभारतस्य वनपर्वणि नलदमयन्त्योः या कथा अस्ति, सा कथा एव अस्मिन् काव्ये इतिवृत्तरूपेण कविना स्वीकृता। परन्तु अस्मिन् काव्ये सम्पूर्णकथा न वर्णिता इति हेतोः एतत्काव्यम् असम्पूर्णम् इत्यपि विद्वांसः वदन्ति।

अस्मिन् नलचम्पूकाव्ये सप्त (७) उच्छ्वासाः सन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्य काव्यस्य आरम्भे त्रिविक्रमभट्टः एवं मङ्गलाचरणं करोति यथा -

जगति गिरिसुतायाः कामसन्तापवाहि-
न्युरसि रसनिषेकश्चान्दनश्चन्द्रमौलिः ।
तदनु च विजयन्ते कीर्तिभाजां कवीना-
मसकृदमृतबिन्दुस्यन्दिनो वाग्विलासाः ॥

परमेश्वरं प्रति प्रणयवियोगदुःखं प्रकटीकुर्वाणे पार्वत्याः वक्षःस्थले चन्दनरसप्रवाहः इव वर्तमानः शङ्करः सदा जयतु। तदनन्तरं महाकीर्तिमतां कवीनां पुनः पुनः अमृतरसप्रवाहकाः वचोविलासाः सदा सर्वोत्कर्षेण भवन्तु इति अस्य श्लोकस्य भावः।

त्रिविक्रमभट्टस्य अस्मिन् काव्ये सुललितपदविन्यासः, सभङ्गश्लेषप्रयोगः, अतीव मनोहरः वर्तते। तथैव उपमालङ्कारप्रयोगेऽपि कविः नितरां निपुणः। प्रातःकालं वर्णयन् कविः सूर्यचन्द्रयोः कान्तिद्वयस्य गङ्गायमुनानदीसङ्गमेन सह तुलनां कृत्वा उपमालङ्कारस्य भव्यं चित्रणम् आविष्कृतवान्। अतः एव अयं कविः **'यामुनत्रिविक्रमः'** इति नाम्ना पण्डितैः बहुधा संस्तुतोऽस्ति। सः श्लोकः यथा -

उदयगिरिगतायां प्राक्प्रभापाण्डुताया-
मनुसरति निशीथे शृङ्गमस्ताचलस्य ।
जयति किमपि तेजः साम्प्रतं व्योममध्ये
सलिलमिव विभिन्नं जाह्नवं यामुनं च ॥

गङ्गानद्यां जलं श्वेतवर्णयुक्तं, तथैव यमुनानद्यां जलं कृष्णवर्णयुक्तं भवति। कविः श्लोकेऽस्मिन् प्रातःकालं वर्णयति। प्रातःकाले सूर्यः उदयन्, चन्द्रः च अस्तङ्गच्छन् भवति। सूर्यस्य प्रकाशः श्वेतवर्णयुक्तः, चन्द्रस्य प्रकाशः कृष्णवर्णयुक्तः। अनयोः प्रकाशयोः सङ्गमः प्रातःकाले दृश्यते। एवं सूर्यचन्द्रयोः प्रकाशसङ्गमः गङ्गायमुनयोः सङ्गमः इव अतीव शोभते इति श्लोकस्यास्य भावः।

अवधेयांशाः -

- नलचम्पूकाव्यस्य रचयिता महाकविः त्रिविक्रमभट्टः।
- अयं मदालसाचम्पूकाव्यम् इति अन्यदपि चम्पूकाव्यं रचितवान्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- अयं दशमशताब्दीयः राष्ट्रकूटवंशीयस्य इन्द्रराजस्य आस्थानकविः आसीत्।
- अस्य पितामहः श्रीधरः पिता च नेमादित्यः आसीत्।
- उपलब्धेषु चम्पूकाव्येषु सर्वादिमं चम्पूकाव्यं नलचम्पूकाव्यमिति पण्डितानाम् आशयः।
- अस्मिन् नलचम्पूकाव्ये सप्त उच्छ्वासाः सन्ति।
- यामुनत्रिविक्रमः इति महाकवेः अस्य काचित् प्रशस्तिः वर्तते।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. त्रिविक्रमभट्टस्य चम्पूकाव्यद्वयं किमस्ति?

२. त्रिविक्रमभट्टस्य कालः कः?

३. त्रिविक्रमभट्टस्य निवासस्थानं किम्?

४. नलचम्पूकाव्यस्य मङ्गलाचरणश्लोकः कः?

५. नलचम्पूकाव्यस्य मूलकथा कुत्र वर्तते?

(II) रिक्तस्थानानि पूरयत।

१. त्रिविक्रमभट्टः _____ महाराजस्य आस्थानपण्डितः।

२. त्रिविक्रमभट्टस्य पितामहः _____।

३. नलचम्पूकाव्ये _____ वृत्तान्तः वर्णितः।

४. त्रिविक्रमभट्टः _____ नाम्ना पण्डितैः संस्तुतः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(III) समीचीनमुत्तरं चिनुत।

१. त्रिविक्रमभट्टः कस्मिन् गोत्रे जन्म लब्धवान्? ( )

(क) वाशिष्ठ (ख) शाण्डिल्य

(ग) गौतम् (घ) काश्यप

२. त्रिविक्रमभट्टस्य पिता कः? ( )

(क) नेमादित्यः (ख) वामादित्यः

(ग) सोमादित्यः (घ) रामादित्यः

३. त्रिविक्रमभट्टस्य पूर्वजः कः आसीत्? ( )

(क) वराहमिहिरः (ख) आर्यभट्टः

(ग) भास्कराचार्यः (घ) कौटिल्यः

४. नलचम्पूकाव्ये कति उच्छ्वासाः सन्ति? ( )

(क) पञ्च (ख) षड् (ग) सप्त (घ) अष्ट

(IV) परस्परं योग्यं योजयत।

१. इन्द्रराजः नलचम्पूकाव्यम् ( )

२. भास्कराचार्यः राष्ट्रकूटवंशीयः ( )

३. सर्वादिमं चम्पूकाव्यम् प्रसिद्धज्योतिश्शास्त्रपण्डितः ( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. चन्दनवृक्षः -

२. अमृतम् -

३. उदयकालः -

४. गङ्गानदी -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(VI) लघुनिबन्धं रचयत।

१. त्रिविक्रमभट्टस्य परिचयं कुरुत।

२. 'उदयगिरिगतायाम्...' इत्यस्य श्लोकस्य विवरणं कुरुत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठम् उपस्कृत्य त्रिविक्रमभट्टस्य नलचम्पूकाव्यस्य च समग्रं परिचयम् आविष्कुरुत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्रयोदशः पाठः

विश्वगुणादर्शचम्पूकाव्यम्

प्रयोजनानि -

⇨ भारतीयसंस्कृतेः सभ्यतायाः विज्ञानस्य च महत्त्वबोधकं भवति विश्वगुणादर्श-चम्पूकाव्यम्। अस्य चम्पूकाव्यस्य परिचयः अनेन पाठेन क्रियते।

⇨ भारतीयसनातनविज्ञानस्य वास्तविकं स्वरूपं काव्येऽस्मिन् सम्यक् वर्णितमस्ति।

⇨ एतादृशस्य विशिष्टगुणोपेतस्य अस्य काव्यस्य अध्ययनं सर्वेण छात्रेण अवश्यं करणीयमिति भावना एतत्पाठाध्ययनेन जागर्ति।

पाठारम्भः -

भारतदेशः सम्पूर्णविश्वे अतीव सुन्दरः सर्वोत्कृष्टश्च। यतो हि अत्र विद्यमानाः नदीह्रदाः, पर्वताः, तीर्थप्रदेशाः, महापुरुषाः सर्वेऽपि पवित्रतमाः महोन्नतभारतीय-विज्ञानपरम्परया दिव्यचरितेन च परिपूताश्च वर्तन्ते। एतादृशस्य सकलगुणपरिपूर्णस्य समग्रभारतस्य दिव्येन चरित्रेण सह काव्यमिदं गुणद्योतकं भवति।

विश्वगुणादर्शचम्पूकाव्यस्य अस्य रचयिता **महाकविः वेङ्कटाध्वरी** वर्तते। अयं पञ्चाशदुत्तरषोडशशतमाने (१६५०) **'काञ्चीनगरस्य'** निवासी आसीत्। अस्य **माता 'सीताम्बरा', पिता च 'रघुनाथः'** वर्तेते।

अस्य भारतीयसंस्कृतिसम्प्रदायेषु विज्ञाने च अपारप्रतिभा विलसति। अतः एव भारतवर्षगुणद्योतकस्य विश्वगुणादर्शचम्पूकाव्यस्य रचनायाम् अयं समर्थः सञ्जातः। ईदृशमहावैदुष्यसम्पन्नः अयं कविः बहुग्रन्थान् रचितवान्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. विश्वगुणादर्शचम्पूः, २. वरदाभ्युदयचम्पूः,
३. उत्तरचम्पूः, ४. श्रीनिवासविलासचम्पूः
इति चत्वारि चम्पूकाव्यानि सन्ति। सहस्रश्लोकात्मकं **'लक्ष्मीस्तोत्रम्'**, **'यादवराघवीयनामकं'** द्व्यर्थिकाव्यम् एवमनेकग्रन्थान् रचितवान्।

विश्वगुणादर्शचम्पूकाव्ये भारतवर्षस्य पुण्यनदीह्रदाः, पर्वताः, तीर्थप्रदेशाः, महापुरुषाः सर्वेऽपि महोन्नतविषयाः सम्यक् वर्णिताः सन्ति। अस्मिन् काव्ये आदौ प्रपञ्चभ्रमणकुतूहलेन 'कृशानुः' 'विश्वावसुः' इति द्वौ गन्धर्वयुवकौ विमानम् आरुह्य भारतमागतौ। तयोर्मध्ये कृशानुः सर्वत्र दोषान् विकारान् एव पश्यति। परन्तु विश्वावसुः सर्वत्र गुणान् पश्यन् प्रकटयति। एवं सम्पूर्णकाव्ये भारतभ्रमणेन द्वयोः गन्धर्वयुवकयोः संवादः एव प्रधानतया वर्णितोऽस्ति।

गङ्गानदीविषये द्वयोः संवादमेकं पश्यामः। गङ्गानद्याः दोषान् प्रकटयति कृशानुः यथा-

येषां जनिश्चरणतस्तु हिरण्यहर्तु-
र्दोषाकरेण गुरुदारविटेन मूर्ध्नि ।
ब्रह्मोत्तमाङ्गभिद एव सहस्थितिश्च
ख्यातो लयो जलनिधौ किल गाङ्गवाराम् ॥

स्वर्णचोरस्य विष्णोः चरणाभ्यां गङ्गानदीजलानि उद्भवन्ति। तथैव अतीव दोषभूयिष्ठेन चन्द्रेण एवं ब्रह्महत्यापातकिना शङ्करेण च सहैव इयं गङ्गानदी तिष्ठति। गङ्गानद्याः मधुराणि जलानि अन्ततः गत्वा समुद्रस्य लवणजलेषु एव विलयं प्राप्नुवन्ति। एवम् अतीव दोषकलुषिता वर्तते गङ्गानदी।

एवं दोषदर्शिनः कृशानोः वचनं श्रुत्वा विश्वावसुः गङ्गानद्याः गुणान् प्रकटयति। यथा -

गाङ्गानि वारि गरुडध्वजपादपद्मा-
दाविर्बभूवुरपुनन् पुनरिन्दुमौलिम् ।
निन्युर्विचित्रममृतं सगरान्वयं च
नेतोऽधिकं भुवि पवित्रतमं समं वा ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परमपवित्रस्य महाविष्णोः चरणयोः उत्पन्ना इयं नदी, अनन्तरं शङ्करस्य शिरोभागं पवित्रीकुर्वती, पश्चात् सगरवंशीयानां सर्वेषाम् अपि उद्धरणं करोति। अनेन पवित्रकार्येण समानम् अधिकं वा अन्यत्कार्यं लोके कुत्रापि न दृश्यते।

अवधेयांशाः -

- विश्वगुणादर्शचम्पूकाव्यस्य रचयिता महाकविः वेङ्कटाध्वरी वर्तते।
- अयं क्री.श.१६५० तमे वर्षे काञ्चीपुरनिवासी आसीत्।
- अस्य माता सीताम्बरा पिता च रघुनाथः आसीत्।
- अनेन रचितेषु बहुषु ग्रन्थेषु चत्वारि चम्पूकाव्यानि सन्ति। तानि विश्वगुणादर्शचम्पूः, वरदाभ्युदयचम्पूः, उत्तरचम्पूः, श्रीनिवासविलासचम्पूः च सन्ति।
- कृशानुः विश्वावसुः च इति केवलं द्वौ एव गन्धर्वयुवकौ अस्मिन् चम्पूकाव्ये पात्रत्वेन वर्तेते।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. विश्वगुणादर्शचम्पूकाव्यस्य रचयिता कः?

२. वेङ्कटाध्वरिमहाकवेः कालः कः?

३. विश्वगुणादर्शचम्पूकाव्ये के विषयाः वर्णिताः सन्ति?

(II) रिक्तस्थानानि पूरयत।

१. वेङ्कटाध्वरिकविः _____ नगरे निवसति स्म?

२. महाकवेः वेङ्कटाध्वरिणः माता _____।

३. वेङ्कटाध्वरिणा _____ चम्पूकाव्यानि रचितानि।

४. कृशानुः, विश्वावसुः च _____ आस्ताम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(III) समीचीनमुत्तरं चिनुत।

१. महाकवेः वेङ्कटाध्वरिणः पिता कः? ( )

(क) रघुनाथः (ख) गुरुनाथः

(ग) वसुनाथः (घ) लघुनाथः

२. वेङ्कटाध्वरिकवेः तिरुमलश्रीवेङ्कटेश्वरस्य विलासपरकं चम्पूकाव्यं किमस्ति?( )

(क) वेङ्कटेशविलासचम्पूः (ख) नारायणचम्पूः

(ग) गोविन्दगुणचम्पूः (घ) श्रीनिवासविलासचम्पूः

३. विश्वगुणादर्शचम्पूकाव्ये कृशानुः कीदृशः वर्तते। ( )

(क) पुण्यदर्शी (ख) दोषदर्शी

(ग) समदर्शी (घ) ऋजुदर्शी

४. विश्वगुणादर्शचम्पूकाव्ये विश्वावसुः कीदृशः वर्तते? ( )

(क) गुणदर्शी (ख) पापदर्शी

(ग) विषमदर्शी (घ) कुदर्शी

५. वेङ्कटाध्वरिणः सहस्रश्लोकात्मकं लक्ष्मीदेव्याः स्तुतिपरकं काव्यं किमस्ति?( )

(क) उमास्तोत्रम् (ख) वाणीस्तोत्रम्

(ग) लक्ष्मीस्तोत्रम् (घ) मातृस्तोत्रम्

(IV) परस्परं योग्यं योजयत।

१. कृशानुः, विश्वावसुः दोषाकरः ( )

२. गङ्गानदी गन्धर्वयुवकौ ( )

३. चन्द्रः विष्णुचरणयोः उत्पन्ना ( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. अभ्युदयः -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. समुद्रः -

३. शङ्करः -

(VI) लघुनिबन्धं रचयत।

१. महाकवेः वेङ्कटाध्वरिणः परिचयं लिखत।

२. 'गाङ्गानि वारि....' इत्यस्य श्लोकस्य विवरणं कुरुत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठस्य परिशीलनेन वेङ्कटाध्वरिकवेः विश्वागुणादर्शचम्पूकाव्यस्य च समग्रं वृत्तान्तं निवेदयत।

परियोजना

संस्कृतसाहित्यस्य इतिहासे विद्यमानानां प्रसिद्धचम्पूकाव्यानां सूचीं निर्मात।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षष्ठखण्डः

पञ्चमहानाटकानि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्दशः पाठः

स्वप्नवासवदत्तम्

प्रयोजनानि -

⇨ संस्कृतवाङ्मये अत्यन्तप्रसिद्धस्य नाटकस्य ज्ञानम् अनेन पाठेन प्राप्तुं शक्नुमः।

⇨ महाकवेः भासस्य भासनाटकचक्रनामकस्य ग्रन्थस्य च समग्रं परिचयम् अयं पाठः प्रददाति।

⇨ भासनाटकचक्रस्याध्ययनेन सर्वेषां भाषणविकासः, पुराणेतिहासज्ञानञ्च निश्चयेन भविष्यति।

पाठारम्भः -

भारतीयनाट्यवाङ्मये सर्वादिमः रूपककर्ता महाकविः भासः वर्तते। सः क्री.पू.३००-२०० वर्षाणां मध्यकाले आसीदिति इतिहासकाराणाम् अभिप्रायः। उत्तरवर्तिनाम् अनेकेषां रूपककर्तृणां भासमहाकविः महान् आदर्शमूर्तिः। अतः एव कालिदासः, बाणभट्टः, दण्डी, वाक्पतिराजः, राजशेखरः, सागरनन्दी, भोजराजः, अभिनवगुप्तः इत्यादयः महान्तोऽपि कवयः तेषां स्वीयग्रन्थेषु भासस्य प्रशंसां भूरिशः अकुर्वन्।

बाणभट्टः स्वीये हर्षचरितनामके गद्यकाव्ये भासरूपकेषु विद्यमानान् गुणान् प्रकटयन् भासस्य स्तुतिम् एवं कृतवान्।

सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ॥

भासनाटकचक्रे विद्यमानेषु सर्वेषु अपि रूपकेषु सूत्रधारः एव रूपकाणाम् आरम्भं करोति। तथैव तेषु बह्व्यः भूमिकाः एवं पताकाः च इतिवृत्तानुसारं भवन्ति। एवम् एतादृशैः उत्तमरूपकैः भासकविः महतीं कीर्तिं प्राप्तवान्।

भासनाटकचक्रे त्रयोदश (१३) रूपकानि सन्ति। तानि रूपकानि चतुर्विधानि सन्ति। यथा -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भासनाटकचक्रम्

वत्सराजकथामूलकं रूपकद्वयम्
- १. प्रतिज्ञायौगन्धरायणम्
- २. स्वप्नवासवदत्तम्

रामायणमूलकं रूपकद्वयम्
- ३. प्रतिमानाटकम्
- ४. अभिषेकनाटकम्

महाभारतमूलकानि सप्तरूपकाणि
- ५. ऊरुभङ्गम्
- ६. दूतवाक्यम्
- ७. पञ्चरात्रम्,
- ८. दूतघतोत्कचम्
- ९. कर्णभारम्
- १०. मध्यमव्यायोगः
- ११. बालचरितम्

लौकिकं रूपकद्वयम्
- १२. अविमारकम्
- १३. चारुदत्तम्

भासस्य त्रयोदशरूपकेषु सर्वश्रेष्ठं सुप्रसिद्धं रूपकं स्वप्नवासवदत्तम् इति पण्डिताः निर्णयन्ति। अस्मिन् रूपके षड् अङ्काः सन्ति। अत्र विद्यामानम् इतिवृत्तं संक्षेपेण एवमस्ति।

महाराजः उदयनः (वत्सराजः) वासवदत्ताम् अतीव प्रीणाति। तत्कारणेन राज्यपालनकार्यं सम्यक् न पश्यति। अतः तस्य शत्रुः आरुणिः राज्यम् आक्रान्तवान्। तदनन्तरं मन्त्री यौगन्धरायणः समीचीनां योजनां कृत्वा वासवदत्ता अग्नौ ज्वलितवती इति मिथ्यावार्तां सर्वत्र प्रसार्य रहस्येन मगधराजकुमार्याः पद्मावत्याः समीपं वासवदत्तां प्रेषितवान्।

तदनन्तरं कालान्तरे उदयनमहाराजस्य विवाहः पद्मावत्या सह जातः। मगधसैनिकाः आरुणिं पराजित्य पुनः उदयनमहाराजाय स्वीयराज्यं दत्तवन्तः। एवं पुनः प्राप्तं राज्यम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उदयनः पद्मावत्या वासवदत्तया सह आयाति। तदनन्तरं यौगन्धरायणः वासवदत्ता न ज्वलितवती अपि तु सा जीवति इति सत्यं वत्सराजाय ज्ञापितवान्।

अस्य नाटकस्य पञ्चमाङ्के स्वप्ने विद्यमानेन वत्सराजेन सह वासवदत्तायाः संवादः कश्चन वर्तते। तं संवादं पुरस्कृत्य एव रूपकस्य नाम **स्वप्नवासवदत्तम्** इति सार्थकं नाम भासकविः कृतवान्।

अवधेयांशाः -

- भारतीयनाट्यवाङ्मये सर्वादिमः रूपककर्ता महाकविः भासः वर्तते।
- भासनाटकचक्रे विद्यमानेषु सर्वेषु अपि रूपकेषु सूत्रधारः एव रूपकाणाम् आरम्भं करोति।
- भासनाटकचक्रे त्रयोदश (१३) रूपकानि सन्ति।
- भासस्य त्रयोदशरूपकेषु सर्वश्रेष्ठं सुप्रसिद्धं रूपकं स्वप्नवासवदत्तम् इति पण्डिताः निर्णयन्ति।
- अस्मिन् रूपके षड् अङ्काः सन्ति।
- अस्य नाटकस्य नायकः उदयनः (वत्सराजः), नायिका वासवदत्ता च स्तः।
- अस्मिन् नाटके यौगन्धरायणः, पद्मावती च इति मुख्यं पात्रद्वयं वर्तते।
- सुप्तेन उदयनेन सह वासवदत्ता भाषितवती इत्यतः अस्य नाटकस्य स्वप्नवासवदत्तम् इति नाम सार्थकं वर्तते।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. स्वप्नवासवदत्तनाटकस्य रचयिता कः?

२. भासमहाकवेः कालः कः?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. महाकवेः भासस्य स्तुतिपरकं श्लोकं लिखत।

४. महाभारतमूलकानि रूपकानि कति? तेषां नाम किम्?

५. स्वप्नवासवदत्तमिति नाटकस्य अस्य नाम कथम् आगतम्?

(II) रिक्तस्थानानि पूरयत।

१. बाणभट्टः _____ गद्यकाव्ये भासकवेः स्तुतिं कृतवान्।

२. वत्सराजकथामूलकं _____, _____ रूपकद्वयम्।

३. स्वप्नवासवदत्तनाटके _____ अङ्काः सन्ति।

४. उदयनमहाराजस्य मन्त्री _____ ।

(III) समीचीनमुत्तरं चिनुत।

१. भारतीयनाट्यवाङ्मये सर्वादिमः रूपककारः कः? ( )
(क) व्यासः (ख) भासः
(ग) कालिदासः (घ) मुरारिः

२. भासनाटकचक्रे कति रूपकानि सन्ति? ( )
(क) दश (ख) एकादश
(ग) द्वादश (घ) त्रयोदश

३. रामायणमूलके रूपकद्वये एतदस्ति। ( )
(क) ऊरुभङ्गम् (ख) चारुदत्तम्
(ग) अभिषेकनाटकम् (घ) कर्णभारम्

४. भासनाटकेषु सर्वश्रेष्ठं नाटकं किम्? ( )
(क) स्वप्नवासवदत्तम् (ख) अविमारकम्
(ग) प्रतिमानाटकम् (घ) मध्यमव्यायोगः

५. उदयनमहाराजस्य शत्रुः कः? ( )
(क) वारुणिः (ख) सुमाली
(ग) रुक्माङ्गः (घ) आरुणिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(IV) परस्परं योग्यं योजयत।

१. सर्वादिमरूपककारः	अविमारकम्, चारुदत्तम्	( )
२. भासरूपकानि	भासः	( )
३. लौकिकं रूपकद्वयम्	वत्सराजस्य पत्नी	( )
४. पद्मावती	चतुर्विधानि	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. आरम्भः -

२. शत्रुः -

३. राज्यम् -

४. मन्त्री -

५. सत्यम् -

(VI) लघुनिबन्धं रचयत।

१. भासमहाकवेः परिचयं लिखत।

२. भासनाटकचक्रस्य परिचयं कुरुत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चदशः पाठः

अभिज्ञानशाकुन्तलम्

प्रयोजनानि -

⇨ संस्कृतनाटकेषु सर्वाधिकलोकप्रियस्य अभिज्ञानशाकुन्तलनामकस्य नाटकस्य अनेन पाठेन सम्यक् परिचयः जायते।

⇨ नाटककारत्वेन कालिदासस्य नूतनम् अद्वितीयं परिचयमपि वयम् इतः प्राप्नुमः।

⇨ संस्कृतज्ञेन सता अवश्यं पठनीयेषु ग्रन्थेषु एतन्नाटकमपि एकमिति ज्ञातुं शक्नुमः।

पाठारम्भः -

महाकविः कालिदासः स्वीयरघुवंशादीनां काव्यानाम् अपेक्षया अभिज्ञानशाकुन्तलनाटकस्य रचनया एव अधिकं यशः प्राप्तवान्। अनेन कविना रचितानि नाटकानि त्रीणि इति वयं जानीमः।

कालिदासनाटकानि
- १. अभिज्ञानशाकुन्तलम्
- २. मालविकाग्निमित्रम्
- ३. विक्रमोर्वशीयम्

कालिदासस्य सर्वेषु अपि सप्तग्रन्थेषु अभिज्ञानशाकुन्तलम् एव सर्वोत्कृष्टम्। सुन्दरशब्दप्रयोगेण मनोहरभावसन्निवेशेन रमणीयरचनाविलासेन च अस्मिन् नाटके कालिदासस्य पाण्डित्यं परां कोटिं भजते। अतः एव पण्डितलोके एतत् नाटकमुद्दिश्य इयं प्रशस्तिः वर्तते।

"कालिदासस्य सर्वस्वम् अभिज्ञानशाकुन्तलम्।"

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महाभारतस्य आदिपर्वणि दुष्यन्तशकुन्तलाकथा काचिदस्ति। तामेव कथाम् आधारीकृत्य कालिदासः नाटकमिदम् अरचयत्। महाभारते विद्यमाना दुष्यन्तशकुन्तलाकथा सभ्यतासंस्कारदृष्ट्या दुष्यन्तशकुन्तलयोः सम्बन्धदृष्ट्या च तथा समीचीना नास्ति। परन्तु तामेव लघुकथां स्वीकृत्य कालिदासः स्वकीयया कल्पनाशक्त्या पाण्डित्येन च उत्कृष्टसभ्यतासंस्कारयुक्तं महोन्नतमानवसम्बन्धबोधकं नाटकम् इदं कृतवान्।

अस्मिन् नाटके **सप्त अङ्काः (७)** सन्ति। सप्तसु अङ्केषु विद्यमानां विशालां कथां संक्षेपेण वयं जानीमः। हस्तिनापुरमहाराजः दुष्यन्तः एकदा मृगयाविहारार्थं वनम् आगतवान्। बहुकालं यावत् मृगयया श्रान्तः विश्रान्तिनिमित्तं समीपे कण्वाश्रमं गतवान्। तत्र शकुन्तला निजसखीभिः वृक्षेषु जलं सिञ्चन्ती आसीत्। कण्वमहर्षिः पुत्र्याः शकुन्तलायाः हितार्थं **सोमतीर्थं** गतवान्। तस्मिन् समये दुष्यन्तशकुन्तलयोः प्रथमदर्शने एव परस्परम् अनुरागः सञ्जातः। एवमेव तयोः गान्धर्वविवाहः अपि सम्पन्नः।

विवाहानन्तरं दुष्यन्तः स्वीयमातुः आदेशेन हस्तिनापुरं गतवान्। तदनन्तरम् आश्रममागतः कण्वमहर्षिः तपोदृष्ट्या सर्वमपि वृत्तान्तं ज्ञात्वा शकुन्तलां पतिगृहं प्रेषयितुं सन्नाहम् अकरोत्।

शकुन्तलायाः पतिगृहगमनवर्णनं चतुर्थाङ्के वर्तते। नाटकेऽस्मिन् अयमेव अङ्कः अत्यन्तं रमणीयः। अस्मिन् अङ्के विद्यमानेषु श्लोकेषु चत्वारः श्लोकाः अतीवलोकप्रियाः सन्ति।

१. यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥

इत्यस्मिन् श्लोके कण्वस्य पुत्रीवियोगदुःखं वर्णितम्।

२. पातुं न प्रथमं व्यवस्यति जलम्... इत्यस्मिन् श्लोके कण्वमहर्णिः शकुन्तलागमनाय आश्रमवृक्षाणाम् अनुमतिं प्रार्थयते ।

३. अस्मान् साधु विचिन्त्य संयमधनान् ... इत्यस्मिन् श्लोके कण्वः, स्वस्य एतानि हितकराणि वचनानि दुष्यन्ताय ज्ञापयितुं निजशिष्यं शार्ङ्गरवम् आदिशति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिम् ... इत्यस्मिन् श्लोके कण्वः पतिगृहे शकुन्तलायाः प्रवर्तनं साधु स्यादिति हितं वदति।

एवम् एतमेव भावं व्यञ्जयन् अस्य नाटकस्य विषये कश्चन श्लोकः अपि श्रूयते। यथा -

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ।।

एवं क्रमेण दुष्यन्तशकुन्तलयोः मध्ये केचन उपद्रवाः सञ्जाताः। नाटकान्ते तयोः पुनः समागमः जायते। अनेन नाटकम् इदं सुखान्तं पर्यवसितम्।

अवधेयांशाः -

- महाकविः कालिदासः स्वीयरघुवंशादीनां काव्यानाम् अपेक्षया अभिज्ञानशाकुन्तल-नाटकस्य रचनया एव अधिकं यशः प्राप्तवान्।
- कालिदासः अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम् इति त्रीणि रूपकाणि रचितवान्।
- अस्य नाटकस्य मूलकथा महाभारतस्य आदिपर्वणि वर्तते।
- अस्मिन् नाटके सप्त अङ्काः (७) सन्ति।
- अस्य नाटकस्य सप्तसु अङ्केषु चतुर्थः अङ्कः अत्यन्तं रमणीयः वर्तते।
- चतुर्थे अङ्के शकुन्तलायाः पतिगृहं प्रति गमनवृत्तान्तः वर्णितः।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. अभिज्ञानशाकुन्तलनाटकस्य रचयिता कः?

२. कालिदासस्य लोके सर्वाधिकं यशः केन कारणेन सम्प्राप्तम्?

३. कालिदासः कति रूपकानि अरचयत्?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. शाकुन्तलनाटकमुद्दिश्य का प्रशस्तिः प्रसिद्धा?

५. शाकुन्तलनाटकस्य मूलकथा कुत्र वर्तते?

(II) रिक्तस्थानानि पूरयत।

१. दुष्यन्तः _____ राज्यस्य राजा।

२. मृगयया श्रान्तः दुष्यन्तः _____ आगतवान्?

३. शकुन्तलायाः पतिगृहगमनवर्णनं _____ अङ्के वर्तते।

४. काव्येषु नाटकं रम्यं तत्र रम्या _____।

५. तत्रापि च _____ तत्र _____।

(III) समीचीनमुत्तरं चिनुत।

१. कालिदासस्य नाटकेषु विक्रमादित्यसम्बद्धं नाटकं किम्? ( )

(क) प्रतापविजयम् (ख) विक्रमविजयम्

(ग) विक्रमोर्वशीयम् (घ) प्रतापविक्रमीयम्

२. शाकुन्तलनाटके कति अङ्काः सन्ति? ( )

(क) सप्त (ख) अष्ट (ग) नव (घ) दश

३. शकुन्तलायाः हितार्थं कण्वमहर्षिः कुत्र गतवान्? ( )

(क) तुम्बुरतीर्थम् (ख) नरसिंहतीर्थम्

(ग) रामतीर्थम् (घ) सोमतीर्थम्

४. दुष्यन्तशकुन्तलयोः कीदृशः विवाहः सम्पन्नः? ( )

(क) गान्धर्वः (ख) प्राजापत्यः

(ग) आसुरः (घ) राक्षसः

(IV) परस्परं योग्यं योजयत।

१. आश्रमे शकुन्तला निजसखीभिः कण्वमहर्षिः ( )

२. अभिज्ञानशाकुन्तलस्य नायकः तत्र रम्या शकुन्तला ( )

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. शकुन्तलायाः पिता वृक्षेषु जलं सिञ्चन्ती आसीत् ( )

४. काव्येषु नाटकं रम्यम् दुष्यन्तः ( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. हृदयम् -

२. स्नेहः -

३. तनया -

४. रम्यम् -

(VI) विस्तरेण निबन्धं रचयत।

१. अभिज्ञानशाकुन्तलनाटकस्य समग्रं परिचयम् उपस्थापयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षोडशः पाठः

उत्तररामचरितम्

प्रयोजनानि -

⇨ संस्कृतवाङ्मये अतीवमनोहरस्य नाटकस्य परिचयम् अनेन पाठेन प्राप्नुमः।

⇨ भवभूतिमहाकवेः विशिष्टकाव्यनिर्माणोचितां प्रतिभाम् इतो वयं जानीमः।

⇨ करुणरसप्रधानस्य नाटकस्यास्य अध्ययनेन महान् आत्मलाभः स्यादेव।

पाठारम्भः -

कालिदासस्य अभिज्ञानशाकुन्तलादनन्तरं पुनस्तादृशं सुप्रसिद्धं नाटकं द्वितीयमस्ति चेत् तदस्ति उत्तररामचरितम्। अस्य नाटकस्य रचयिता महाकविः भवभूतिः। अयं विदर्भदेशस्य पद्मपुरनिवासी। तस्य पितामहः भट्टगोपालः, **पिता नीलकण्ठः, माता जातुकर्णी** च वर्तते। अस्य श्रीकण्ठः इत्यपि अपरं नाम श्रूयते। अस्य आविर्भावकालः ई. ६८० तमवर्षतः ई. ७५० तमवर्षाभ्यन्तरे आसीदिति निश्चयः। अस्य नाटकेषु प्रयुक्तेन **पदवाक्यप्रमाणज्ञः** इत्यनेन पदेन अयं व्याकरणे मीमांसायां न्यायशास्त्रे च अतीव विद्वानिति सुस्पष्टं ज्ञायते।

महाकविना भवभूतिना त्रीणि रूपकाणि रचितानि सन्ति। तानि यथा -		
१. मालतीमाधवम्	२. महावीरचरितम्	३. उत्तररामचरितं च

अस्य महाकवेः वैदुष्येन प्रभाविताः अनन्तरवर्तिनः पण्डिताः अस्य कीर्तिं बहुधा कृतवन्तः। राजशेखरकविः साक्षाद् वाल्मीकिरेव पुनः भवभूतिरूपेण आगतः इति उक्तवान्। क्षेमेन्द्रकविः स्वीयसुवृत्ततिलकग्रन्थे भवभूतेः स्तुतिमेवं करोति।

भवभूतेः शिखरिणी निरर्गलतरङ्गिणी ।
चकिता घनसन्दर्भे या मयूरीव नृत्यति ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भवभूतिना स्वीयरूपकेषु बहुत्र शिखरिणीवृत्ते अनेके श्लोकाः रचिताः। अतः तस्य शिखरिणी नदीव अप्रतिहतधारया प्रवहति। तथैव वृष्टिसमये चकिता मयूरी इव सा नृत्यति।

पद्मपुराणस्य पातालखण्डे विद्यमानस्य रामायणस्य उत्तरकाण्डम् आधारीकृत्य भवभूतिना नाटकमिदं रचितम्। अनेन रचितेषु त्रिषु रूपकेषु एतदेव श्रेष्ठतमम्। कवित्वदृष्ट्या नाट्यकौशलदृष्ट्या च नाटकमिदम् उत्कृष्टम्। अस्मिन्नाटके सीतामातुः पुनः निर्वासनवृत्तान्तः प्राधान्येन वर्णितोऽस्ति। कविः सत्यदयास्वभाववर्णनेन सीतापरित्यागे श्रीरामस्य दोषः कोऽपि नास्तीति सत्यं स्पष्टं प्रकटयति। केवलं लोकस्य परिरक्षणार्थं श्रीरामेण धर्मः आचरितः। सीतावियोगे अपि तस्याः गुणान् चेष्टितानि वचनानि च स्मरन् अतीवदुःखपीडितो भवति। अस्मिन्नाटके करुणरसः अतीवप्रधानः सन् श्रीरामस्य दुःखेन सह अस्मान् अपि मनसि खेदयति।

स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ।।

स्नेहं वा दयां वा सुखं वा यदि साक्षात् मम प्राणसमां जानकीमपि लोकस्य आराधनार्थं त्यजामि चेदपि मम दुःखं नास्ति इति श्रीरामचन्द्रस्य अतिकठोरा इयमेव प्रतिज्ञा नाटके करुणरसं परिपोषयति।

अस्मिन्नाटके **सप्त अङ्काः (७)** सन्ति। एतेषु सप्ताङ्केषु सर्वत्र करुणरसस्यैव प्रभावः पाठकानां मनसि स्थिरां मुद्रां करोति। अस्य नाटकस्य तृतीयाङ्के श्रीरामः राज्याभिषेकानन्तरं दण्डकारण्यं प्रविशति। तत्र पूर्वं सीतया सह यत्र यत्र भ्रमितवान् तत्सर्वं पुनः स्मृत्वा सीतावियोगे महद्दुःखं प्राप्नोति। तदा श्रीरामस्य स्थितिः एवमासीत्। यथा -

दलति हृदयं गाढोद्वेगं द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ।।

हे सीते! तव वियोगदुःखेन मम हृदयमतीव खिन्नमस्ति। परन्तु तत् भग्नं न भवति। मम शरीरमपि मूर्च्छितं भवति। परन्तु प्राणान् न त्यजति। एवमयं दुःखाग्निः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शरीरस्य तापं जनयति। न तु शरीरं भस्मीकरोति। तथैव अयं विधिः मर्मभेदं करोति। परन्तु जीवनं न समापयति।

अनेन श्लोकेन श्रीरामस्य सीतां प्रति कीदृशी प्रीतिः आसीदिति, तस्याः वियोगे कियत् दुःखम् अनुभवतीति स्पष्टं ज्ञायते। एवमस्मिन् नाटके सीतारामयोः पवित्रदाम्पत्यं वर्णितम्। नाटकान्ते पुत्राभ्यां लवकुशाभ्यां सह सीतारामयोः अपि समागमः जायते। तेन नाटकमिदं सुखान्तं सम्पन्नम्।

भवभूतेः शिखरिणी रसामृततरङ्गिणी इत्येवम् अस्य नाटकस्य आस्वादनेन सहृदयाः भवभूतिं प्रशंसन्ति।

अवधेयांशाः -

- कालिदासस्य अभिज्ञानशाकुन्तलस्य अनन्तरं पुनः तादृशं सुप्रसिद्धं नाटकं द्वितीयमस्ति चेत् तदस्ति उत्तररामचरितम्।
- अस्य नाटकस्य रचयिता महाकविः भवभूतिः।
- भवभूतेः पितामहः भट्टगोपालः, पिता नीलकण्ठः, माता जातुकर्णी च वर्तते।
- अस्य कवेः श्रीकण्ठः इति अपरं नाम वर्तते।
- अस्य कालः ६८० तः ७५० ईसवीयवर्षाणाम् अभ्यन्तरे स्यात् इति निश्चयः।
- मालतीमाधवं, महावीरचरितम्, उत्तररामचरितम् इति अस्य कवेः त्रीणि नाटकानि सन्ति।
- पद्मपुराणस्य पातालखण्डे विद्यमानस्य रामायणस्य उत्तरकाण्डम् आधारीकृत्य रचितम् इदं नाटकम्।
- **भवभूतेः शिखरिणी रसामृततरङ्गिणी** इति सहृदयलोके भवभूतेः प्रशस्तिः अस्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. भवभूतेः त्रीणि रूपकानि कानि?

२. भवभूतेः स्थितिकालः कः?

३. पदवाक्यप्रमाणज्ञः इत्यस्य अभिप्रायः कः?

४. क्षेमेन्द्ररचितः भवभूतिस्तुतिपरकः श्लोकः कः?

५. उत्तररामचरितस्य मूलकथा कुत्र वर्तते?

(II) रिक्तस्थानानि पूरयत।

१. भवभूतिः विदर्भदेशस्य _____ पुरे निवसति स्म।

२. भवभूतिमहाकवेः माता _____।

३. उत्तररामचरितनाटके _____ अङ्काः सन्ति।

४. प्रहरति विधिः _____ न कृन्तति जीवितम्।

(III) समीचीनमुत्तरं चिनुत।

१. भवभूतेः पितामहः कः? ( )

(क) भट्टगोपालः (ख) भट्टभूपालः

(ग) भट्टश्रीपालः (घ) भट्टनृपालः

२. भवभूतेः पिता कः? ( )

(क) मधुकण्ठः (ख) मणिकण्ठः

(ग) नीलकण्ठः (घ) गरलकण्ठः

३. भवभूतेः अपरं नाम किम्? ( )

(क) श्रीभूतिः (ख) श्रीपतिः

(ग) मृदुकण्ठः (घ) श्रीकण्ठः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. उत्तररामचरितनाटके प्रधानरसः कः? ( )

(क) वीररसः (ख) करुणरसः

(ग) शान्तरसः (घ) अद्भुतरसः

(IV) परस्परं योग्यं योजयत।

१. भवभूतिः	लवकुशौ	( )
२. श्रीरामस्य धर्मपत्नी	श्रीकण्ठः	( )
३. आराधनाय लोकस्य	सीतादेवी	( )
४. सीतारामयोः पुत्रौ	मुञ्चतो नास्ति मे व्यथा।	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. मयूरी -

२. दया -

३. लोकः -

४. व्यथा -

५. जीवितम् -

(VI) लघुनिबन्धं रचयत।

१. भवभूतिमहाकवेः परिचयं लिखत।

२. 'दलति हृदयं.....' इत्यस्य श्लोकस्य विवरणं कुरुत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठम् अवलम्ब्य भवभूतिकवेः उत्तररामचरितस्य च समग्रं वृत्तान्तं प्रतिपादयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सप्तदशः पाठः

वेणीसंहारम्

प्रयोजनानि -

⇨ संस्कृते वीररसप्रधानेषु नाटकेषु वेणीसंहारनाटकं सुप्रशस्तमिति अनेन पाठेन वयं जानीमः।

⇨ अस्मिन्नाटके विद्यामानान् गुणान् अपि यथासम्भवं ज्ञातुं प्रयत्नं कुर्मः।

⇨ अस्य अपि नाटकस्य अध्ययनेन आत्मलाभः महान् भवेत् इति निश्चयः इतः जायते।

पाठारम्भः -

महाकविः भट्टनारायणः वेणीसंहारनामकेन एतेन एकेन एव नाटकेन सुविशालां कीर्तिम् आर्जितवान्। नाट्यशास्त्रस्य नियमानाम् अनुसारेण एतन्नाटकम् अतीवश्रेष्ठम् अस्ति। अतः एव अस्य नाटकस्य बहूनि उदाहरणानि बहुषु नाट्यशास्त्रग्रन्थेषु स्वीकृतानि। अस्य नाटकस्य प्रस्तावनायां भट्टनारायणस्य विषये **''मृगराजलक्ष्मा''** इत्ययं शब्दः दृश्यते। एतेन भट्टनारायणस्य **कविमृगेन्द्रः** इति बिरुदं तत्कालीने कविसमाजे प्रसिद्धमासीदिति ज्ञातुं शक्नुमः। अस्य कवेः कालः ई. ६५० वर्षाणां समीपवर्ती इति प्रमाणितमस्ति।

वेणीसंहारनाटके **षड् अङ्काः** सन्ति। अस्मिन् नाटके
भीमः प्रधाननायकः वर्तते।
तथैव तस्य स्वभावानुसारं **वीररसः प्रधानः**।

कुरुसभायां द्रौपद्याः अपमाननेन कुपितः भीमसेनः दुर्योधनस्य ऊरुभङ्गं कृत्वा दुःशासनस्य हृदयभङ्गं कृत्वा तेन रक्तसिक्तेन हस्तेन द्रौपद्याः वेणीसंवाहनं करोमीति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भीमस्य अतीवकठोरप्रतिज्ञा अस्मिन् नाटके प्राधान्येन दृश्यते। तत्र भीमस्य वचनेषु एव एतं श्लोकं पश्यामः।

चञ्चद्भुजभ्रमितचण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावनध्दघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि भीमः ॥

अनन्तरं युधिष्ठिरः कौरवैः सह येन केनापि उपायेन सन्धिं कर्तुमिच्छतीति ज्ञात्वा भीमसेनः इतोऽपि क्रुद्धः आसीत्। यतो हि कौरवैः सन्धिर्भवति चेत् दुर्योधनदुश्शासनयोः संहारं कृत्वा भीमसेनः स्वीयप्रतिज्ञां साधयितुं न शक्नोति।

एवं कथाक्रमेण स्वीयजनकस्य द्रोणस्य मरणवार्तां श्रृत्वा अश्वत्थामा शोकेन कोपेन च युद्धक्षेत्रमागत्य मम पितुः संहारकं नराधमम् अहमवश्यं संहरिष्यामीति एवं वदति, यथा-

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकम्
मनुजपशुभिर्निर्मर्यादैः भवद्भिरुदायुधैः ।
नरकरिपुना सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥

ये मम पितुः संहारं कृतवन्तः अङ्गीकृतवन्तः अथवा दृष्टवन्तः तान् मनुष्यपशून् मर्यादारहितान् कृष्णार्जुनभीमादीन् अहमवश्यं संहृत्य तेषां रुधिरमांसैः सर्वदिशानां बलिं करोमि इति श्लोकस्य अस्य तात्पर्यम्।

एवं षष्ठाङ्के भीमः दुर्योधनस्य जानुभङ्गं कृत्वा दुःशासनस्य वक्षःस्थलभेदनं कृत्वा तदीयरक्तसिक्तेन हस्तेन द्रौपद्याः वेणीसंवाहनं कृत्वा भीमसेनः निजप्रतिज्ञां साधितवान्। एतेन नाटकमिदं सुखान्तं सम्पन्नम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अवधेयांशाः -

- वेणीसंहारस्य रचयिता महाकविः भट्टनारायणः।
- कविमृगेन्द्रः इति अस्य कवेः बिरुदं स्यात्।
- अस्य कवेः कालः ई. ६५० वर्षाणां समीपवर्ती इति ऐतिहासिकानां निर्णयः।
- वेणीसंहारनाटके षट् (६) अङ्काः सन्ति।
- अस्मिन् नाटके भीमसेनः नायकः, प्रधानरसः वीरः च वर्तते।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. भट्टनारायणस्य सुप्रसिद्धं नाटकं किम्?

२. 'मृगराजलक्ष्मा' इत्यस्य पदस्य आशयः कः?

३. भट्टनारायणस्य कालः कः?

४. भीमस्य प्रतिज्ञा का आसीत्?

(II) रिक्तस्थानानि पूरयत।

१. नाट्यशास्त्रस्य नियमानाम् अनुसारेण _____ नाटकम् अतीव श्रेष्ठम्।

२. _____ बिरुदं भट्टनारायणस्य कविसमाजे प्रसिद्धं स्यादिति वक्तुं शक्नुमः।

३. युधिष्ठिरः कौरवैः सह _____ कर्तुम् इष्टवान्।

(III) समीचीनमुत्तरं चिनुत।

१. वेणीसंहारनाटके कति अङ्काः सन्ति? ( )

(क) ५ (ख) ६ (ग) ७ (घ) ८

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. वेणीसंहारनाटके प्रधानरसः कः? ( )

(क) हास्यः (ख) करुणः (ग) रौद्ररसः (घ) वीररसः

३. द्रोणस्य पुत्रः कः? ( )

(क) अभिमन्युः (ख) उत्तरः (ग) अश्वत्थामा (घ) घटोत्कचः

(IV) परस्परं योग्यं योजयत।

१. भट्टनारायणः	तव देवि भीमः	( )
२. भीमसेनः	मृगराजलक्ष्मा	( )
३. उत्तंसयिष्यति कचान्	कथानायकः	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. भुजौ -

२. रक्तम् -

३. पशुः -

(VI) लघुनिबन्धं रचयत।

१. महाकवेः भट्टनारायणस्य परिचयं लिखत।

२. 'चञ्चद्भुजभ्रमित...' इत्यस्य श्लोकस्य विवरणं कुरुत।

३. 'कृतमनुमतं.....' इत्यस्य श्लोकस्य विवरणं कुरुत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठम् आधारीकृत्य भट्टनारायणस्य वेणीसंहारनाटकस्य च समग्रं परिचयम् उपस्थापयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अष्टादशः पाठः

मुद्राराक्षसम्

प्रयोजनानि -

⇨ संस्कृतवाङ्मये राजनीतिप्रधानेषु नाटकेषु मुद्राराक्षसं प्रसिद्धमिति अनेन पाठेन वयं जानीमः।

⇨ विशाखदत्तः अस्य नाटकस्य निर्माणे स्वकीयं राजनीतिपाण्डित्यं बहु दर्शितवान् इति तथ्यम् इतः जानीमः।

⇨ चाणक्यस्य मन्त्राङ्गकुशलतायाः परिचयं प्राप्तुं नाटकमेतत् अवश्यम् अध्ययनीयम् इति प्रेरणां वयम् एतेन पाठेन प्राप्नुमः।

पाठारम्भः -

संस्कृतनाटकेषु राजनीतिप्रधानं नाटकम् इदं मुद्राराक्षसम् अतीव प्रख्यातम्। अस्य नाटकस्य रचयिता महाकविः विशाखदत्तः। अयं राजपरिवारे जातः इति कारणात् स्वभावतः राजनीतिनिपुणः। अस्य पितामहः **'सामन्तवटेश्वरदत्तः'** पिता **भास्करदत्तः** च आसीत्। अयं मगधदेशस्य निवासी। अस्य कालः ई.४००-४५० वर्षाणाम् अभ्यन्तरे आसीत्।

महाकविना विशाखदत्तेन मुद्राराक्षसनाटकेन सह **देवीचन्द्रगुप्तम्** इति अन्यदपि नाटकं रचितम्। दुरदृष्टवशात् नाटकमिदम् अधुना नोपलभ्यते।

मुद्राराक्षसनाटके **सप्त अङ्काः** सन्ति। अस्मिन् नाटके नन्दवंशचक्रवर्तिनः विश्वस्तः अमात्यः राक्षसः आसीत्। तस्य एव मन्त्रिमुद्रया चाणक्यः अतीव चातुर्येण नन्दवंशस्य विनाशानन्तरं मगधसाम्राज्यचक्रवर्तिनः चन्द्रगुप्तस्य अमात्यस्थाने राक्षसम् उपवेशितवान् इति कारणात् नाटकस्य अस्य नाम मुद्राराक्षसमिति सार्थकं जातम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्मिन् नाटके मगधसाम्राज्ये नन्दवंशविनाशः एवं मौर्यवंशस्य स्थिरपालनम् एतदेव मुख्यम् इतिवृत्तम्। कूटनीतिधुरन्धरः राजनीतिनिपुणः चाणक्यः एव अस्य कार्यद्वयस्य साधकः। अतः एव चाणक्यः स्वमनसि एवं चिन्तयति यथा -

समुत्खाता नन्दा नवहृदयरोगा इव भुवः
कृता मौर्ये लक्ष्मीः सरसि नलिनीव स्थिरपदा ।
द्वयोः सारं तुल्यं द्वितयमभियुक्तेन मनसा
फलं कोपप्रीत्योर्द्विषति च विभक्तं सुहृदि च ॥

भूमेः हृदयरोगाः इव नन्दाः सर्वेऽपि समूलं विनाशिताः। सरोवरे पद्मपुष्पमिव मगधसाम्राज्यस्य मौर्यचन्द्रगुप्तं चक्रवर्तिस्थाने स्थापितवान्। एवम् अहम् अतीव निपुणतया कोपं शत्रुषु प्रीतिं च निजशिष्ये तथा मित्रेषु च प्रदर्शितवान् इति अस्य श्लोकस्य भावः।

एतन्नाटकं चाणक्यस्य कूटनीतिविज्ञानं, चन्द्रगुप्तस्य असाधारणपराक्रमं, राक्षसस्य राजभक्तिं च अस्मान् सम्यक् ज्ञापयति। अतः एव अस्य नाटकस्य नायकविषये केचन चन्द्रगुप्तं, केचन चाणक्यं नायकमिति निर्णयं प्रकटयन्ति। परन्तु आधिक्येन अस्य नाटकस्य नायकः चाणक्यः एव इति वादः बहुसम्मतः। अस्मिन् नाटके नायिका नास्ति।

अवधेयांशाः -

- राजनीतिप्रधाननाटकेषु नाटकमिदम् अतीव सुविख्यातम्।
- मुद्रारक्षसनाटकस्य रचयिता महाकविः विशाखदत्तः वर्तते।
- अस्य पितामहः सामन्तवटेश्वरदत्तः, पिता भास्करदत्तः च वर्तते।
- अयं मगधदेशस्य निवासी।
- अस्य कालः क्री.श. ४००-४५० वर्षाणाम् अभ्यन्तरे आसीत्।
- अयं कविः मुद्राराक्षसेण सह देवीचन्द्रगुप्तम् इति अन्यदपि नाटकं रचितवान्। परन्तु तत् सम्प्रति नोपलभ्यते।
- मुद्राराक्षसनाटके सप्त अङ्काः सन्ति।
- अस्मिन् नाटके प्रधानकथानायकः चाणक्यः।
- अस्मिन् नाटके नायिका नास्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. संस्कृतवाङ्मये राजनीतिप्रधानं नाटकं किम्?

२. महाकविना विशाखदत्तेन रचितं नाटकद्वयं किम्?

३. विशाखदत्तस्य कालः कः?

४. मुद्राराक्षसनाटके प्रधानम् इतिवृत्तं किम्?

५. अस्य नाटकस्य मुद्राराक्षसमिति नाम कथम् आगतम्?

(II) रिक्तस्थानानि पूरयत।

१. विशाखदत्तस्य पितामहः _____ ।

२. नन्दवंशचक्रवर्तिनः विश्वस्तः अमात्यः _____ ।

३. मगधसाम्राज्ये _____ वंशस्य विनाशः जातः।

४. विशाखदत्तः _____ देशे वसति स्म।

(III) समीचीनमुत्तरं चिनुत।

१. विशाखदत्तस्य पिता कः? ( )

(क) सूर्यदत्तः (ख) रविदत्तः (ग) इनदत्तः (घ) भास्करदत्तः

२. मुद्राराक्षसनाटके कति अङ्काः सन्ति? ( )

(क) ६ (ख) ७ (ग) ८ (घ) १

३. मुद्राराक्षसनाटके नायकः कः इति पण्डितैः सम्मतः? ( )

(क) राक्षसः (ख) चन्द्रगुप्तः (ग) चाणक्यः (घ) धनानन्दः

४. मुद्राराक्षसनाटके का नास्ति? ( )

(क) विदूषिका (ख) नायिका (ग) गुरुपत्नी (घ) चेटी

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(IV) परस्परं योग्यं योजयत।

१. राक्षसः	मगधसाम्राज्यचक्रवर्ती	( )
२. चाणक्यः	नवहृदयरोगा इव भुवः	( )
३. चन्द्रगुप्तः	धनानन्दस्य अमात्यः	( )
४. समुत्खाता नन्दाः	चन्द्रगुप्तस्य गुरुः	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. रोगः -

२. सरः -

३. कोपः -

४. राजभक्तिः -

(VI) लघुनिबन्धं रचयत।

१. महाकवेः विशाखदत्तस्य परिचयं लिखत।

२. 'समुत्खाता नन्दाः...' इत्यस्य श्लोकस्य विवरणं कुरुत।

(VII) विस्तरेण निबन्धं रचयत।

१. प्रस्तुतपाठम् उपलम्ब्य विशाखदत्तकवेः मुद्राराक्षसनाटकस्य च समग्रं वृत्तान्तं विशदयत।

परियोजना

पञ्चमहानाटकेषु सुप्रसिद्धान् श्लोकान् एकत्र समाहृत्य सम्यक् कण्ठस्थीकुरुत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सप्तमखण्डः

अलङ्कारशास्त्रस्य आचार्याः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकोनविंशः पाठः

भरतमहर्षिः

प्रयोजनानि -

⇨ भारतीयवाङ्मये सर्वादिमः नाट्यशास्त्रस्य प्रवर्तकः भरतमुनिः इति तथ्यम् अनेन पाठेन जानीमः।

⇨ भारतीयललितकलानां विश्वकोशः भवति नाट्यशास्त्रम् इत्यनेन वचनेन अस्य ग्रन्थस्य अध्ययनार्थम् अस्माकं महती रुचिः अपि अस्य पाठस्य माध्यमेन जायते।

पाठारम्भः -

नाट्यशास्त्रस्य सर्वप्रथमः आचार्यः भरतमुनिः अस्ति। तस्य नाट्यशास्त्रमपि अस्य शास्त्रस्य सर्वप्रथमः ग्रन्थः।

भरतमहर्षेः पूर्वम् अस्य शास्त्रस्य आचार्याः सन्ति वा? इति चेत् स्वयं भरतमुनिः नाट्यशास्त्रे नन्दिकेश्वराचार्यस्य नामग्रहणं कृतवान् अस्ति। इतोऽपि इतिहासस्य अध्ययनेन सहस्राक्षः, सुवर्णनाभः, प्रचेतायनः, पुलस्त्यः, पराशरः इत्यादयः आचार्याः अस्य शास्त्रस्य प्रवर्तकाः आसन् इति ज्ञायते। परन्तु एतेषाम् आचार्याणां ग्रन्थाः के अपि न लभन्ते।

भरतमहर्षेः जन्मकालस्य विषये बहवः वादाः सन्ति। तत्र व्याकरणशास्त्रस्य इतिहासलेखकस्य युधिष्ठिरमीमांसकस्य मते भरतमहर्षेः जीवनकालः क्री.पू. पञ्चशतवर्षतः (५००) क्री.पू. सहस्रवर्षात्मकमध्यकाले (१०००) आसीदिति निर्णयः अस्ति। तथैव हरप्रसादशास्त्री, मनमोहनघोषः, डा. कीथः इत्यादीनां विमर्शकानां मते तु भरतमहर्षेः जीवनकालः क्री.पू. त्रिशतवर्षेभ्यः (३००) पूर्वमेव आसीदिति निश्चयः। भारतीयपरम्परानुसारेण भरतमुनिः वैदिककालात् उत्तरवर्ती, पुराणकालात् पूर्ववर्ती इति तु सत्यम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्य महर्षेः नाट्यशास्त्रमिति एकः एव ग्रन्थः सुप्रसिद्धः अस्ति। सः ग्रन्थः भारतीयप्राचीनललितकलानां विश्वकोशः इति विख्यातः। अस्मिन् ग्रन्थे षट्त्रिंशत्(३६) अध्यायाः सन्ति।

तेषु अध्यायेषु नाट्यस्वरूपम्, रूपकप्रयोगः, रसस्वरूपम्, भावविचारः, अभिनयप्रकाराः, पात्रस्वभावाः, लोकधर्मः, छन्दसां (श्लोकवृत्तानाम्) स्वरूपम्, चित्रकला, वाद्योपकरणप्रयोगः, गानकला इत्यादयः बहवः विषयः सुनिशिततया अतीव विस्तरेण चर्चिताः सन्ति।

अस्य नाट्यशास्त्रग्रन्थस्य बहवः टीकाग्रन्थाः व्याख्याग्रन्थाः आसन्। परन्तु अद्यतनकाले अभिनवगुप्ताचार्येण विरचिता **अभिनवभारती** इति एकः एव टीकाग्रन्थः नाट्यशास्त्रस्य लभ्यते। अयं टीकाग्रन्थः विषयविचारदृष्ट्या अत्यन्तं महत्त्वपूर्णः पाण्डित्यपरिपूर्णः च वर्तते। अस्याः टीकायाः **नाट्यवेदविवृतिः** इति अपरमपि प्रसिद्धं नाम विद्यते।

एतां टीकाम् अभिनवगुप्ताचार्यः बहूनां पूर्वाचार्याणां टीकाग्रन्थान् सम्यक् परिशील्य एव रचितवान्। परन्तु तेषां टीकाग्रन्थेषु एकोऽपि ग्रन्थः अधुना न लभ्यते। ते च पूर्वाचार्याः एवं सन्ति। उद्भटः, भट्टलोल्लटः, शङ्कुकः, भट्टनायकः, राहुलः, भट्टमन्त्रः, कीर्तिधरः, हर्षवार्तिकः, मातृगुप्तः च।

अवधेयांशाः -

- नाट्यशास्त्रस्य सर्वप्रथमः आचार्यः भरतमुनिः। तस्य नाट्यशास्त्रमपि काव्यशास्त्रस्य सर्वप्रथमः ग्रन्थः।
- भरतमहर्षेः जीवनकालः क्री.पू. पञ्चशतवर्षतः (५००) क्री.पू. सहस्रवर्षात्मक-मध्यकाले (१०००) आसीदिति निर्णयः।
- नाट्यशास्त्रस्य परिशीलनेन भरतमहर्षेः पूर्वं नन्दिकेश्वरः, सहस्राक्षः, सुवर्णनाभः इत्यादयः आचार्याः आसन् इति ज्ञायते।
- भारतीयपरम्परानुसारेण भरतमुनिः वैदिककालात् उत्तरवर्ती, पुराणकालात् पूर्ववर्ती इति तु सत्यम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- नाट्यशास्त्रे षट्त्रिंशत् (३६) अध्यायाः सन्तिः
- नाट्यशास्त्रस्य अभिनवगुप्ताचार्येण रचिता अभिनवभारती इति टीका सुप्रसिद्धा वर्तते।
- अभिनवभारतीटीकायाः नाट्यवेदविवृतिः इति अपरं प्रसिद्धं नाम विद्यते।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. नाट्यशास्त्रस्य सर्वप्रथमः आचार्यः कः अस्ति?

२. युधिष्ठिरमीमांसकस्य मते भरतस्य जन्मकालः कः?

३. नाट्यशास्त्रं केन नाम्ना विख्यातम्?

४. नाट्यशास्त्रस्य टीकाकारः कः?

५. अभिनवभारतीव्याख्यानस्य अपरं नाम किम्?

(II) रिक्तस्थानानि पूरयत।

१. काव्यशास्त्रस्य सर्वप्रथमः ग्रन्थः _____ अस्ति।

२. भरतमुनिः नाट्यशास्त्रे _____ नामग्रहणं कृतवान्।

३. हरप्रसादशास्त्री इत्यादिविमर्शकानां मते भरतमुनेः जीवनकालः _____ इति निश्चितः।

४. अभिनवगुप्ताचार्येण _____ नाम्ना नाट्यशास्त्रस्य टीकाग्रन्थः रचितः।

(III) समीचीनमुत्तरं चिनुत।

१. भरतमहर्षेः पूर्वं नाट्यशास्त्रस्य आचार्येषु एकः कः? ( )

(क) सुवर्णवर्मा (ख) सहस्राक्षः (ग) प्रचेतनः (घ) प्रहर्षणः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. भारतीयपरम्परानुसारं भरतमहर्षेः जन्मकालः कः? ( )

(क) वेदकालादुत्तरवर्ती (ख) पुराणकालात् उत्तरवर्ती

(ग) ब्राह्मणकालीनः (घ) काव्यकालीनः

३. नाट्यशास्त्रे कति अध्यायाः सन्ति? ( )

(क) ३४ (ख) ३५ (ग) ३६ (घ) ३७

(IV) परस्परं योग्यं योजयत।

१. नन्दिकेश्वरः	नाट्यशास्त्रस्य प्रसिद्धटीकाकारः	( )
२. अभिनवगुप्तः	नाट्यशास्त्रस्य अप्राप्तटीकायाः कर्ता	( )
३. नाट्यशास्त्रम्	अभिनवभारती	( )
४. मातृगुप्तः	भरतात् पूर्वः आचार्यः	( )
५. नाट्यवेदविवृतिः	भारतीयललितकलानां विश्वकोशः	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. आचार्यः -

२. निश्चयः -

३. पूर्वम् -

(VI) लघुनिबन्धं रचयत।

१. भरतमहर्षेः परिचयं लिखत।

२. नाट्यशास्त्रग्रन्थस्य परिचयं लिखत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विंशः पाठः

व्यासमहर्षिः

प्रयोजनानि -

⇨ व्यासमहर्षिणा सम्पादिते अग्निपुराणे काव्यशास्त्रस्य के के विषयाः सन्तीति जानीमः।

⇨ काव्यशास्त्रस्य प्राचीनं स्वरूपम् अपि ज्ञातुं शक्नुमः।

पाठारम्भः -

अग्निपुराणे धर्मस्य भारतीयसभ्यतायाश्च वर्णनेन सह व्याकरणशास्त्रस्य, काव्यशास्त्रस्य, दर्शनानाम्, औषधविज्ञानस्य, कोशानां, ज्यौतिषशास्त्रस्य च विषये अपि विशालः विचारः वर्तते। अतः एव एतत्पुराणं भारतीयविज्ञानस्य विश्वकोशः भवितुम् अर्हति।

सर्वेषाम् अष्टादशपुराणानां लेखकः व्यासमहर्षिः इति भारतीयानां विश्वासः। परन्तु आधुनिक-विमर्शकानां मते व्यासमहर्षिः एतेषां पुराणानां सम्पादकः एव। न तु लेखकः। तथा चेत् अग्निपुराणस्य मूललेखकः कः भवेत्? इति अत्र एका कथा वर्तते। सूतमहर्षिः शौनकादिमहर्षीणां कृते पुराणप्रवचनं कृतवान्। सः सूतः वेदव्यासस्य सकाशात् पुराणज्ञानं प्राप्तवान्। व्यासः वशिष्ठमहर्षेः सकाशात् पुराणविद्यां प्राप्तवान्। वशिष्ठः एतत् ज्ञानम् अग्निदेवस्य अनुग्रहेण प्राप्तवान्। एवम् अग्निदेवः अस्य पुराणस्य लेखकः स्यादिति यद्यपि वादः अस्ति, तथापि अयं वादः प्रमाणमूलः भवति वा न वा इति सन्देहः।

अग्निपुराणस्य कालविषये अपि बहुमतभेदः दृश्यते। भरतमहर्षेः पूर्वमेव अग्निपुराणम् आसीदिति केषाञ्चित् वादः। अग्निपुराणस्य रचना भिन्नभिन्नकालेषु भिन्नभिन्नव्यक्तिभिः कृता। अतः एव अस्य पुराणस्य लेखनसमाप्तिः नवमशताब्दकाले जाता इति केषाञ्चित् वादः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अग्निपुराणस्य षट्त्रिंशदुत्तरत्रिशततमात् (३३६) अध्यायात् आरभ्य षट्चत्वारिंशदुत्तरत्रिशततमम् (३४६) अध्यायं यावत्, आहत्य एकादशसु अध्यायेषु काव्यलक्षणं, काव्यभेदाः, रूपकाणि, रसविचारः, पात्रविचारः, रीतिवृत्तिविचारः, प्रहेलिकाः, बन्धाः, अलङ्काराः इत्यादयः बहवः विषयाः विस्तरेण प्रतिपादिताः।

अवधेयांशाः -

- अग्निपुराणे धर्मस्य भारतीयसभ्यतायाः वर्णनेन सह व्याकरण-काव्य-दर्शन-आयुर्वेद-कोश-ज्योतिषशास्त्राणां विषये विशालः विचारः वर्तते।
- अग्निपुराणस्य लेखनसमाप्तिः नवमशताब्दकाले जाता इति केषाञ्चित् वादः।
- अग्निपुराणस्य ३३६ तमात् अध्यायात् आरभ्य ३४६ तमाध्यायपर्यन्तम् आहत्य एकादशसु अध्यायेषु काव्यशास्त्रविचाराः सन्ति।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. अग्निपुराणस्य सम्पादकः कः?

२. अग्निपुराणे केषां शास्त्राणां विचारः वर्तते?

३. अग्निपुराणस्य कालः कः?

(II) रिक्तस्थानानि पूरयत।

१. आधुनिकविमर्शकानां मते व्यासमहर्षिः पुराणानां _____ एव। न तु _____।

२. _____ शौनकादिमहर्षीणां कृते पुराणप्रवचनं कृतवान्।

३. सूतमहर्षिः _____ सकाशात् पुराणज्ञानं प्राप्तवान्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(III) समीचीनमुत्तरं चिनुत।

१. वशिष्ठमहर्षेः सकाशात् पुराणविद्यां कः प्राप्तवान्? ( )

(क) व्यासः (ख) सुतः (ग) शौनकः (घ) पैलः

२. कस्य अनुग्रहेण वशिष्ठमहर्षिः पुराणविद्यां प्राप्तवान्? ( )

(क) वायुदेवस्य (ख) अग्निदेवस्य (ग) वरुणदेवस्य (घ) इन्द्रदेवस्य

३. भारतीयविज्ञानस्य विश्वकोशत्वेन किं पुराणं प्रसिद्धम्? ( )

(क) गरुडपुराणम् (ख) वायुपुराणम् (ग) अग्निपुराणम् (घ) पद्मपुराणम्

(IV) परस्परं योग्यं योजयत।

१. अग्निपुराणम्	अष्टादश	( )
२. काव्यशास्त्रविषयाः	भारतीयविज्ञानस्य विश्वकोशः	( )
३. पुराणानि	अग्निपुराणे ३३६ आरभ्य ३४६ पर्यन्तम्	( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. पुराणम् -

२. धर्मः -

३. संस्कृतिः -

(VI) लघुनिबन्धं रचयत।

१. अग्निपुराणस्य परिचयं लिखत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकविंशः पाठः

भामहाचार्यः

प्रयोजनानि -

⇨ अलङ्कारशास्त्रविषये भामहाचार्यस्य योगदानं कियदिति जानीमः।

⇨ काव्यालङ्कारग्रन्थस्य अलङ्कारशास्त्रे कीदृशं प्राधान्यम् अस्ति इति ज्ञातुं शक्नुमः।

पाठारम्भः -

यथा नाट्यशास्त्रस्य प्रथमाचार्यः भरतमुनिः अस्ति, तथैव काव्यशास्त्रस्य प्रथमाचार्यः भामहः अस्ति इति प्रसिद्धिः विद्यते। अयं अस्य शास्त्रस्य अतीव सम्मानितः प्रतिष्ठितः आचार्यः वर्तते।

भामहाचार्यस्य काव्यालङ्कारः इति एकः एव सुप्रसिद्धः स्वतन्त्रः काव्यशास्त्रग्रन्थः अस्ति। अस्य ग्रन्थस्य अन्तिमश्लोकेन भामहस्य पिता **'रक्रिलगोमी'** इति ज्ञातुं वयं शक्नुमः।

अवलोक्य मतानि सत्कवीनामवगम्य स्वधिया च काव्यलक्ष्म।
सुजनावगमाय भामहेन ग्रथितं रक्रिलगोमिसूनुनेदम्।।

अस्य ग्रन्थस्य मङ्गलाचरणश्लोकेन भामहाचार्यः **बौद्धः** स्यादिति निर्णयः। यथा-

प्रणम्य सार्वं सर्वज्ञं मनोवाक्कायकर्मभिः।
काव्यालङ्कार इत्येष यथाबुद्धि विधास्यते।।

अत्र सार्वपदस्य सर्वहितकारी इति, सर्वज्ञपदस्य बुद्धः इति अर्थः वर्तते।

भामहस्य काव्यालङ्कारनामकग्रन्थस्य अस्य भामहविवरणम् इति नाम्ना काश्मीरवासी उद्भटाचार्यः एकं टीकाग्रन्थं रचितवान् अस्ति। एतेन भामहाचार्यः अपि काश्मीरदेशीयः इति ज्ञातुं शक्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बहूनां प्रमाणानाम् आधारेण भामहाचार्यस्य कालः पञ्चमषष्ठशतमानयोः मध्यवर्ती इति ऐतिहासिकानाम् अभिप्रायः।

काव्यालङ्कारनामके अस्मिन् ग्रन्थे षट् परिच्छेदाः सन्ति। तत्र काव्यहेतुः, काव्यलक्षणम्, काव्यभेदः, गुणाः, दोषाः, अलङ्काराः, शब्दशुद्धिः इत्यादयः बहवः विषयाः सप्रमाणं निरूपिताः।

अवधेयांशाः -

- काव्यशास्त्रस्य प्रथमाचार्यः भामहः।
- भामहाचार्येण रचितः ग्रन्थः काव्यालङ्कारः।
- भामहस्य पिता 'रक्रिलगोमी'।
- भामहविवरणम् इति नाम्ना काव्यालङ्कारस्य उद्भटाचार्यः टीकाग्रन्थं रचितवान्।
- भामहः पञ्चमषष्ठशतमानयोः मध्यवर्ती आसीत्।
- काव्यलङ्कारे षट् परिच्छेदाः सन्ति।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. काव्यशास्त्रस्य प्रथमाचार्यः कः?

२. भामहाचार्यस्य काव्यशास्त्रग्रन्थः कः?

३. काव्यालङ्कारग्रन्थे के के विषयाः निरूपिताः?

(II) रिक्तस्थानानि पूरयत।

१. काव्यालङ्कारस्य मङ्गलाचरणश्लोकेन भामहाचार्यः _____ स्यादिति निर्णयः।

२. भामहस्य काव्यालङ्कारनामकग्रन्थस्य _____ इति नाम्ना टीकाग्रन्थः अस्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. भामहाचार्यस्य कालः _____ मध्यवर्ती इति ऐतिहासिकानाम् अभिप्रायः।

(III) समीचीनमुत्तरं चिनुत।

१. भामहाचार्यस्य पिता कः? ( )
(क) रक्रिलगोमी (ख) त्रिविक्रमः (ग) चक्रपाणिः (घ) पार्श्वनाथः

२. सर्वज्ञपदस्य अर्थः कः? ( )
(क) अनिरुद्धः (ख) बुद्धः (ग) प्रवीणः (घ) शालीनः

३. भामहविवरणम् इति टीकाग्रन्थस्य कर्ता कः? ( )
(क) रुद्रटाचार्यः (ख) कैय्यटाचार्यः
(ग) मम्मटाचार्यः (घ) उद्भटाचार्यः

४. काव्यालङ्कारे कति परिच्छेदाः सन्ति? ( )
(क) सप्त (ख) पञ्च (ग) षट् (घ) अष्ट

(IV) परस्परं योग्यं योजयत।

१. भामहाचार्यः काव्यालङ्कारस्य टीकाग्रन्थः ( )
२. सार्वः काश्मीरदेशीयः ( )
३. भामहविवरणम् सर्वहितकारी इत्यर्थः ( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. सुप्रसिद्धः -
२. अभिप्रायः -
३. स्वतन्त्रः -

(VI) लघुनिबन्धं रचयत।

१. भामहाचार्यस्य काव्यालङ्कारग्रन्थस्य च यथापाठं परिचयं लिखत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वाविंशः पाठः

आचार्यः दण्डी

प्रयोजनानि -

⇨ काव्यरचनया सह दण्डिकवेः अलङ्कारशास्त्रे अपि कीदृशं पाण्डित्यम् अस्तीति ज्ञातुं शक्नुमः।

⇨ काव्यशास्त्रे काव्यादर्शग्रन्थस्य प्राधान्यम् अपि जानीमः।

पाठारम्भः -

साहित्यशास्त्रे वाल्मीकिमहर्षेः व्यासमहर्षेः च कवित्वविषये यादृशं गौरवपूर्णं स्थानमस्ति तादृशमेव स्थानं दण्डिमहाकवेः वर्तते।

जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत् ।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥

आचार्यः दण्डी अवन्तिसुन्दरीकथानामके गद्यकाव्ये स्वकीयवंशपरम्परायाः परिचयं दत्तवान्। तेन गौरी, वीरथः इति एतौ द्वौ अपि दण्डिनः मातापितरौ इति ज्ञातुं शक्नुमः।

अयं न केवलं आलङ्कारिकः, अपि तु काव्यरचनायाम् अतीव सुप्रसिद्धः महाकविः अस्ति। एतस्य काव्येषु पदानि अत्यन्तं ललितानि भवन्ति इति कीर्तिः चिरस्थायिनी वर्तते।

एतस्य नामविषये अपि सन्देहः अस्ति। 'दण्डी' इति एतस्य संस्कारसिद्धं नाम वा? उत लोकप्रसिद्धं नाम वा? इति। दशकुमारचरितस्य मङ्गलाचरणश्लोके दण्डशब्दः बहुवारं प्रयुक्तः इति कारणात् अस्य दण्डी इति नाम लोके प्रसिद्धं जातमिति केचन वदन्ति। यथा -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ब्रह्माण्डच्छत्रदण्डः शतधृतभवनाम्भोरुहो नालदण्डः
क्षोणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः ।
ज्योतिश्चाक्राक्षदण्डस्त्रिभुवनविजयस्तम्भदण्डोऽब्धिदण्डः
श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः ॥

बहुभिः प्रमाणैः अयं दक्षिणदेशवासी इति, अस्य कालः सप्तमशताब्द्याः उत्तरार्धो वा, अष्टमशताब्द्याः पूर्वार्धो वा भवितुम् अर्हतीति ऐतिहासिकानां निर्णयः।

राजशेखरः दण्डिनः त्रयः ग्रन्थाः विश्वप्रसिद्धाः इति वदति। ते च - काव्यादर्शः, दशकुमारचरितम्, अवन्तिसुन्दरीकथा इति। काव्यादर्शः अलङ्कारशास्त्रग्रन्थः। अवशिष्टं ग्रन्थद्वयमपि गद्यकाव्यम् अस्ति। अवन्तिसुन्दरीकथा इत्ययं ग्रन्थः दण्डिनः अस्ति वा न वा इति मतभेदः दृश्यते।

काव्यादर्शनामके ग्रन्थे त्रयः परिच्छेदाः सन्ति। परन्तु रङ्गाचार्यमहाशयः स्वीयप्रकाशने अस्य ग्रन्थस्य चतुरः परिच्छेदान् दर्शितवान्। यतो हि तृतीयपरिच्छेदगतदोषप्रकरणं पृथक्कृत्य चतुर्थपरिच्छेदे दोषान् स्वतन्त्रतया दर्शितवान्।

त्रिषु परिच्छेदेषु काव्यलक्षणं, काव्यभेदः, रीतिविचारः, काव्यहेतुः, अलङ्काराः इत्यादयः विषयाः समीचीनतया निरूपिताः।

अवधेयांशाः -

- काव्यादर्शग्रन्थस्य लेखकः आचार्यः दण्डी।
- काव्यादर्शे त्रयः परिच्छेदाः सन्तिः।
- रङ्गाचार्यमहाशयस्य स्वीयप्रकाशिते काव्यादर्शग्रन्थे चत्वारः परिच्छेदाः सन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. काव्यादर्शग्रन्थस्य रचयिता कः?

२. साहित्यशास्त्रे दण्डिनः कीदृशं स्थानम् अस्ति?

३. आचार्यः दण्डी स्वीयपरिचयं कस्मिन् ग्रन्थे दत्तवान्?

४. दण्डिनः काव्येषु दृश्यमानः प्रसिद्धगुणः कः?

५. दण्डिनः कालः कः?

(II) रिक्तस्थानानि पूरयत।

१. दण्डी _____ देशे वसति स्म।

२. दण्डिकवेः पिता _____।

(III) समीचीनमुत्तरं चिनुत।

१. दण्डिनः मातुः नाम किम्? ( )

(क) गौरी (ख) उमा (ग) भार्गवी (घ) भवानी

२. दण्डिना रचितेषु ग्रन्थेषु अयं ग्रन्थः नास्ति। ( )

(क)काव्यादर्शः (ख) अवन्तिसुन्दरीकथा

(ग) दशकुमारचरितम् (घ) मृच्छकटिकम्

३. रङ्गाचार्यमहाशयस्य प्रकाशने काव्यादर्शस्य कति परिच्छेदाः सन्ति? ( )

(क) त्रयः (ख) चत्वारः (ग) पञ्च (घ) षड्

(IV) परस्परं योग्यं योजयत।

१. दण्डिनः जन्मस्थानं	त्रयः	( )
२. दण्डिनः काव्यगुणः	काव्यादर्शः	( )
३. दण्डिनः काव्यशास्त्रग्रन्थः	दक्षिणदेशः	( )
४. काव्यादर्शग्रन्थे परिच्छेदाः	पदलालित्यम्	( )

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. अग्निः-

२. देवः -

३. वेदः -

४. श्रेयः -

(VI) लघुनिबन्धं रचयत।

१. दण्डिकवेः काव्यादर्शग्रन्थस्य च परिचयं लिखत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्रयोविंशः पाठः

उद्भटाचार्यः

प्रयोजनानि -

⇨ काव्यशास्त्रे उद्भटाचार्यस्य महनीयतां ज्ञातुं शक्नुमः।

⇨ काव्यालङ्कारसारसङ्ग्रहस्य संक्षिप्तं परिचयं प्राप्तुं शक्नुमः।

पाठारम्भः -

उद्भटाचार्यः काश्मीरदेशमहाराजस्य जयापीडस्य सभापतिरूपेण पदम् अलङ्कृतवान् इति कल्हणस्य राजतरङ्गिण्याम् उक्तम् अस्ति।

विद्वान्दीनारलक्षेण प्रत्यहं कृतवेतनः ।
भट्टोऽभूदुद्भटस्तस्य भूमिभर्तुः सभापतिः ॥

अस्य जीवनकालः सप्तमशताब्द्याः उत्तरार्धे, अष्टमशताब्द्याः पूर्वार्धे च व्यतीतः आसीदिति ऐतिहासिकाः निरूपयन्ति।

अलङ्कारसारसङ्ग्रहः इति एतस्य एव काव्यशास्त्रग्रन्थः वर्तते। अस्मिन् ग्रन्थे षड् परिच्छेदाः, नवसप्ततिः (७९) कारिकाः, नवतिः(९०) उदाहरणश्लोकाः च सन्ति।

लघुवृत्तिनाम्ना अस्य ग्रन्थस्य प्रतीहारेन्दुराजः व्याख्यानं कृतवान् अस्ति। उद्भटाचार्यस्य कुमारसम्भवकाव्यादेव सर्वे अपि उदाहरणश्लोकाः स्वीकृताः इति अयं वदति।

अस्मिन् ग्रन्थे एकचत्वारिंशत् (४१) अलङ्काराः समीचीनतया निरूपिताः सन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अवधेयांशाः -

- उद्भटाचार्यः काश्मीरदेशमहाराजस्य जयापीडस्य सभापतिः।
- अयं सप्तम-अष्टमशताब्द्योः मध्यवर्ती आसीत्।
- काव्यालङ्कारसारसङ्ग्रहे षट् परिच्छेदाः सन्ति।
- अस्मिन् ग्रन्थे नवसप्ततिः (७९) कारिकाः, नवतिः (९०) उदाहरणश्लोकाः सन्ति।
- अस्य ग्रन्थस्य प्रतीहारेन्दुराजः 'लघुवृत्तिः' इति नाम्ना व्याख्यानं रचितवान्।
- अस्मिन् ग्रन्थे एकचत्वारिंशत् (४१) अलङ्काराः निरूपिताः सन्ति।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. काव्यालङ्कारसारसङ्ग्रहस्य कर्ता कः?

२. उद्भटाचार्यस्य कालः कः?

३. काव्यालङ्कारसारसङ्ग्रहे कति अलङ्काराः निरूपिताः सन्ति?

(II) समीचीनमुत्तरं चिनुत।

१. उद्भटाचार्यस्य निवासस्थानं किम्? ( )

(क) मगधदेशः (ख) पाञ्चालदेशः

(ग) काश्मीरदेशः (घ) इन्द्रप्रस्थम्

२. काव्यालङ्कारसारसङ्ग्रहे कति परिच्छेदाः सन्ति? ( )

(क) पञ्च (ख) षड् (ग) सप्त (घ) अष्ट

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. काव्यालङ्कारसारसङ्ग्रहे कति उदाहरणश्लोकाः सन्ति? ( )

(क) ७० (ख) ८० (ग) १० (घ) २००

४. काव्यालङ्कारसारसङ्ग्रहस्य वृत्तेः नाम किम्? ( )

(क) लघुवृत्तिः (ख) गुरुवृत्तिः (ग) ऋजुवृत्तिः (घ) समवृत्तिः

(III) परस्परं योग्यं योजयत।

१. काव्यालङ्कारसारसङ्ग्रहे कारिकाः लघुवृत्तिव्याख्याकारः ( )

२. उद्भटाचार्यः नवसप्ततिः सन्ति ( )

३. प्रतीहारेन्दुराजः जयापीडमहाराजस्य सभापतिः( )

(IV) लघुनिबन्धं रचयत।

१. उद्भटाचार्यस्य परिचयं लिखत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्विंशः पाठः

वामनाचार्यः

प्रयोजनानि -

⇨ काव्यशास्त्रे वामनाचार्यस्य योगदानं ज्ञातुं शक्नुमः।

⇨ काव्यालङ्कारसूत्रग्रन्थस्य परिचयं प्राप्तुं शक्नुमः।

पाठारम्भः -

वामनाचार्यः अपि काश्मीरदेशमहाराजस्य जयापीडस्य मन्त्री आसीत् इति कल्हणस्य राजतरङ्गिण्याम् उक्तम् अस्ति।

मनोरथः शङ्खदत्तश्चटकः सन्धिमान् तथा।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः।।

उद्भटः वामनः उभौ अपि एकस्यैव महाराजस्य आस्थाने आस्ताम् इति हेतोः उद्भटस्य यः कालः स एव वामनस्य अपि।

काव्यशास्त्रे सर्वप्रथमतया रीतिसम्प्रदायस्य प्रवर्तकः वामनाचार्यः एव। **'रीतिरात्मा काव्यस्य'** इति कथनेन रीतिं काव्यस्य आत्मरूपतया स्वीकरोति।

अस्य **'काव्यालङ्कारसूत्रम्'** इति एकः एव ग्रन्थः अधुना उपलभ्यते। स एव काव्यशास्त्रे अतीव प्रसिद्धः अपि। अयं ग्रन्थः सूत्रात्मकः। अस्मिन् ग्रन्थे सूत्रम्, वृत्तिः, उदाहरणम् इति त्रिविधक्रमः अस्ति। सूत्राणि वृत्तिं च वामनः स्वयमेव रचितवान्। उदाहरणश्लोकान् अन्यकवीनां स्वीकृतवान्। अस्य वृत्तेः नाम **'कविप्रिया'** इति वर्तते।

प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया।
काव्यालङ्कारसूत्राणां स्वेषां वृत्तिर्विधीयते।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अयं ग्रन्थः विषयदृष्ट्या अतीवविशालः। अस्मिन् ग्रन्थे पञ्च अधिकरणानि सन्ति। एकैकस्मिन् अधिकरणे केचन अध्यायाः अपि सन्ति। आहत्य अत्र द्वादश (१२) अध्यायाः सन्ति। अत्र नवदशोत्तरत्रिशतं (३१९) सूत्राणि सन्ति।

काव्यलक्षणम्, काव्याङ्गानि, प्रयोजनम्, रीतिस्वरूपम्, दोषाः, गुणाः, अलङ्काराः, शब्दशुद्धिः इत्यादयः विषयाः अस्मिन् ग्रन्थे वर्तन्ते।

अवधेयांशाः -

- उद्भटाचार्यः वामनाचार्यः च उभौ अपि समकालिकौ काश्मीरदेशीयौ जयापीड-महाराजस्य आस्थानपण्डितौ च।
- काव्यशास्त्रे रीतिसम्प्रदायस्य प्रवर्तकः वामनाचार्यः।
- अनेन रचितः ग्रन्थः काव्यालङ्कारसूत्रमिति।
- अस्मिन् ग्रन्थे पञ्च (५) अधिकरणानि, द्वादश (१२) अध्यायाः, ३१९ सूत्राणि च सन्ति।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. वामनाचार्यस्य ग्रन्थः कः?

२. वामनाचार्यः कस्य देशस्य निवासी?

३. काव्यालङ्कारसूत्रे के के विषयाः सन्ति?

(II) समीचीनमुत्तरं चिनुत।

१. रीतिसम्प्रदायस्य प्रवर्तकः आचार्यः कः? ( )

(क) मम्मटः (ख) रुद्रटः (ग) भामहः (घ) वामनः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. काव्यालङ्कारसूत्रे कति अधिकरणानि सन्ति? ( )

(क) चत्वारि (ख) पञ्च (ग) षड् (घ) सप्त

३. काव्यालङ्कारसूत्रे कति अध्यायाः सन्ति? ( )

(क) द्वादश (ख) चतुर्दश (ग) षोडश (घ) अष्टादश

(III) परस्परं योग्यं योजयत।

१. वामनाचार्यः ३२१ ( )

२. काव्यालङ्कारसूत्रग्रन्थे सूत्राणि सूत्रम्, वृत्तिः, उदाहरणम् ( )

३. काव्यालङ्कारसूत्रे त्रिविधक्रमः कः? रीतिसम्प्रदायप्रवर्तकः ( )

(IV) एतैः पदैः स्वीयवाक्यानि रचयत।

१. ज्योतिः -

२. अधुना -

३. राजास्थानम् -

(V) लघुनिबन्धं रचयत।

१. वामनाचार्यस्य परिचयं लिखत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चविंशः पाठः

रुद्रटाचार्यः

प्रयोजनानि -

- काव्यशास्त्रे रुद्रटाचार्यस्य महत्त्वं जानीमः।
- काव्यालङ्कारग्रन्थस्य काव्यशास्त्रे कीदृशं स्थानमस्तीति ज्ञातुं शक्नुमः।

पाठारम्भः -

अयम् आचार्यः काश्मीरवासी स्यात्। नवमशताब्दी अस्य जीवनकालः। अस्य प्रसिद्धः काव्यशास्त्रग्रन्थः 'काव्यालङ्कारः' अस्ति। अस्य ग्रन्थस्य नमिसाधुः टीकां रचितवान्।

अस्मिन् ग्रन्थे षोडश (१६) अध्यायाः, एकत्रिंशदधिकसप्तशतं (७३१) श्लोकाः च सन्ति। काव्यस्वरूपम्, प्रयोजनम्, हेतुः, वृत्तिः, भाषा, रीतिः, चित्रबन्धः, अलङ्कारः, नायकभेदः, दोषः, रसस्वरूपम् इत्यादयः विषयाः अत्र विस्तरेण चर्चिताः।

काव्यालङ्कारस्य पञ्चमाध्याये विद्यमानयोः चतुर्दशपञ्चदशकारिकयोः प्रसङ्गे रुद्रटः एकं श्लोकम् उदाहृतवान्। तेन रुद्रटस्य पिता वासुकभट्टः इति ज्ञायते। तस्य अपरं नाम शतानन्दः इति। अयं सामवेदस्य प्रसिद्धः पण्डितः अपि अस्ति।

अवधेयांशाः -

- रुद्रटाचार्यः नवमशताब्दीयः काश्मीरवासी च वर्तते।
- अनेन रचितः ग्रन्थः काव्यालङ्कारः इति।
- अस्मिन् ग्रन्थे षोडश (१६) अध्यायाः, ७३१ श्लोकाः च सन्ति।
- रुद्रटाचार्यस्य पिता सामवेदपण्डितः वासुकभट्टः वर्तते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. रुद्रटाचार्यस्य अलङ्कारशास्त्रग्रन्थः कः?

२. काव्यालङ्कारस्य टीकाकारः कः?

३. काव्यालङ्कारे कति श्लोकाः?

४. काव्यालङ्कारे के के विषयाः चर्चिताः सन्ति?

(II) समीचीनमुत्तरं चिनुत।

१. काव्यालङ्कारे कति अध्यायाः सन्ति? ( )

(क) पञ्चदश (ख) षोडश (ग) सप्तदश (घ) अष्टादश

२. रुद्रटाचार्यस्य पिता कः? ( )

(क) वासुकभट्टः (ख) महिमभट्टः (ग) गणपतिभट्टः (घ) श्रीपादभट्टः

३. रुद्रटाचार्यस्य पिता कस्य वेदस्य प्रसिद्धः पण्डितः? ( )

(क) ऋग्वेदस्य (ख) यजुर्वेदस्य (ग) सामवेदस्य (घ) अथर्ववेदस्य

(III) एतैः पदैः स्वीयवाक्यानि रचयत।

१. प्रयोजनम् -

२. भाषा -

३. दोषाः -

(IV) लघुनिबन्धं रचयत।

१. रुद्रटाचार्यस्य परिचयं लिखत।

परियोजना

काव्यशास्त्रे प्रसिद्धानाम् आचार्याणां पुनश्च तेषां ग्रन्थानां सूचीं निर्मात।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अष्टमखण्डः

काव्यप्रमेयविषयाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षड्विंशः पाठः

काव्यप्रयोजनानि

प्रयोजनानि -

⇨ काव्यस्य अध्ययनेन कः लाभः पाठकानां कृते लेखकानां कृते अपि भवति? इत्यस्य प्रश्नस्य समाधानम् अत्र प्राप्तुं शक्नुमः।

⇨ कवयः महत्तरं प्रयोजनं मनसि विचिन्त्य एव एतादृशानि काव्यानि रचयन्ति इति सत्यस्यापि निश्चयः अस्माकम् अस्य पाठस्य अध्ययनेन भवति।

पाठारम्भः -

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते'।

एतां सूक्तिम् अनुसृत्य वयम् एतत् जानीमः यत्, प्रपञ्चे अतीवसामान्यजनः अपि किमपि प्रयोजनं मनसि कृत्वा एव सः यत्किमपि कार्यं करोति। एवं सामान्यजनानां लघुकार्याणि अपि प्रयोजनम् आश्रित्य एव भवन्ति चेत् आचार्याणां महाकवीनां पण्डितानां कार्याणि तु प्रयोजनं विना भवितुमेव नार्हन्ति। अतः लघुकार्यस्य वा बृहत्कार्यस्य वा करणाय सर्वेऽपि जनाः प्रयोजनं दृष्ट्वा एव प्रवर्तन्ते इति तु सत्यम्।

एवमेव काव्यस्य पठने सहृदयानां, काव्यस्य लेखने कवीनां च किमपि महत्तरं प्रयोजनम् अवश्यमेव स्यात्। एतमेव विषयं चिन्तयितुं काव्यशास्त्रे काव्यप्रयोजनविचारः प्राधान्येन भवति।

भरतमहर्षिः काव्यप्रयोजनविषये एवं वदति यथा -

दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रामजननं लोके नाट्यमेतद्भविष्यति।।

दुःखपीडितानां श्रमिकाणां विपन्नानां तपःसम्पन्नानां लोकिकजनानां सर्वेषामपि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नाटकदर्शनेन विश्रान्तिः आनन्दः च भवति। **भरतमते विश्रान्तिः काव्यप्रयोजनम् अस्ति।**

आचार्यः भामहः एतानि काव्यप्रयोजनानि वदति। यथा -

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्।।

सत्पुरुषैः रचितं काव्यं धर्म-अर्थ-काम-मोक्षरूपेषु चतुर्विधपुरुषार्थेषु एवं चतुष्षष्टिकलासु च अस्माकं पाठकानां विवेकपूर्णं ज्ञानं जनयति। तथैव काव्यलेखकस्य कवेः कीर्तिः, काव्यपाठकस्य सामाजिकस्य आनन्दः च एतत्प्रयोजनद्वयमुपि मुख्यमस्ति। **एवं भामहमते विवेकज्ञानं, कीर्तिः, प्रीतिः इति काव्यस्य एतानि त्रीणि प्रयोजनानि सन्ति।**

काव्यप्रयोजनविषये मम्मटाचार्यस्य मतं सर्वसम्मतं वर्तते।
सः आचार्यः एवं वदति यत् -

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।

१. यशः - काव्यलेखनेन कीर्तिरूपं प्रयोजनं केवलं कवेः एव भवति।

२. धनलाभः - काव्यरचनया कदाचित् कवीनां कृते राज्ञां पक्षतः अथवा धनिनां पक्षतः धनलाभः भवेत्। अन्यथा सुन्दरतया काव्यप्रवचनेन काव्यपाठेन वा कदाचित् पाठकानामपि धनलाभः स्यात्।

३. व्यवहारज्ञानम् - महापण्डितेन व्यवहारनिपुणेन रचितस्य काव्यस्य अध्ययनेन पाठकानाम् अवश्यं व्यवहारज्ञानलाभः भवति।

४. अमङ्गलनाशः - देवानां महर्षीणां दिव्यपुरुषाणां वा स्तुतिपरकस्य काव्यस्य लेखने कवेः, तथैव तादृशकाव्यस्य पठनेन पाठकस्य च अमङ्गलनाशः भवति।

५. अलौकिकानन्दप्राप्तिः - नवरसभरितस्य सुन्दरभावविभूषितस्य काव्यस्य पठनसमनन्तरमेव सहृदयानां सामाजिकानां मनसि कश्चन अलौकिकः अतिशयविहीनः महानन्दः अवश्यं जायते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६. उपदेशप्राप्तिः - यथा प्रियवादिनी पत्नी यं कमपि विषयं अतीवनिपुणतया बोधयित्वा अस्मान् अङ्गीकारयति। तथैव काव्यमपि रामवत् वर्तनीयं न तु रावणवत् इति सदुपदेशम् अस्मभ्यं सुललितमधुरशब्दैः प्रददाति।

एतादृशस्य अनेकप्रयोजनयुक्तस्य काव्यस्य अध्ययनेन एतानि षड् प्रयोजनानि तु अवश्यं भवन्ति। एतैः सह अन्यानि अपि प्रयोजनानि काव्यस्य सन्त्येव।

अवधेयांशाः -

- काव्यस्य पठने सहृदयानां, काव्यस्य लेखने कवीनां च किमपि महत्तरं प्रयोजनम् अवश्यमेव स्यात्।
- विश्रामः एव काव्यप्रयोजनम् इति भरतः वदति।
- भामहः चतुर्विधपुरुषार्थेषु कलासु च विवेकपूर्णं ज्ञानं, कीर्तिः, प्रीतिः च इति एतत्त्रयं काव्यप्रयोजनम् इति वदति।
- मम्मटाचार्यः कीर्तिः, धनलाभः, व्यवहारज्ञानम्, अमङ्गलनाशः, परमानन्दप्राप्तिः, सुखोपदेशः च इति एतानि षट् (६) काव्यप्रयोजनानि वदति।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. प्रयोजनस्य विषये सूक्तिः का वर्तते?

२. काव्यप्रयोजनविचारः काव्यशास्त्रे किमर्थं क्रियते?

३. भरतमहर्षेः मते काव्यप्रयोजनं किम्?

४. काव्यप्रयोजनेषु व्यवहारज्ञानस्य विवरणं कुरुत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(II) रिक्तस्थानानि पूरयत।

१. विश्रामजननं काले _____ भविष्यति।

२. काव्यपठनेन _____ सहृदयानां भवति।

३. काव्यप्रयोजनविषये _____ मतं सर्वसम्मतं वर्तते।

(III) समीचीनमुत्तरं चिनुत।

१. भामहमते एतत् काव्यप्रयोजनं न भवति। ( )

(क) विवेकज्ञानम् (ख) आलस्यम्

(ग) कीर्तिः (घ) प्रीतिः

२. काव्यलेखनेन कीदृशं प्रयोजनं केवलं कवेः एव भवति? ( )

(क) धनप्राप्तिः (ख) व्यवहारज्ञानम्

(ग) व्युत्पत्तिः (घ) यशः

३. मम्मटमते काव्यप्रयोजनानि कति सन्ति? ( )

(क) ७ (ख) १ (ग) ६ (घ) २०

(IV) परस्परं योग्यं योजयत।

१. प्रयोजनमनुद्दिश्य विश्रामः ( )

२. भामहाचार्यमते पाठकानामेव भवति ( )

३. व्यवहारज्ञानम् त्रीणि काव्यप्रयोजनानि सन्ति। ( )

४. भरतमते मुख्यं काव्यप्रयोजनम् न मन्दोऽपि प्रवर्तते ( )

(V) एतैः पदैः स्वीयवाक्यानि रचयत।

१. विवेकज्ञानम् -

२. विश्रान्तिः -

३. दुखार्तः -

४. धनलाभः -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(VI) लघुनिबन्धं रचयत।

१. भरतमहर्षिमते काव्यप्रयोजनं विवृणुत।

२. भामहाचार्यमते काव्यप्रयोजनं विवृणुत।

(VII) विस्तरेण निबन्धं रचयत।

१. मम्मटमते काव्यप्रयोजनं विवृणुत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सप्तविंशः पाठः

काव्यकारणानि

प्रयोजनानि -

⇨ काव्यस्य रचनार्थं कीदृशानि कारणानि भवितुमर्हन्ति इति सत्यं पाठेन अनेन वयं जानीमः।

⇨ काव्यरचनायै उद्यतस्य कवेः कीदृशी योग्यता अपेक्षिता इत्यपि वयमत्र जानीमः।

पाठारम्भः -

लोके यत्किमपि कार्यं जातं चेत् तस्य कार्यस्य साधनार्थम् अवश्यं यत्किमपि कारणं भवत्येव। यथा वृक्षस्य उद्भवरूपं कार्यं साधयितुं सारवती भूमिः, बीजम्, जलम्, सूर्यरश्मिः, वायुः एतानि सर्वाणि अपि कारणानि अपेक्षितानि एव। तथैव अत्युत्तमकाव्यस्य साधनार्थं काव्यशास्त्रपण्डिताः **प्रतिभा, व्युत्पत्तिः, अभ्यासः** इति एतानि त्रीणि कारणानि अङ्गीकुर्वन्ति। काव्यादर्शे आचार्यः दण्डी एवं वदति यथा -

नैसर्गिकी च प्रतिभा श्रुतं च बहुनिर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः।।

मम्मटाचार्यः अपि अत्यन्तप्रामाणिकं काव्यकारणविषये स्वीयमतम् उपस्थापयति। यथा -

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे।।

१. शक्तिः - शक्तिः नाम प्रतिभा एव, प्रतिभायाः स्वरूपम् एवमस्ति। यथा-

"प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।"

त्रिकालदर्शिनी प्रज्ञा एव यदि नूतननूतनतत्त्वदर्शनसमर्था भवति चेत् सा प्रतिभा इति उच्यते। इयमेव प्रतिभा काव्यस्योद्भवे अत्यन्तप्रधाना भवति। प्रतिभां विना

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

काव्यस्य लेखनमेव न सम्भवति।

२. व्युत्पत्तिः - नैपुण्यमेव व्युत्पत्तिः भवति। लौकिकव्यवहारम्, प्रकृतिस्वरूपम् अतीव तीक्ष्णबुद्ध्या कविः परिशीलयेत्। तथैव वेदवेदाङ्ग-दर्शनादिशास्त्राणि आयुर्वेद-धनुर्वेद-सामुद्रिकादिशास्त्राणि च बहुविधानि गुरोः सन्निधौ स्वकीयपरिश्रमेण वा सम्यक् परिशीलयेत्। एवं पूर्वकविरचितानि काव्यानि अपि अतीवश्रद्धया कविः परिशीलयेत्। इत्थं लोकस्य शास्त्राणां काव्यानां च सूक्ष्मपरिशीलनेन एव कविः काव्यरचनायां नैपुण्यं प्राप्नोति।

३. अभ्यासः - काव्यकरणे पुनः पुनः प्रवर्तनमेव अभ्यासः भवति। प्रतिभावान् लोकशास्त्र-काव्यादिनिपुणः काव्यकरणेच्छुकः कविः तदीयसमकालीनकवीनां समीपं गत्वा तेषां मार्गदर्शने काव्यकरणस्य शिक्षणं प्राप्नुयात्। एवं काव्यकरणे बहुवारप्रयत्नेन एव काव्यरचनायां कवेः पाण्डित्यं वर्धते।

अतः काव्यस्य उद्भवार्थं कवेः प्रतिभा-व्युत्पत्तिः-अभ्यासः इति त्रीणि कारणानि अवश्यमपेक्षितानीति पण्डितानाम् आशयः।

> आचार्यः पण्डितराजजगन्नाथः तु काव्यकारणविषये किञ्चित् विशिष्टं मतं प्रकटयति। यथा काव्यस्य मुख्यं कारणं प्रतिभा एव। परन्तु व्युत्पत्तिः अभ्यासः एतद्द्वयं काव्यस्य कारणं न भवति। अपि तु प्रतिभायाः उद्भवे कारणं भवति इति।

अवधेयांशाः -

- अत्युत्तमकाव्यस्य लेखनार्थं कवेः प्रतिभा, व्युत्पत्तिः अभ्यासः इति एतानि त्रीणि कारणानि भवेयुः एव।
- काव्यस्य कारणेषु अत्यन्तं प्रमुखं कारणं प्रतिभा भवति। इयं प्रतिभा एव शक्तिः।
- लोकस्य शास्त्राणां काव्यानां च गभीरपरिशीलनेन जायमानं नैपुण्यम् एव व्युत्पत्तिः।
- काव्यरचनायां पुनः पुनः प्रवर्तनमेव अभ्यासः भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

➤ केवला प्रतिभा एव काव्यस्य कारणम् इति, तस्याः प्रतिभायाः कारणं व्युत्पत्त्यभ्यासौ इति जगन्नाथस्य विशिष्टं मतम्।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. कार्यस्य साधनार्थं किम् अपेक्षितम्?

२. वृक्षस्य उद्भवार्थं कानि कारणानि अपेक्षितानि?

३. आचार्यस्य दण्डिनः काव्यकारणश्लोकं लिखत।

४. जगन्नाथाचार्यमते प्रतिभायाः कारणं किमस्ति?

(II) समीचीनमुत्तरं चिनुत।

१. अत्युत्तमकाव्यस्य साधनार्थं कति कारणानि अपेक्षितानि? ( )
(क) एकम् (ख) त्रीणि (ग) नव (घ) पञ्च

२. कां विना काव्यस्य लेखनमेव न सम्भवति? ( )
(क) व्युत्पत्तिम् (ख) आसक्तिम् (ग) श्रद्धाम् (घ) प्रतिभाम्

३. काव्यज्ञशिक्षया कः जायते? ( )
(क) अभ्यासः (ख) विकासः (ग) उल्लासः (घ) विनोदः

(III) परस्परं योग्यं योजयत।

१. नैसर्गिकी च प्रतिभा	कारणानि सन्ति।	( )
२. व्युत्पत्तिः	पण्डितराजजगन्नाथमते।	( )
३. काव्यकरणे पुनः पुनः प्रवर्तनम्	श्रुतञ्च बहुनिर्मलम्।	( )
४. काव्यस्य त्रीणि	नैपुण्यम्।	( )
५. प्रतिभा एव मुख्यं कारणम्	अभ्यासः।	( )

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(IV) एतैः पदैः स्वीयवाक्यानि रचयत।

१. सम्पत्तिः -

२. स्वभावः -

३. लोकः -

४. अभ्यासः -

(V) विस्तरेण निबन्धं रचयत।

१. काव्यकारणानि सम्यक् विवृणुत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अष्टाविंशः पाठः

काव्यलक्षणम्

प्रयोजनानि -

⇨ सहृदयानां मनोमोदकस्य काव्यस्य स्वरूपं सुस्पष्टतया अत्र वयं ज्ञातुं शक्नुमः।

⇨ काव्यस्य स्वरूपज्ञानेन तदीयमहत्त्वमपि सम्यक् निर्धारयितुं शक्नुमः।

पाठारम्भः -

यस्य कस्यापि पदार्थस्य यत् स्वरूपं भवति, तदेव तस्य पदार्थस्य लक्षणमिति उच्यते। प्रपञ्चे सर्वेषामपि पदार्थानाम् एकं निर्दिष्टं लक्षणं (स्वरूपं) भवति। यथा - **'गन्धवती पृथिवी'** इति पृथिव्याः अस्मिन् वाक्ये लक्षणमुक्तम्। भूमेः मृत्तिकाकणेषु सर्वत्र अपि कश्चन विशिष्टः गन्धः भवति। अतः तादृशगन्धविशिष्टा एव पृथिवी इति पृथिव्याः लक्षणम्।

एवमेव काव्यस्यापि किञ्चित् निर्दिष्टं सुपरिष्कृतं लक्षणं भवेदेव। अतः काव्यस्य लक्षणनिर्धारणार्थं काव्यशास्त्रस्य बहवः अपि आचार्याः अतीव सूक्ष्मविचारेण प्रयत्नं कृतवन्तः। तेषु कतिचिद् लक्षणानि वयमत्र पश्यामः।

काव्यलक्षणविषये केचन शब्दमूलक-काव्यलक्षणवादिनः इति केचन तु शब्दार्थमूलक-काव्यलक्षणवादिनः इति च द्विप्रकारकाः आचार्याः दृश्यन्ते।

शब्दमूलककाव्यलक्षणवादी आचार्यः विश्वनाथः निजसाहित्यदर्पणग्रन्थे काव्यस्य लक्षणम् एवं वदति यत् -

''वाक्यं रसात्मकं काव्यम्'' इति।

रसात्मकं पदसमुदाययुक्तं वाक्यमेव काव्यं भवतीति अस्य वाक्यस्य तात्पर्यम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनन्तरम् आचार्यः दण्डी स्वकीयकाव्यादर्शग्रन्थे काव्यलक्षणम् एवं वदति। यथा-

"शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावलिः।" इति।

कवेः अभीष्टाः अर्था ये भवन्ति, तादृशार्थसहितपदसमुदायः एव काव्यं भवितुम् अर्हति इति अस्य वाक्यस्य तात्पर्यम्।

एवमेव पण्डितराजः जगन्नाथः स्वीयरसगङ्गाधरनामके ग्रन्थे काव्यलक्षणम् एवं वदति। यथा -

"रमणीयार्थप्रतिपादकः शब्दः काव्यम्।" इति।

सुन्दरेण परमानन्दजनकेन अर्थेन युक्तः शब्दः एव काव्यं भवति इति अस्य वाक्यस्य तात्पर्यम्। एवं एते त्रयः अपि आचार्याः शब्दमूलककाव्यलक्षणवादिनः सन्ति।

शब्दार्थमूलककाव्यलक्षणवादी आचार्यः भामहः स्वीयकाव्यालङ्कारग्रन्थे काव्यलक्षणम् एवं वदति। यथा -

"शब्दार्थौ सहितौ काव्यम्।" इति।

परस्परं संयुक्तौ शब्दार्थौ एव काव्यं भवितुमर्हतीति अस्य वाक्यस्य अभिप्रायः।

एवमेव आचार्यः मम्मटः स्वीयकाव्यप्रकाशग्रन्थे काव्यलक्षणमेवम् उक्तवान्। यथा-

"तददौषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।"

दोषरहितौ गुणसहितौ अलङ्कारयुक्तौ एव शब्दार्थौ काव्यं भवितुम् अर्हति इति अस्य वाक्यस्य तात्पर्यम्। एतौ द्वौ अपि आचार्यौ शब्दार्थमूलक-काव्यलक्षणवादिनौ स्तः।

एवं काव्यलक्षणविषये इतोऽपि बहवः आचार्याः बहूनि लक्षणानि कथितवन्तः। तानि वयम् अग्रे ज्ञास्यामः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अवधेयांशाः -

- यस्य कस्यापि पदार्थस्य यत् स्वरूपं भवति, तदेव तस्य पदार्थस्य लक्षणमिति उच्यते।
- एवमेव काव्यस्यापि किञ्चित् निर्दिष्टं सुपरिष्कृतं लक्षणं स्यात्।
- काव्यलक्षणविषये द्विविधाः आचार्याः दृश्यन्ते। ते यथा - शब्दमूलककाव्य-लक्षणवादिनः, शब्दार्थ-मूलककाव्यलक्षणवादिनः च इति।
- तत्र शब्दमूलककाव्यलक्षणवादिषु आचार्येषु विश्वनाथः, दण्डी, जगन्नाथः च प्रमुखाः सन्ति।
- तत्र शब्दार्थमूलककाव्यलक्षणवादिषु आचार्येषु भामहः मम्मटः च प्रमुखौ स्तः।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. काव्यलक्षणविषये विद्यमानं पक्षद्वयं किम्?

२. 'वाक्यं रसात्मकं काव्यम्' इति वाक्यस्य तात्पर्यं किम्?

३. 'शब्दार्थौ सहितौ काव्यम्' इति वाक्यस्य अभिप्रायः कः?

४. मम्मटमते काव्यलक्षणं किम्?

(II) समीचीनमुत्तरं चिनुत।

१. शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावलिः इति कस्य काव्यलक्षणम्? ( )

(क) मम्मटस्य (ख) दण्डिनः

(ग) विश्वनाथस्य (घ) विद्यानाथस्य

२. जगन्नाथमते काव्यलक्षणं किम्? ( )

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(क) रमणीयार्थप्रतिपादकः शब्दः (ख) सुकुमाररसपोषकः अर्थः

(ग) रमणीयभावप्रतिपादकः शब्दः (घ) कमनीयगुणद्योतकः बन्धः

(III) परस्परं योग्यं योजयत।

१. शब्दार्थौ सहितौ काव्यम् तददोषौ शब्दार्थौ - सगुणावनलङ्कृती पुनः क्वापि। ( )

२. जगन्नाथमते काव्यलक्षणम् विश्वनाथमते काव्यलक्षणम् ( )

३. वाक्यं रसात्मकं काव्यम् भामहमते काव्यलक्षणम् ( )

४. मम्मटमते काव्यलक्षणम् रमणीयार्थप्रतिपादकः शब्दः काव्यम् ( )

(IV) एतैः पदैः स्वीयवाक्यानि रचयत।

१. वाक्यम् -

२. शरीरम् -

३. शब्दः -

(V) लघुनिबन्धं रचयत।

१. विश्वनातस्य काव्यलक्षणं विवृणुत।

२. मम्मटाचार्यस्य काव्यलक्षणं विवृणुत।

(VI) विस्तरेण निबन्धं रचयत।

१. शब्दमूलककाव्यलक्षणवादिनाम् आचार्याणां काव्यलक्षणानि विवृणुत।

२. शब्दार्थमूलककाव्यलक्षणवादिनाम् आचार्याणां काव्यलक्षणानि विवृणुत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकोनत्रिंशः पाठः

काव्यभेदाः

प्रयोजनानि -

⇨ काव्येषु कति वा भेदाः सन्तीति संक्षेपेण अस्मिन् पाठे द्रष्टुम् अर्हामः।

⇨ विभिन्नकाव्यानां स्वरूपज्ञानार्थं तेषाम् अध्ययनं कर्तुमपि अस्मात् पाठात् अस्मभ्यं प्रेरणा लभ्यते।

पाठारम्भः -

काव्येषु विविधविचारपक्षान् आधारीकृत्य बहुविधाः भेदाः काव्यशास्त्रे दृश्यन्ते। अत्र तु वयम् अतीव संक्षेपेण काव्यभेदान् ज्ञातुं प्रयत्नं कुर्मः। **मूलतः दृश्यं श्रव्यं च इति द्विविधं काव्यमस्ति।** तत्र दृश्यकाव्यस्य दशभेदाः सन्ति। यथा -

दृश्यकाव्यस्य दश भेदाः

- १. नाटकम्
- २. प्रकरणम्
- ३.भाणः
- ४. प्रहसनम्
- ५. डिमः
- ६. व्यायोगः
- ७. समवकारः
- ८. वीथी
- ९.अङ्कः
- १०.ईहामृगः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रव्यकाव्यस्य पद्यकाव्यं, गद्यकाव्यं, मिश्रकाव्यम् इति त्रयः भेदाः सन्ति।

१. **पद्यकाव्यम्** -	महाकाव्यम्, खण्डकाव्यम्, आख्यायिका, उदाहरणम्, चक्रवालम्, मञ्जरी, तारावली, वाकोवाक्यम्, दण्डकम् इति **पद्यकाव्यस्य नवभेदाः** सन्ति।
२. **गद्यकाव्यम्** -	वृत्तगन्धोज्झितम्, वृत्तगन्धि, उत्कलिकाप्रायम्, चूर्णकमिति **गद्यकाव्यस्य चत्वारः भेदाः** वर्तन्ते।
३. **मिश्रकाव्यम्** -	गद्यपद्यसहितं काव्यमेव मिश्रकाव्यं भवति। चम्पूकाव्यं मिश्रकाव्येषु अतीव प्रसिद्धम्। अस्य मिश्रकाव्यस्य करम्भकं, बिरुदं, घोषणा, आज्ञापत्रमिति आहत्य **पञ्च भेदाः** दृश्यन्ते।

काव्यस्य अर्थचमत्कारदृष्ट्या **ध्वनिकाव्यम्, गुणीभूतव्यङ्ग्यकाव्यम्, चित्रकाव्यमिति** त्रयः भेदाः सन्ति।

पाठकानां स्वभावदृष्ट्या **सहृदयास्वाद्यकाव्यम्, कोविदास्वाद्यकाव्यम्, लोकास्वाद्यकाव्यमिति** काव्यं त्रिविधं दृश्यते।

एवं प्रकारेण विभिन्नतत्त्वानां दृष्ट्या काव्यस्य इतोऽपि बहवः भेदाः काव्यशास्त्रे चर्चिताः सन्ति। तान् वयम् अग्रे ज्ञास्यामः।

अवधेयांशाः -

- मूलतः काव्यं दृश्यं श्रव्यं च इति द्विविधम्।
- तत्र दृश्यकाव्यं दशविधम् अस्ति।
- श्रव्यकाव्यस्य पद्यकाव्यं, गद्यकाव्यं, मिश्रकाव्यम् इति त्रयः भेदाः सन्ति।
- तत्र पद्यकाव्यं नवविधम् अस्ति।
- गद्यकाव्यं चतुर्विधम् अस्ति।
- मिश्रकाव्यं पञ्चविधम् अस्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- काव्यस्य अर्थचमत्कारदृष्ट्या ध्वनिकाव्यम्, गुणीभूतव्यङ्ग्यकाव्यम्, चित्रकाव्यमिति त्रयः भेदाः सन्ति।
- पाठकानां स्वभावदृष्ट्या सहृदयास्वाद्यकाव्यम्, कोविदास्वाद्यकाव्यम्, लोकास्वाद्य-काव्यमिति काव्यं त्रिविधं दृश्यते।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. मूलतः काव्यं कतिविधम् अस्ति?

२. दृश्यकाव्यस्य कति भेदाः सन्ति?

३. गद्यकाव्यस्य कति भेदाः सन्ति?

४. पाठकानां स्वभावदृष्ट्या काव्यं कतिविधम् अस्ति?

(II) समीचीनमुत्तरं चिनुत।

१. श्रव्यकाव्यस्य भेदेषु एतत् नास्ति। ( )

(क) पद्यकाव्यम् (ख) गद्यकाव्यम् (ग) मिश्रकाव्यम् (घ) विषमकाव्यम्

२. पद्यकाव्यस्य कति भेदाः सन्ति? ( )

(क) सप्त (ख) नव (ग) एकादश (घ) पञ्चदश

३. अर्थचमत्कारदृष्ट्या काव्यस्य भेदेषु एतत् भवति। ( )

(क) महाकाव्यम् (ख) खण्डकाव्यम्

(ग) ध्वनिकाव्यम् (घ) स्तोत्रकाव्यम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(III) परस्परं योग्यं योजयत।

१. दृश्यकाव्येषु आदिमम्	पञ्च	( )
२. पाठकानां स्वभावदृष्ट्या काव्यम्	नाटकम्	( )
३. मिश्रकाव्यस्य भेदाः	त्रिविधम्	( )

(IV) एतैः पदैः स्वीयवाक्यानि रचयत।

१. नाटकम् -

२. पद्यकाव्यम् -

३. गद्यकाव्यम् -

(V) लघुनिबन्धं रचयत।

१. दृश्यकाव्यस्य भेदान् विवेचयत।

२. श्रव्यकाव्यस्य भेदान् विवेचयत।

३. अर्थचमत्कारदृष्ट्या पाठकानां स्वभावदृष्ट्या च काव्यभेदान् विवेचयत।

(VI) विस्तरेण निबन्धं रचयत।

१. काव्यस्य भेदान् सम्यक् विवेचयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्रिंशः पाठः

रसाः

प्रयोजनानि -

⇨ काव्यात् परमानन्दस्य अनुभवः रसस्य कारणादेव जायते। अतः तादृशरसस्य सामान्यपरिचयं वयम् इतः प्राप्नुमः।

⇨ काव्यं रसात्मकम् इति कारणादेव तस्याध्ययने अस्माकं मनः रमते।

पाठारम्भः -

अलङ्कारशास्त्रे बहवः प्रमेयविषयाः सन्ति। परन्तु तेषु सर्वेषु रसः सर्वोत्कृष्टः। अस्मिन् शास्त्रे रसविषये यावान् सूक्ष्मः विशालश्च विचारः वर्तते, तावान् विचारः अन्यस्य कस्यापि विषये नास्ति। काव्यशास्त्रे रसशब्दः अलौकिकानन्दकारकः भवति। लौकिकः आनन्दः नश्वरः अल्पसुखप्रदः। परन्तु काव्याध्ययनेन जायमानः आनन्दस्तु लोकोत्तरः अनन्तसुखप्रदः। अतः तादृशस्य काव्यरसस्य स्वरूपं वर्णयन् साहित्यदर्पणग्रन्थे विश्वनाथाचार्यः इत्थं कथयति। यथा -

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वदसहोदरः ॥

लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥

सत्त्वगुणस्य आधिक्येन मनसि जायमानम्, अखण्डनिर्मलस्वरूपं, लौकिकानन्देभ्यः सर्वेभ्यः अपि उत्कृष्टं, किञ्चिन्न्यूनतया ब्रह्मानन्दसदृशम्, अलौकिकचमत्कारात्मकम् एतं काव्यरसानन्दं केचन अल्पाः सहृदयाः एव प्राप्तुं शक्नुवन्ति। सर्वे अपि एतम् आनन्दं प्राप्तुं न शक्नुवन्ति। अतः एव काव्यानन्दं ये प्राप्नुवन्ति ते एव सहृदयाः भवन्ति। अन्ये न भवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अलौकिकानन्दरूपः अयमेव रसः नवविधः वर्तते। अतः एव 'नवरसाः' इति काव्यशास्त्रे बहुधा चर्चिताः सन्ति। ते यथा -

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः ।।

शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः, शान्तः इति एते एव नवरसाः। एतेषां रसानाम् आस्वादनात्पूर्वम् आदौ स्थायिभावानां ज्ञानं सहृदयस्य मनसि जायते। ते स्थायिभावाः अपि नव सन्ति। यथा-

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः ।।

पूर्वप्रस्तुतश्लोके रसाः यस्मिन् क्रमे सन्ति, तेनैव क्रमेण स्थायिभावानाम् अन्वयो भवति। यथा-

रसः	-	स्थायिभावः
१.शृङ्गारः	-	रतिः
२.हास्यः	-	हासः
३.करुणः	-	शोकः
४.रौद्रः	-	क्रोधः
५.वीरः	-	उत्साहः
६.भयानकः	-	भयम्
७.बीभत्सः	-	जुगुप्सा
८.अद्भुतः	-	विस्मयः
९.शान्तः	-	शमः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अवधेयांशाः -

- काव्यशास्त्रे रसविषये यावान् सूक्ष्मः विशालश्च विचारः वर्तते, तावान् विचारः अन्यस्य कस्यापि विषये नास्ति।
- काव्यशास्त्रे रसः अलोकिकानन्दकारकः भवति।
- अलौकिकचमत्कारात्मकम् एतं काव्यरसानन्दं केचन अल्पाः सहृदयाः एव प्राप्तुं शक्नुवन्ति।
- एते रसाः काव्यशस्त्रे नव वर्तन्ते। अतः एव नवरसाः इति वादः अतीव प्रसिद्धः।
- एतेषां रसानां नव स्थायिभावा अपि सन्ति।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. अलङ्कारशास्त्रे रसस्य प्राधान्यं किमर्थम् अस्ति?

२. रसाः कतिविधाः? ते च के?

३. स्थायिभावाः कति? ते च के?

(II) समीचीनमुत्तरं चिनुत।

१. काव्यशास्त्रे कस्य विषये सूक्ष्मः विशालश्च विचारः कृतः? ( )

(क) भावस्य (ख) अलङ्कारस्य (ग) रसस्य (घ) गुणस्य

२. हास्यरसस्य स्थायिभावः कः? ( )

(क) हासः (ख) शोकः (ग) भयम् (घ) विस्मयः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. क्रोधः कस्य रसस्य स्थायिभावः? ( )

(क) करुणस्य (ख) रौद्रस्य

(ग) वीरस्य (घ) शान्तस्य

(III) परस्परं योग्यं योजयत।

१. काव्याध्ययनेन जायमानः आनन्दः नवविधाः ( )

२. काव्यानन्दं प्राप्तुं योग्याः शान्तः ( )

३. भयानकः लोकोत्तरः अनन्तसुखप्रदः ( )

४. शमः भयम् ( )

५. रसाः सहृदयाः ( )

(IV) एतैः पदैः स्वीयवाक्यानि रचयत।

१. प्रकाशः -

२. प्राणः -

३. आस्वादः -

४. भयम् -

५. शान्तः -

(V) लघुनिबन्धं रचयत।

१. विश्वनाथमते रसस्य स्वरूपं वर्णयत।

२. रसानां स्थायिभावानां च विवरणं कुरुत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकत्रिंशः पाठः

अलङ्काराः

प्रयोजनानि -

⇨ काव्यस्य सौन्दर्यजनकः अलङ्कारः भवति। तस्य अलङ्कारस्य परिचयम् अनेन पाठेन प्राप्तुं शक्नुमः।

⇨ अलङ्कारस्य कारणादेव काव्यस्य सौन्दर्यम् इत्यतः, तस्य पठने उत्साहश्च भवति इति यथार्थमपि इतः जानीमः।

पाठारम्भः -

अलङ्कारशास्त्रे **''शब्दार्थयुगलं तावत्काव्यशरीरम्''** इति आचार्याणां सर्वेषामपि विचारः। शब्दार्थौ द्वौ अपि मिलित्वा काव्यशरीरं भवति। तथा शब्दार्थयोः सौन्दर्येण एव काव्यं सुन्दरं मनोहरञ्च भवति। **'सौन्दर्यमलङ्कारः'** इति वामनाचार्यस्य कथनेन शब्दार्थयोः सौन्दर्यमेव अलङ्कारः इति निश्चयः जायते।

काव्ये अलङ्कारः द्विविधः वर्तते। यथा - **१. शब्दालङ्कारः, २. अर्थालङ्कारः च** इति।

सुन्दरसुरुचिरशब्दप्रयोगेण जायमानः अलङ्कारः **शब्दालङ्कारः**।
सुमधुरललितार्थप्रयोगेण जायमानः अलङ्कारः **अर्थालङ्कारः**।

शब्दालङ्कारस्य उदाहरणं यथा -

मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे ।
गौत्रारिगोत्रजत्राय गोत्रात्रे ते नमो नमः ॥

अस्मिन् श्लोके 'त्र' इति वर्णसमुदायस्य बहुवारं सुन्दरशैल्या प्रयोगेण शब्दसौन्दर्यम् अनुभूयते इत्यतः अत्र अनुप्रासः इति शब्दालङ्कारः वर्तते। शब्दालङ्काराः बहुविधाः सन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तान् वयम् अग्रे ज्ञास्यामः।

अर्थालङ्कारस्य उदाहरणं यथा -

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।

अत्र पार्वतीपरमेश्वरौ शब्दार्थौ इव परस्परं सम्मिलितौ इति उक्तमस्ति। अस्य अयमर्थः यत्, यस्य कस्यापि शब्दस्य श्रवणेन अवश्यम् अर्थस्य ज्ञानं भवति एव। शब्दः सर्वथा अर्थसहितः, अर्थः अपि सर्वथा शब्दघटितः एव भवति। एतयोः कदापि विच्छेदः न जायते। तथैव पार्वतीपरमेश्वरयोः अपि कदापि विच्छेदः न जायते। तौ सदा परस्परं सम्मिलितौ एव भवतः इति सुन्दरेण उपमानेन अत्र अर्थस्य शोभा जाता। एवं सुमधुरार्थज्ञानम् अस्मिन् श्लोके वर्तते इत्यतः अत्र उपमालङ्कारः इति अर्थालङ्कारः वर्तते। अर्थालङ्काराः अपि बहुविधाः सन्ति। तान् वयमग्रे ज्ञास्यामः।

अवधेयांशाः -

- काव्यशास्त्रे शब्दार्थौ द्वौ मिलित्वा काव्यशरीरं भवति।
- शब्दार्थयोः सौन्दर्येण एव काव्यं सुन्दरं भवति।
- शब्दार्थयोः सौन्दर्यमेव अलङ्कारः भवति।
- अलङ्कारः द्विविधः। शब्दालङ्कारः अर्थालङ्कारः च इति।
- सुन्दरसुरुचिरशब्दप्रयोगेण जायमानः अलङ्कारः शब्दालङ्कारः भवति।
- सुमधुरललितार्थप्रयोगेण जायमानः अलङ्कारः अर्थालङ्कारः भवति।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. 'सौन्दयम् अलङ्कारः' इति वाक्यस्य कः अभिप्रायः?

२. कीदृशशब्दप्रयोगेण जायमानः अलङ्कारः शब्दालङ्कारः?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. कीदृशस्य अर्थस्य प्रयोगेण जायमानः अलङ्कारः अर्थालङ्कारः?

४. 'मित्रात्रिपुत्रनेत्राय' इत्यस्मिन् श्लोके कः अलङ्कारः वर्तते?

५. 'वागर्थाविव सम्पृक्तौ' इत्यस्मिन् श्लोके कः अलङ्कारः वर्तते?

(II) समीचीनमुत्तरं चिनुत।

१. शब्दार्थयुगलं किं भवति? ( )

(क) काव्यशरीरम् (ख) काव्यात्मा

(ग) काव्यभावः (घ) कविभावः

२. शब्दार्थयोः सौन्दर्यमेव कः भवति? ( )

(क) गुणः (ख) रसः (ग) अलङ्कारः (घ) भावः

३. काव्ये अलङ्कारः कतिविधः? ( )

(क) चतुर्विधः (ख) त्रिविधः (ग) पञ्चविधः (घ) द्विविधः

(III) एतैः पदैः स्वीयवाक्यानि रचयत।

१. पुत्रः -

२. गोपालः -

३. मातापितरौ -

४. सुन्दरः -

(IV) लघुनिबन्धं रचयत।

१. शब्दालङ्कारस्य स्वरूपं सोदाहरणं विवेचयत।

२. अर्थालङ्कारस्य स्वरूपं सोदाहरणं निरूपयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वात्रिंशः पाठः

रीतयः

प्रयोजनानि -

⇨ काव्यं ललितपदयुक्तं वा परुषपदयुक्तं वा इति ज्ञानं रीतेः कारणादेव जायते। अतः तादृशरीतेः परिचयम् अस्मात् पाठात् प्राप्नुमः।

⇨ रीतेः कारणादेव काव्यं गुणवत्तरं भवति इति वास्तवं वयम् इतः जानीमः।

पाठारम्भः -

वामनाचार्यः **काव्यालङ्कारसूत्र**नामकं ग्रन्थं रचितवान्। अस्मिन् ग्रन्थे अयं रीतिसम्प्रदायस्य प्रतिपादनं कृतवान्।**'रीतिरात्मा काव्यस्य'** इति रीतिरेव काव्यस्य आत्मा भवतीति तस्य आशयः। अस्मिन्नेव ग्रन्थे सः रीतेः स्वरूपं सम्यक् दर्शितवान्। रीतेः लक्षणं सः एवमुक्तवान्। यथा -

'विशिष्टा पदरचना रीतिः।'

विशेषशालिनी पदानां रचना एव रीतिः इति तात्पर्यम्।

अत्र विशेषपदस्य अर्थं निरूपयति। यथा-

'विशेषो गुणात्मा।'

माधुर्यादिगुणरूपः एव विशेषः। एवं माधुर्यादिगुणयुक्ता पदानां रचना एव रीतिरिति रीतेः एतत् समग्रं लक्षणमस्ति।

वामनाचार्यः काव्यस्य दश शब्दगुणान् दश च अर्थगुणान् अङ्गीकरोति। ते यथा -

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्लेषः, प्रसादः, समता, माधुर्यं, सौकुमार्यम्, अर्थव्यक्तिः, औदार्यम्, ओजः, कान्तिः, समाधिः इति एते एव शब्दगुणाः अर्थगुणाः च सन्ति।

रीतिः त्रिविधा भवति। यथा -

'सा त्रेधा। वैदर्भी गौडीया पाञ्चाली चेति'।

तत्र वैदर्भीरीतेः लक्षणम् एवं वदति। यथा -

'समग्रगुणा वैदर्भी।'

सकलगुणैः उपेता रीतिः वैदर्भी भवति।

गौडीयारीतेः लक्षणम्। यथा -

'ओजःकान्तिमती गौडीया।'

ओजः कान्तिः इति गुणद्वययुक्ता रीतिः गौडीया भवति।

तथैव पाञ्चालीरीतेः लक्षणम्। यथा -

'माधुर्यसौकुमार्योपपन्ना पाञ्चाली।'

माधुर्यं सौकुमार्यमिति गुणद्वययुक्ता रीतिः पाञ्चाली भवति।

रीतीनाम् उदाहरणानि गुणानां च लक्षणानि वयम् अग्रे ज्ञास्यामः।

अवधेयांशाः -

- वामनाचार्यः काव्यशास्त्रे प्रथमः रीतिसम्प्रदायस्य प्रवर्तकः अस्ति।
- रीतिः एव काव्यस्य आत्मा भवति इति तस्य सिद्धान्तः।
- इयं रीतिः त्रिविधा। यथा - वैदीर्भी गौडीया पाञ्चाली च।
- वामनाचार्यः दश शब्दगुणान् दश अर्थगुणान् च स्वीकरोति।
- सकलगुणैः उपेता रीतिः वैदर्भी भवति।
- ओजः कान्तिः इति गुणद्वययुक्ता रीतिः गौडीया भवति।
- माधुर्यं सौकुमार्यमिति गुणद्वययुक्ता रीतिः पाञ्चाली भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. रीतिसम्प्रदायस्य प्रतिपादनं कस्मिन् ग्रन्थे वर्तते?

२. 'रीतिरात्मा काव्यस्य' इत्यस्य वाक्यस्य कः अभिप्रायः?

३. रीतेः लक्षणं किम्?

४. वामनाचार्यस्य मते काव्यस्य शब्दगुणाः के?

५. वामनाचार्यस्य मते काव्यस्य अर्थगुणाः के?

(II) समीचीनमुत्तरं चिनुत।

१. वामनाचार्यः कस्य सम्प्रदायस्य प्रवर्तकः? ( )

(क) ध्वनिसम्प्रदायस्य (ख) रससम्प्रदायस्य

(ग) रीतिसम्प्रदायस्य (घ) वक्रोक्तिसम्प्रदायस्य

२. वामनमते रीतयः कति सन्ति? ( )

(क) द्विविधाः (ख) त्रिविधाः (ग) षड्विधाः (घ) नवविधाः

३. वामनसम्मतासु रीतिषु एषा नास्ति। ( )

(क) वैदर्भी (ख) पाञ्चाली (ग) गौडीया (घ) शूरसेनी

(III) परस्परं योग्यं योजयत।

१. वामनाचार्यस्य ग्रन्थः	त्रिविधाः	( )
२. रीतयः	ओजःकान्तिमती	( )
३. समग्रगुणा	पाञ्चाली	( )
४. गौडीया	वैदर्भी	( )
५. माधुर्यसौकुमार्योपपन्ना	काव्यालङ्कारसूत्रम्	( )

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(IV) एतैः पदैः स्वीयवाक्यानि रचयत।

१. उदारः -

२. कान्तिः -

३. समता -

४. प्रसादः -

(V) लघुनिबन्धं रचयत।

१. रीतेः लक्षणं प्रतिपादयत।

२. दश शब्दगुणान् दश च अर्थगुणान् विवेचयत।

(VI) विस्तरेण निबन्धं रचयत।

१. वामनसम्मतानां त्रिविधानां रीतीनां स्वरूपं विवेचयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्रयस्त्रिंशः पाठः

वृत्तयः

प्रयोजनानि -

⇨ काव्ये रसास्वादस्य उपकारिका वृत्तिः एव। तादृशवृत्तेः परिचयम् अत्र वयं प्राप्नुमः।

⇨ वृत्तेः स्वरूपमपि वयमत्र सुस्पष्टं जानीमः।

पाठारम्भः -

रसानां भावानां च अनुकूलः शब्दार्थयोः व्यवहारः एव वृत्तिः भवति।

वृत्तेः लक्षणम् आनन्दवर्धनाचार्यः स्वीयध्वन्यालोकग्रन्थे एवम् उक्तवान् यत् -

रसाद्यनुगुणत्वेन व्यवहारोऽर्थशब्दयोः ।
औचित्यवान् यस्ता एता वृत्तयो विविधाः स्मृताः ।।

एताः वृत्तयः अलङ्कारशास्त्रे चतस्रः सन्ति इति आचार्याः वदन्ति। ताः यथा - **कैशिकी, आरभटी, भरती, सात्त्वती** च इति। एतासां लक्षणं प्रतापरुद्रीयग्रन्थे आचार्यः विद्यानाथः एवं वदति। यथा-

अत्यर्थसुकुमारार्थसन्दर्भा कैशिकी मता ।
अत्युद्भटार्थसन्दर्भा वृत्तिरारभटी स्मृता ।।

ईशन्मृद्वर्थसन्दर्भा भारती वृत्तिरिष्यते ।
ईशत्प्रौढार्थसन्दर्भा सात्त्वती वृत्तिरिष्यते ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कैशिकीवृत्तौ शब्दार्थौ द्वौ अपि अतीव सुकुमारौ भवतः।
अतः इयं वृत्तिः **सुकुमारपदघटिता** भवति।

आरभटीवृत्तौ शब्दार्थौ द्वौ अपि अतीव परुषौ भवतः।
अतः इयं वृत्तिः **उद्धतपदघटिता** भवति।

भारतीवृत्तौ शब्दार्थौ द्वौ अपि किञ्चित्सुकुमारौ भवतः।
अतः इयं वृत्तिः **किञ्चित्सुकुमारपदघटिता** भवति।

सात्त्वतीवृत्तौ शब्दार्थौ द्वौ अपि किञ्चित्परुषौ भवतः।
अतः इयं वृत्तिः **किञ्चित्परुषपदघटिता** भवति।

एवम् एतासां वृत्तीनां स्वरूपम् अवगतमेव। सम्प्रति का वृत्तिः केषां रसानाम् अनुकूला इति प्रश्नस्य विद्यानाथाचार्यः समाधानं वदति। यथा -

अत्यन्तसुकुमारौ द्वौ शृङ्गारकरुणौ मतौ ।
अत्युद्धतरसौ रौद्रबीभत्सौ परिकीर्तितौ ।।

हास्यशान्ताद्भुताः किञ्चित्सुकुमाराः प्रकीर्तिताः ।
ईषत्प्रौढौ समाख्यातौ रसौ वीरभयानकौ ।।

अतिसुकुमारी **कैशिकी वृत्तिः** अतिसुकुमारयोः शृङ्गारकरुणरसयोः अनुकूला भवति।
अतिपरुषा **आरभटी वृत्तिः** अतिपरुषयोः रौद्रबीभत्सरसयोः अनुकूला भवति।
किञ्चित्सुकुमारी **भारती वृत्तिः** किञ्चित्सुकुमाराणां हास्यशान्ताद्भुतरसानाम् अनुकूला भवति।
किञ्चित्परुषा **सात्त्वती वृत्तिः** किञ्चित्परुषयोः वीरभयानकरसयोः अनुकूला भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एवं रसानाम् अनुकूलवृत्तिसहयोगेन एव काव्यानन्दः अतीव मनोहरः भवति। एतासां रीतीनाम् उदाहरणानि अग्रे वयं ज्ञास्यामः।

अवधेयांशाः -

- रसानां भावानां च अनुकूलः शब्दार्थयोः व्यवहारः एव वृत्तिः भवति।
- एताः वृत्तयः अलङ्कारशास्त्रे चतस्रः सन्ति।
- कैशिकी, आरभटी, भरती, सात्त्वती च इति तासां नामानि।

अभ्यासाः

(I) एकेन वाक्येन उत्तरं लिखत।

१. वृत्तेः लक्षणं किम्?

२. वृत्तयः कतिविधाः? ताः काः?

३. भारतीवृत्तिः कीदृशी भवति?

४. वीरभयानकरसयोः अनुकूला वृत्तिः का?

(II) समीचीनमुत्तरं चिनुत।

१. रसानां भावानां च अनुकूलः शब्दार्थयोः व्यवहारः का भवति? ( )

(क) रीतिः (ख) वृत्तिः (ग) धृतिः (घ) अनुमितिः

२. सुकुमारपदघटिता वृत्तिः का? ( )

(क) सात्त्वती (ख) कैशिकी (ग) भारती (घ) पाञ्चाली

३. रौद्रबीभत्सरसयोः अनुकूला वृत्तिः का? ( )

(क) वैदर्भी (ख) गौडीया (ग) पाञ्चाली (घ) आरभटी

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. किञ्चित्परुषपदघटिता वृत्तिः का? ( )

(क) सात्त्वती (ख) भारती (ग) भार्गवी (घ) माधुरी

५. किञ्चित्सुकुमारी भारतीवृत्तिः केषां रसानाम् अनुकूला भवति? ( )

(क) हास्यकरुणाद्भुतरसानाम् (ख) हास्यशान्ताद्भुतरसानाम्

(ग) रौद्रशान्तवीररसानाम् (घ) हास्यबीभत्सभयानकरसानाम्

(III) परस्परं योग्यं योजयत।

१. सुकुमारपदघटिता	सात्त्वतीवृत्तिः	( )
२. भारतीवृत्तिः	किञ्चित्सुकुमारपदघटिता	( )
३. वीरभयानकयोः अनुकूला वृत्तिः	चतस्रः	( )
४. वृत्तयः	कैशिकी वृत्तिः	( )

(IV) एतैः पदैः स्वीयवाक्यानि रचयत।

१. व्यवहारः -

२. ग्रन्थः -

३. समाधानम् -

(V) लघुनिबन्धं रचयत।

१. चतसृणां वृत्तीनां स्वरूपं वर्णयत।

२. रसानां वृत्तीनां च अनुकूलतां प्रतिपादयत।

परियोजना

विविधानाम् आचार्याणां सम्मतानि काव्यलक्षणानि संगृह्य तेषां परिशीलनं कुरुत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ग्रन्थकृत्परिचयः

नाम - डॉ. सीहेच्. नागराजु

जन्मस्थानम् - वरङ्गल्, (तेलङ्गाणा)

पितरौ - राधाराजनारायणौ

अध्ययनम् - साहित्याचार्यः,
विद्यावारिधिः, J.R.F.

पुरस्कारः -

अखिलभारतीय-
साहित्यशलाकापरीक्षायां
लब्धस्वर्णपदकः

अध्यापनम् -

२०१२ तः सहाचार्यः,
अनुसन्धानप्रकाशनविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

प्रकाशनानि-

१. **मदन्तरङ्गम्** (स्वीयपद्य कदम्बकम्) ।

२. औचित्यविचारचर्चायाः **'प्रसादिनी'** व्याख्या ।

३. यथार्थभारतीनाम्न्यां तेलुगुमास-पत्रिकायां **'वेदामृतम्'**इति शीर्षकिण लेखावलिः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ISBN : 978-81-937648-3-1

CC-0. In Public Domain. Cuddalore Collection. TN.